April 1924.

THE

[C]OWKHAMBÂ SANSKRIT SERIES;

[CO]LLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS

NO. 31[?]

वैशेषिकदर्श[नम्],

महर्षिकल्पप्रशस्तदेवा[चार्यविर]चितम्

प्रशस्तपादभाष्यम् ।

पण्डितप्रवर जगदी[श]तर्कालङ्कारविरचितया सूक्तिटीकया

महामहोपाध्यायप[द्मना]भमिश्रकृतया सेतुव्याख्यया

विद्वच्चूडामणि व्योमशिवाचार्यनिर्मितया व्योमवत्या च समन्वितम् ।

वाराणसीस्थराजकीयसंस्कृतपुस्तकालयाध्यक्षेण पं० गोपी-

नाथकविराजेन न्यायोपाध्यायढुण्ढिराजशास्त्रिणा च संस्कृतम् ।

THE

PRASASTÂPADABHÂSHYAM

BY Praśastadevâchârya

WITH COMMENTARIES:

Sūkti,-BY JAGADISA TARKÂLANKÂRA,

Setu,-BY PADMANÂBHA MISRA, &

Vyomavati,-BY VYOMASIVACHARYA.

Edited by

GOPINATH KAVIRAJ, M. A.

LIBRARIAN GOVERNMENT SANSKRIT LIBRARY,

SARASVATI BHAVAN BENARES,

and

DHUNDHIRAJ SHASTRI Nyayopâdhyâya.

FASCICULUS I-२.

PUBLISHED & SOLD BY THE SECRETARY

CHOWKHAMBA SANSKRIT SERIES OFFICE, BENARES.

AGENTS:-OTTO HARRASSOWITZ, LEIPZIG:

PANDITA JYESHTHÂRAM MUKUNDAJI, BOMBAY:

PROBSTHAIN & CO; BOOKSELLERS LONDON.

Printed by Jai Krishna Das Gupta,

at the Vidya Vilas Press, Benares.

1924.

PREFATORY NOTE

The search of Sanskrit Mss is yielding fruits of immense value, and works which were once hardly known even by name are being discovered and made known to the public.

Praśastapāda's commentary on the Vaiśesika sūtras, known as Padârtha-dharma-sangraha, began to be published as early as the early eighties of the last century. Of its commentaries Kiraṇāvalī by Udayana and Nyāyakandalī by S'rīdhara have appeared in print. Vyomavatī by Vyomaśivāchārya is another commentary on Praśastapāda which was known so long, as existing only from references in Rājaśekhara's °Kandalī pañchikā & in the works of Vādīndra, Vallabha, &c. It is an ancient work, older perhaps (according to some scholars) than Udayana or S'rīdhara or at least equally old, and deserves to be better known. Understanding that an old and unique Ms of this work was deposited somewhere in Southern India I managed with great difficulty to find out its place & get a transcript prepared in 1916·, and for all this I am indebted to the good offices of my beloved tutor, the late Dr. Venis, the then Principal of the Sanskrit College, Benares,

'Setu' is another interesting commentary on the same work by Padmanābha Miśra of Mithilā whose Kiraṇāvalībhāskara has already been published in the

Sarasvatī Bhavana Series, Benares*. This Ms was obtained from a friend of mine at Alwar,& subsequently collated with another Ms acquired at Benares.

'Sūkti' is a still further commentary, brief but useful, on Praśastapāda, by the great Jagadīśa Tarkālaṅkāra of Bengal.

Both 'Setu' and 'Sūkti extend as far as the Dravya section of the Bhāṣya.

The Mss, on which the present edition is based, will be described fully in the 'Introduction' which will follow the completion of the work & which will also contain all historical and doctrinal particulars in connection with the authors as well as a comparative estimate of their works.

Government Sanskrit College,
Benares.
April 14, 1924. } Gopinath Kaviraj

*Edited by the undersigned for "The Princess of Wales Sarasvati Bhavana Texts", No. I.

ॐ नमः परमात्मने ।

प्रशस्तपादभाष्यम् ।

प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः ।
पदार्थधर्मसङ्ग्रहः प्रवक्ष्यते महोदयः ॥

श्रीजगदीशविरचिता सूक्तिटीका ।

ॐ नमः शिवाय ।

कणभक्ष्यमुनेः पक्षरक्षाविन्यस्तवासनाः ।
सूक्तिं श्रीजगदीशस्य चिन्तयन्तु विचक्षणाः ॥

ग्रन्थारम्भे विघ्नविघाताय कृतस्येश्वरादिप्रणामस्य शिष्याणां शिक्षार्थमादौ निबन्धपूर्वकं प्रवृत्त्यङ्गमभिधेयं दर्शयति प्रशस्तपादाचार्यः । प्रणम्येति । ईश्वरं प्रणम्य अत ईश्वरप्रणामादनु पश्चाद् कणादं प्रणम्येत्यन्वयः । यद्वा ईश्वरं प्रणम्य अनु पश्चाद् कणादं प्रणम्य अत इमावीश्वरकणादौ प्रसाद्य प्रवक्ष्यते इत्यन्वयः । इमौ प्रसाद्येत्यर्थे अतःपदस्य ल्यप्लोपे पञ्चम्याः साधनात् यतः सञ्छिष्या उपसन्ना अतः प्रवक्ष्यत इत्यर्थ इत्याचार्याः । पदार्थानां भावपदस्यार्थानां ये धर्मास्साधर्म्यवैधर्म्यरूपास्तेषां सङ्ग्रहः संक्षेपेण कथनं यत्र पदार्थधर्मसङ्ग्रहो भाष्यनामाग्रन्थो प्रवक्ष्यते प्रकृष्टं

यथा स्यात् तथा वक्ष्यते। वचनस्य प्रकर्षश्चात्र साकाङ्क्षत्वयोग्यत्वादिरूपो ग्राह्यः सङ्क्षिप्तत्वस्य सङ्ग्रहपदेनैव प्राप्तत्वात्। ग्रन्थासम्पादकस्येश्वरस्य ग्रन्थनिर्वाहार्थं नतिर्व्यर्थेत्याशङ्कामपनेतुमीश्वरं विशेषयति। हेतुमिति। कार्यमात्रस्य हेतुभूतमिति तदर्थः। ननु कणादोक्तानामेव पदार्थधर्माणां यदि सङ्क्षेपेण सङ्ग्रहः क्रियते तदा जीवित्वेन विप्रनस्तकस्य कणादस्यैव वचसि विवेचकानां नास्था प्रागेव तु तदुक्तस्य सङ्क्षेपेण वचने इत्याशङ्कामपाकुर्वन् कणादं विशेषयति मुनिमिति। मननशीलमित्यर्थस्तथाच मुनेर्मुक्त्यन्यफलनिरपेक्षत्वात् कणादस्य विप्रनस्तकत्वं बाधितमिति भावः। स्वकीयग्रन्थे शिष्याणां प्रवृत्त्यर्थं फलवत्तां दर्शयति महोदय इति। महानुत्कृष्टः शुद्धज्ञानरूप उदयो बोधो यस्मात् स महोदयो ग्रन्थः॥

श्रीगणेशाय नमः।

श्रीपद्मनाभमिश्रविरचिता सेतुटीका।

स्मृतिपथमुपनीय श्रीमतस्तातवक्त्रात्
उचितमुपचितार्थं वाक्यमत्यादरेण।
जयति विरचितोऽसौ पद्मनाभेन यत्नात्
उदयनकृतिपारप्राप्तये सेतुरुच्चैः॥ १॥
उदयनकृतचन्द्रिकया वृद्धो भाष्याम्बुधिष्पपरितः।
बालानामपि सुगमस्तत्र मया रच्यते सेतुः॥ २॥
बलवशीकृतदुर्दमभूपति-
र्निजभुजार्जितलोकसमुन्नतिः।
अगतिकार्थिजनस्य परा गति-
र्जयति वीरवरः पृथिवीपतिः॥ ३॥

शिष्यशिक्षार्थं मङ्गलं निबध्नाति प्रणम्येति। मया पदार्थधर्म-

(सेतु०) सङ्ग्रहः प्रवक्ष्यते । कथंभूतो महोदयः । किं कृत्वेश्वरं प्रणम्य कथम्भूतं हेतुम् । अतोऽनु कणादं प्रणम्य कथम्भूतं मुनिमित्यन्वयः । पदार्थानां धर्मास्तेषां सङ्ग्रहः प्रवक्ष्यते प्रकृष्टो वक्ष्यत इत्यर्थ इति केचित् तन्न उपसर्गार्थस्य प्रकर्षादेर्धात्वर्थ एवान्वयात् । देवदत्तेनौदनः प्रपच्यत इत्यादौ तथादर्शनात् । सङ्ग्रहः प्रकृष्टवचनानुकूलयत्नविषय इति तु सम्यक् । ननु सङ्ग्रह इतस्ततो विततानाम्पदार्थानामेकत्र सङ्कलय्य कथनं कथनञ्च वचनमेव तस्य च प्रवचनं कथमिति चेन्न सङ्ग्रहः प्रवक्ष्यते सङ्ग्रहानुकूलो यत्नः क्रियत इत्यर्थात् । सङ्कलय्य ज्ञात्वेति प्राञ्चः । वस्तुतस्तु पदार्थस्य धर्मस्स एव सङ्गृह्यत इति कर्मव्युत्पत्तेः तस्य प्रवचनं सम्भवत्येव । भावव्युत्पत्त्या त्वितस्ततो विततानामित्यादिरेव सङ्ग्रहः तत्र तु सङ्कलय्येत्यस्योचितसन्निवेशं पुरस्कृत्येत्यर्थः । उचितसन्निवेशश्च प्रथमतो द्रव्यस्योद्देशस्तदनु लक्षणं तदनु परीक्षेत्यादि । अत एव सङ्ग्रहपदेन प्रकरणशुद्धिः प्राप्यते उचितसन्निवेशप्राप्तेः । ज्ञात्वेति करणे तु न प्राप्यते ज्ञानोत्तरमनुचितसन्निवेशेनापि निर्माणसम्भवात् । न च कर्मव्युत्पत्तौ सङ्ग्रहपदवैयर्थ्यम् प्रकरणशुद्धिप्राप्त्यर्थमेवाभिधानात् । अन्यथा भावव्युत्पत्तावपि वैयर्थ्यात् । न च कर्मव्युत्पत्तौ धर्मस्यैव क्रियान्वयित्वेन कथं प्रकरणशुद्धिप्राप्तिर्विशिष्टस्य चान्वये विशेषणभागे सैव प्रवचनानुपपत्तिर्भावव्युत्पत्तौ तु प्रकरणशुद्धिः प्राप्यत एव तत्रैव क्रियान्वयादिति वाच्यम् व्यर्थमिति न्यायेन तस्य प्रकरणशुद्धिबोधकत्वात् । ननु किमिति भावव्युत्पन्नं सङ्ग्रहपदमुपेक्ष्य इति कुसृष्टिराद्रियत इति चेन्न अग्रिमभाष्यानुरोधेन तथा व्याख्यानात् । अग्रिमभाष्ये धर्मस्य तत्त्वज्ञानहेतुत्वं प्राप्यते तदेव प्रकृतेपि युज्यते । तच्च महोदयपदस्य धर्मविशेषणत्वे भवति नान्यथा । किञ्च प्रवक्ष्यत इत्यत्र प्रकृष्टवचनानुकूलयत्नः प्रतीयते भवद्भिस्तु लक्षणया प्रकृष्टो यत्नो ग्राह्यस्तत्र च प्रकृतिप्रत्यययोर्येत्नार्थकत्वे एकस्यानन्वयो वक्तव्यस्तथा च यत्ने प्रयोगे महती विलामग्रीत्यस्माभिस्तदुपेक्षितामिति सङ्क्षेपः ।

प्रणम्येत्यत्र प्रशब्दोपादानं प्रकृष्टा नतिः कर्तव्येति शिष्यशिक्षार्थं । प्रकर्षश्च भक्त्यादिः तत्रोपसर्गस्य वाचकतेति:केचित् । तत्र नैयायिकाः–एवं हि प्रपदत्वेन प्रकर्षत्वेन वा वाच्यवाचकभावे शक्त्यन्तरा-

(सेतु०) पत्तौ गौरवापत्तेः। प्रोत्तरजित्वेन प्रकृष्टजयत्वेन वाच्यवाचकभावे तु जिधातोर्जये विशेष्ये क्लृप्तायाः शक्तेः प्रकर्षरूपविशेषणविषयकत्वमात्रं कल्प्यत इति लाघवमिति तन्न अवच्छेदकभेदेन सम्बन्धिकपदार्थस्योत्सर्गतो भेदेन प्रकृतेपि शक्तिभेदात्। अनन्यलभ्यस्यैव शक्यत्वाल्लक्षणयैवोपपत्तौ न शक्तिरिति तु सम्यक्। तथा च धातोरेव लक्षणया तदर्थप्रतीतिस्तात्पर्यग्राहकस्तूपसर्गः। अन्यथा प्रतिष्ठित इत्यत्र का गतिः? तत्र हि धातोर्गतिनिवृत्तिः प्रतीयत उपसर्गेण गतिः। न चैवं गत्या प्रत्ययार्थान्वय उपपद्यते प्रजयतीत्यत्र प्रकृत्यर्थं द्वारीकृत्याप्यन्वयसम्भवात्। तस्माद्विरोधिलक्षणया प्रकृतधातोर्गमनोपस्थितिस्तात्पर्यग्राहकस्तूपसर्ग इति। ननु देवदत्तः पाकं करोतीत्यत्र धात्वर्थप्रत्ययार्थयोर्यत्नत्वेन यत्नविषयकयत्नासम्भवात् धात्वर्थेन यत्नानन्वयेन तमद्वारीकृत्यैव पाके यथा यत्नान्वयो धातुप्रयोगस्तु साधुत्वार्थः केवलप्रत्ययस्याप्रयोगात् तथा प्रकृतेपि धात्वर्थानन्वयेपि साक्षादेवोपसर्गार्थः प्रत्ययार्थेनान्वेष्यतीति। अपि चोपसर्गार्थे कथं प्रत्ययार्थोऽन्वेष्यतीति भावतोऽभिधाने प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानामिति न्यायो मूलम्। असौ च स्वयमेव निर्मूलष्कथमन्यस्य मूलतो यास्यतीति। तथाहि प्रत्ययः प्रकृत्यर्थान्वितमेव स्वार्थं बोधयतीति वार्थः। प्रकृत्यर्थान्वितं स्वार्थं बोधयत्येवेति वा। प्रकृत्यर्थान्वितं स्वार्थमेव बोधयतीति वा। नाद्यो देवदत्त एवान्वयात्। न द्वितीयः करोतीत्यत्र तदभावात। नहि तत्र प्रकृत्यर्थे यत्ने कोऽपि प्रत्ययार्थोन्वेति। नापि तृतीयः तथा नियमेप्युपसर्गार्थे स्वार्थान्वयबोधकत्वे बाधकाभावात्। प्रकृत्यर्थान्वितमेव स्वार्थं बोधयतीति नियमस्तु सुब्विभक्तीनां तत्रान्यत्रान्वयादर्शनादिति। एवञ्च यत्र धात्वर्थोन्वेति तत्र धात्वर्थद्वारोपसर्गार्थे प्रत्ययार्थान्वयः ओदनं पचतीत्यत्रौदन इव यत्र तु नान्वेति तत्र तु साक्षादेव पाकं करोतीत्यत्र पाक इवेति चेन्न। अत्र ब्रूमो—यत्प्रकारान्तरेण प्राप्यते तस्य न शाब्दबोधविषयत्वमित्येको न्यायो यथा धूमोस्तीत्यत्र वह्नेस्तत्र वाक्याद्धूमावबोधानन्तरमनुमानादेव वह्निबोधात् प्रकारान्तरेण शाब्दबोधविषयत्वेन शब्दवृत्तिविषयत्वमिति। द्वितीयो यथा संसर्गः आकाङ्क्षादिरेव तत्प्राप्तिर्वृत्त्यन्तरविषयत्वेन शक्तिविषयत्वं प्रति। तृतीयो यथा लक्षणयैवोपपत्तौ शक्त्यनङ्गीकारः।

(सेतु०) एवञ्च प्रकृते धातुलक्षणयैव प्रकृष्टजयादिप्रतीतेरुपपत्तावुपसर्गशक्तिकल्पनायां मानाभावात् । नन्वेवमपार्थकतापत्तिरुपसर्गाणामन्वितानामेव वाक्यस्थत्वादिति चेन्न तेषां निरर्थकत्वेन तदनन्वयेपि तदभावात् सार्थकानन्वय एव तत्सत्त्वात् । अत एव पदवाक्यजातमनन्वितमपार्थकमिति वदन्ति । तत्र पदवाक्ययोस्सार्थकयोरेव घटकत्वलाभात् वृत्तिमतः पदत्वात् पदसमूहस्य वाक्यत्वात् । ननु प्रतिष्ठत इत्यत्र भवतु लक्षणा गतेस्स्वार्थगतिनिवृत्तेरन्यत्वात्प्रजयतीत्यादौ तु कथं सा ? न तावत् प्रकर्षे लक्षणा जये शक्तिर्युगपद्वृत्तिद्वयविरोधापत्तेः । ननु युगपद्वृत्तिद्वयविरोधो न दूषणम् गङ्गायां घोषमत्स्यौ स्त इत्यत्र तदभावात् । तत्र घोषानुरोधेन लक्षणया तीरं मत्स्यानुसारेण विशेष्यभावेन नान्वेतीति शक्त्या प्रवाहस्योपस्थितेरिति चेन्न एकेन पदेन शक्तिलक्षणाभ्यामुपस्थापितमर्थद्वयं विशेषणविशेष्यभावेनान्वेतीत्यस्य दूषणत्वात् । तत्र च तीरप्रवाहयोर्विशेषणविशेष्यभावेनानन्वयात् । ननु राजपुरुष इत्यत्र राज्ञः शक्त्या सम्बन्धस्य लक्षणयोपस्थिते च तत्र विशेषणविशेष्यभावेनैवान्वयादिति चेन्न ससम्बन्धिकपदार्थातिरिक्तस्थले तस्य दोषत्वात् सम्बन्धस्य ससम्बन्धिकत्वात् । प्रकृते च प्रकर्षजययोः ससम्बन्धिकपदार्थातिरिक्तयोर्विशेषणविशेष्यभावेनैवान्वयोऽभिमत इति दोषत्वस्योचितत्वात् इति चेन्न प्रकृष्टजये लक्षणायाः स्वीकारात् । ननु स्वार्थादन्येन रूपेण ज्ञाते भवति लक्षणेति प्रामाणिकानां प्रवादः किमित्युपेक्षित इति चेन्न जयत्वा स्वार्थात्प्रकृष्टजयत्वस्य भिन्नत्वात् । अन्यथान्यतस्तात्पर्यग्रहे जिधातोर्लक्षणया प्रकर्षोपस्थितौ का गतिः । इदन्त्ववधेयम् । युगपद्वृत्तिविरोध इत्यस्य कोऽर्थः । एकस्मिन् पदे एकदा शक्तिलक्षणे न तिष्ठत इति चेन्न ईश्वरेच्छारूपायाः शक्तेश्शक्यलक्ष्यसम्बन्धरूपाया लक्षणायाश्च गङ्गादिपदेषु युगपत्सत्त्वात् । शक्तिलक्षणाभ्यामेकस्मात्पदाद्युगपदर्थद्वयोपस्थितिर्न भवतीति चेन्न युगपत्संस्कारोद्बोधे युगपत्स्मृतौ बाधकाभावात् । तथोपस्थितयोः शाब्दबोधो न भवतीति चेत् सैन्धवमानयेत्यत्र लवणघोटकयोः शक्त्योपस्थितयोर्यत्परस्परमन्वयबोधो न भवति तत्र किं बीजमिति वक्तव्यम् न तावदिह युगपद्वृत्तिद्वयविरोधः उभयत्र शक्तेरेव

(सेतु०) स्वीकारात् । ननु समानविभक्तिकपदोपस्थाप्यार्थयोर्ना-धाराधेयभावादिनाऽन्वयस्तथाविभक्त्यभावात् । किन्तु नीलो घट इत्यत्र नीलघटयोरिवाभेदान्वयो वाच्यः स च न भवत्ययोग्य-त्वात्तथान्वयबोधादर्शनेन स्वरूपायोग्यत्वात् वा तथासत्ति—आ-काङ्क्षाविरहादिति चेन्न तथा सति शक्तिलक्षणाभ्यामुपस्थापि-तस्यार्थद्वयस्यानन्वये तदेव बीजमस्तु किं युगपद्वृत्तिद्वय-विरोधस्य दोषत्वेन । एवञ्चैवंविधप्रतिसन्धानासमर्थानां बालानां प्रबोधाय युगपद्वृत्तिद्वयविरोधो दूषणमिति प्राचामाचार्याणामु-क्तिर्न तु वस्तुगतिः निरुक्तयुक्त्युपमर्दासहत्वात् । तस्माद्युगपद्वृत्ति-द्वयविरोधो न दूषणमिति सिद्धमिति । देवदत्तः पचतीत्यत्रैकेना-ख्यातेन शक्तिद्वयेन युगपदुपस्थापितयोः कृतिवर्तमानत्वयो यथो गच्छतीत्यत्र शक्तिलक्षणाभ्यामुपस्थापितयोर्व्यापारवर्तमानत्व-योरन्वयबोधो भवतीति प्रमातृसाक्षिकम् । एवञ्च तत्र फलबला-दाकाङ्क्षादिकं यथाऽऽक्षिप्यते तथा प्रजयतीत्यत्रापि जिधातोर्जये एका शक्तिः प्रकर्षे द्वितीया तत्र प्रोत्तरजित्वेन वाचकतास्तु जित्वेनैव वा । तात्पर्यग्राहकस्तु प्रशब्दो विशिष्टशक्तिकल्पनायां गौरवात् फल-बलादेवाकाङ्क्षादयोऽपि नापि दुर्लभाः । निरर्थकस्योपसर्गस्य प्रयोगस्तु भवतोऽपि समाधेयः । एवं लक्षणालक्ष्येऽपि प्रकर्ष एव लक्षणा शक्त्यो-पस्थिते लक्षणोपस्थितस्य प्रकर्षस्यान्वयबोधसम्भवे विशिष्टलक्षणा-या गौरवग्रस्ततयाऽक्षमत्वादेकसम्बन्धिज्ञानजन्यापरसम्बन्धिस्मृते-स्तत्सम्बन्धिविषयत्वाभावनियमाच्च । हस्तिपदजन्यहस्तिज्ञानस्य ह-स्तिपकस्मृतौ तथादर्शनात् । अन्यथा गङ्गादिपदेऽपि गङ्गातीरत्वादिना लक्षणापत्तेरित्यादिरस्माकं पितृचरणोपासनानुसारी पन्थाः । स चा-स्मद्वचनसार्थनिरस्तशङ्कानामन्येषामपि सुगम एव । प्रतिष्ठित इत्यादौ धात्वर्थघटित एव शक्तेर्लक्षणाया वा परैरपि स्वीकारात् । ननु शक्तिपक्षे शक्तिस्वीकारस्यावश्यकत्व उपसर्ग एव शक्तिः किन्न स्वीक्रियते इति चेन्न यत्र शक्तिः क्लृप्ता तत्र शक्त्यन्तर-कल्पनसम्भवेऽक्लृप्तशक्तिके शक्त्यन्तरकल्पनाया अन्या-य्यत्वात् । वस्तुतस्तु लक्षणैव क्षोदक्षमा शक्यलक्ष्यसम्बन्ध-रूपायास्तस्याः क्लृप्तत्वात् । एकसम्बन्धिज्ञानस्यापरसम्ब-न्धिस्मारकत्वस्य च तथात्वात् । गङ्गादिपदे तीरादौ शक्तिमुपेक्ष्य

(सेतु०) लक्षणास्वीकारे तस्यैव बीजत्वात् । ननु धातोरेव प्रकर्षाद्युपस्था पकत्वे व्यतिस्त इत्यत्र का गतिः तत्र धातोरभावेऽप्यन्योन्यं भवतीत्यर्थप्रत्ययादिति चेन्न धातुस्मरणविरहिणा तत्रार्थप्रत्ययाभावेन लुप्तस्मृतेरेवार्थप्रत्यायकत्वात् । दधि पश्येत्यादौ लुप्ताया अपि द्वितीयायाः स्मरणमविरूढायाः कर्मतास्मारकत्वात् । विभक्तावेव शक्तिस्वीकारेण तत्स्थानीये तदभावेनासत्या अपि विभक्तेः स्मारकत्वाच्चेति । तस्मादुपसर्गाणाञ्च शक्तिर्नापि धातोर्विशिष्टे केवले वा शक्तिर्नापि विशिष्टे लक्षणा किन्तु केवले लक्षणा एतावत्सर्वमभिसन्धायैवाचार्यचरणैरप्युक्तं द्योत्यत इतीति दिक् । क्त्वाप्रत्ययो विशिष्य शिक्षायै । ततः पूर्वकालत्वानन्तर्यसमानकर्तृत्वानि प्रतीयन्ते इति सर्ववादिसिद्धम् ।

कुत्र शक्तिरिति तु विचार्यते । न तावत् सर्वत्र शक्तिः प्रत्येकशक्तिः प्रत्येकशक्तौ नानार्थत्वापत्तेः । केनचिदेकधर्मेण शक्तौ तद्धर्मप्रकारकबोधापत्तेः । विशिष्टे शक्तौ तद्धर्मप्रकारकबोधापत्तेः । विशिष्टे शक्तौ गौरवापत्तेश्च । अत एवैकयोक्त्या पुष्पवन्तावितिन्यायोऽपि निरस्तः । प्रमाणाभावाद्गौरवाच्च । तस्माद्यत्र शक्तिः तत्र समानकर्तृत्वे शक्तौ पूर्वकालत्वप्रतीतिर्नोपपद्यते । न च समानकर्तृत्वेन तदाक्षेप्तुं शक्यते समानकर्तृकयोरपि क्रिययोः क्वचित्समानकालत्वात् । प्रधानत्वे सति समानकर्तृकक्रियात्वेन तदाक्षिप्यत इति चेन्न उद्देश्यत्वं हि प्रधानत्वं न च तद्घटितेनाक्षेप्तुं शक्यते यत उद्देश्यस्यापि क्रियाद्वयस्यैकेन कर्त्रा युगपदनुष्ठानात् । एककालानुत्पन्नक्रियात्वं प्रधानक्रियात्वमिति चेन्न अस्य ज्ञानाऽनुपस्थितत्या तत्प्रयोगानन्तरमनेन तदाक्षेपानुपपत्तेः तस्यैवानुक्षेपकत्वे समानकर्तृकत्वस्य वैयर्थ्याच्च असमानकालीनत्वस्य नियमत आक्षेप्तुमशक्यत्वाच्च । न चैते क्रिये पूर्वापरीभावापन्ने इत्यनुमानम् । एषा क्रिया पूर्वकालीनेति ज्ञातुमशक्यत्वात् अनुमानस्य सम्मुग्धत्वात् प्रतीतेश्च क्त्वातो विशेषविषयिण्या एव जायमानत्वात् । नन्वसमानकालीनत्वमपि क्त्वाप्रयोगोत्तरं प्रतीयत एव । क्त्वाश्राविणामेते क्रिये समानकालीने न वेति संशयादर्शनात्तथा च तत्रैव शक्तिरस्तु तेन च पूर्वकालत्वमेवाक्षिप्यत इति चेन्न सम्मुग्धाक्षेपापत्तेः । न च भोजनं व्रजनपूर्वकालीनं व्रजनविशेष्यत्वे सति व्रजनसमानकर्तृकत्वात्सम्मतवदिति

(सेतु०) अनुमानमिति वाच्यम् एतावतः क्त्वातो उपस्थितेः। न च समानकर्तृत्वान्यथानुपपत्त्या सिद्धत् पूर्वकालत्वं विशेष्ये भोजन एव सिध्यति तदन्वयस्याभ्यर्हितत्वादिति वाच्यम् तदन्यथानुपपत्त्याऽपरकालत्वस्यैव विशेष्ये सिद्ध्यापत्तेः। तस्मात्पूर्वकालत्वमेव क्त्वः शक्यम् समानकर्तृत्वन्तु वाक्यार्थमहिमलभ्यम्। इतोऽपि न समानकर्तृत्वं क्त्वदशक्यमन्यलभ्यत्वात्। यदि प्राथमिको बोधो व्रजनपूर्वकालीनं भोजनमित्याकारकस्तदा पूर्वकालत्वमेव शक्यमानन्तर्यन्त्वाक्षेपबललभ्यम्। यदि तु भोजनानन्तरकालीनं व्रजनमित्याकारकस्तदा व्यत्ययः। एष च विवादः साक्षिणाऽनुभवेनैव निरसनीय इति न युक्त्याग्रहः उचितः। पूर्वकालत्वानन्तर्ययोरेकं शक्यं शेषन्तु किञ्चिदाक्षेपात् किञ्चित्तु वाक्यार्थमर्यादया प्रतीयत इति संक्षेपः। अव्यवहितपूर्वकालत्वं शक्यमिति जरन्नैयायिकमतन्तु व्यवधानेऽपि प्रयोगदर्शनेनाव्यवधानस्याप्रतीत्या च जरदेव। समानकर्तृत्वेनाक्षिप्तं पूर्वकालत्वं भोजन एवान्वेति न तु व्रजन इत्यत्र बीजगवेषणायाञ्च तावद्भोजनव्रजनक्रिययोरेकः कर्तेत्यनुभवो नापि भुजिक्रियया व्रजनक्रियैककर्तृकेत्याकारकः किन्तु व्रजनक्रियया भुजिक्रियैककर्तृकेत्याकारकः। एवञ्च भोजनस्य विशेष्यतया तत्रैव पूर्वकालत्वमन्वेतीति मीमांसकैरुत्तारितम् तदपि न विचार्यमाणं चमत्कारमातनोति। तर्हि कस्यायं महिमा भुक्त्वा व्रजतीति शब्दस्य वा आक्षेपस्य वा? सहकारितां गतयोर्द्वयोर्वा। न तावदाद्यः शाब्दबोधाविषये शब्दमहिम्नोऽनुपयोगात्। नापि चरमः शब्दार्थापत्त्योः शब्दानुमानयोर्वा मिथः सहकारित्वाकल्पनात्। नापि द्वितीयः आक्षेपस्यानुमानत्वे तत्समानशीलत्वे वा व्याप्तिपक्षधर्मताबलालभ्ये सामर्थ्याकल्पनात्। अस्यार्थस्य व्याप्तिबललभ्यत्वे तावदुपन्यासवैयर्थ्यात्। ननु पक्षविशेष्यकस्य हेतोः समानकर्तृत्वस्य भानादनुमानसामर्थ्योपन्यास एवैतावतेति चेन्न भुक्त्वा व्रजतीत्यत्र कर्तुर्विशेष्यतया तादृशि बोधे प्रमाणाभावात्। अत एव गुणानाञ्च परमार्थत्वादसम्बन्धः समत्वादिति न्यायोपन्यासोऽप्यन्याय एवेत्यलमुल्लसत्पल्लववचनविलासेनेति॥

मङ्गलस्य फलं समाप्तिः। सा च न चरमवर्णतदुच्चारणतद्ध्वंसा-

(सेतु०) न्यतमरूपा मौलिकृतग्रन्थे समाप्त्यभावव्याप्तेः। किन्तु चरमवर्णज्ञानमिति प्राचीनाः। व्यभिचारग्रस्ततयाऽस्य पक्षस्य विघ्नध्वंसं फलं कल्पयन्ति कल्पाः। कल्पश्चायमाचार्यचरणानामपि सम्मतः। कथमन्यथा नच विघ्नहेतुसद्भावानिश्चयाभावात्तद्वारणमनुपादेयम् तत्सन्देहेऽपि तदुपादानस्य न्याय्यत्वादिति शङ्कासमाधाने। दुरितध्वंसार्थिप्रवृत्तौ दुरितनिश्चयस्य प्रायश्चित्ते हेतुतादर्शनात् कथं तेन विना तादृशी मङ्गलप्रवृत्तिरिति शङ्कार्थः। शिष्टाचारबलाच्छङ्कायामपि प्रकृतप्रवृत्तिरिति समाधानार्थः। न चैतदुभयं विघ्नध्वंसस्याकाम्यत्वे घटते। न च काम्यत्वमफलतायां यागादौ द्वारस्याकाम्यत्वात्। विघ्नध्वंसस्य फलत्वमाचार्यसम्मतमिति तु विरलैरेव ज्ञातुं शक्यते अत एवातिचतुरेण चिन्तामणिकृता स्वकीयत्वेन स्वीकृतोऽयं पन्थाः। न चाधिकाररूपकामनाविषयत्वं फलत्वनिर्वाहकं प्रकृते च तादृशकामनामादाय शङ्कासमाधाने इति वाच्यम् तस्या अनावश्यकतया तामादाय तदनुपपत्तेरिति सङ्क्षेपः।

(१) अत्र मङ्गलतत्त्वं विचार्यते। तत्र मङ्गलस्य समाप्तिजनकत्वमिति प्राञ्चः। तेषामयमाशयः समाप्यतामिति कामनया तावन्मङ्गलविषयकशिष्टाचारः। तदनुरोधिनी च श्रुतिः—समाप्तिकामो मङ्गलमाचरेदित्याकारा। सा च स्वर्गकामो यजेतेत्याकारा यागस्य स्वर्गसाधनत्वमिव मङ्गलस्य समाप्तिसाधनत्वं बोधयतीति अविवादम् शाब्दबोधसामग्र्यास्तुल्यत्वात्। न च व्यभिचारज्ञानस्य विरोधिनः सत्त्वे कथं श्रुतिः कारणतां बोधयिष्यतीति वाच्यम् तथासति समाप्तित्वावच्छेदेन जन्यत्वं मा बोधयतु समाप्तित्वसामानाधिकरण्येन तु बोधयन्ती

(१) (कणा०) प्रणम्येति। प्रेत्युपसर्गेण प्रणामातिशयं दर्शयति। हेतुत्वं निमित्तकारणत्वं तच्चान्येषामपीति ईश्वरपदम्। ईश्वरशब्दश्चान्यत्र वर्तमानोऽपि ज्ञानवत्त्वान्महेश्वरबोधक एव "शङ्कराज्ज्ञानमन्विच्छेदिति" वचनात्। मनुष्यार्थं नहि हेतुपदं ? ज्ञानवत्त्वाद्विशेषणमिदं नैतद्वयम्। स्तुतेर्गुणसङ्कीर्तनरूपतया सकलकार्यकर्तृत्वाभिधानात्। मुनयश्चान्येऽपि विशिष्टज्ञानवैराग्यादिमन्तो भवन्तीति विशेषणं कणादमिति। तत्त्वज्ञानाच्च मिथ्याज्ञानादीनामभावो निर्णीयते। विशिष्टाहारसंज्ञाप्रदर्शनेनास्य चाप्यनिराम। अतोऽनन्तरमेव प्रतिपत्तिक्रियारहितः पदार्थधर्मसंग्रहः प्रवक्ष्यत इति। नच क्त्वाप्रत्ययादेव विशिष्टानन्तर्यप्रतिपत्तिः तस्या हि समानकर्तृत्वे सति पूर्वकालभावित्वमात्रेऽन्वयात्, तथाहि भोजनानन्तरमेव शयनादिक्रियाव्यवधानेऽपि भुक्त्वा व्रजतीति प्रयोगो दृश्यते एव। अत्र चेश्वरप्रणामानन्तरमेव मुनेर्नमस्कारः तदनन्तरमेव प्रवचनक्रियेति।

व्योमवत्यादिटीकायाः ग्रन्थारम्भसमयेऽनुपलम्भादस्यमगृहीत्वापि टिप्पणमत्र ददाति।

(सेतु०) केन वारणीया । नहि शब्दः एकविशेषणावच्छेदेनैवापर-
विशेषणं सन्धयतीति नियमः ब्राह्मणे विद्यत्येवमादीनामुच्छेदापत्तेः ।
दृष्टान्तश्रुतेरसङ्गतत्वापत्तेश्च । गङ्गास्नानादितोऽपि स्वर्गेण तत्रा-
पि व्यभिचारस्य स्फुटत्वात् । न चावच्छेदकग्रहं विना न कार्य-
कारणभाव इति प्रवादस्तथासति प्रमादः स्यादिति वाच्यम्
तस्य प्रत्यक्षपातित्वात् । अवच्छेदकोपस्थितिं विना तत्र ग्राहक-
योरन्वयव्यतिरेकयोरभावात् । न हि द्रव्यान्वये घटान्वयो नापि
दण्डव्यतिरेके द्रव्यव्यतिरेक इत्यन्वयव्यतिरेकौ सम्भवतः, सम्भव-
तस्तु घटान्वये दण्डान्वयो दण्डव्यतिरेके घटव्यतिरेक इत्याका-
रकौ तथा च प्रत्यक्ष एवावच्छेदकपरिच्छेदापेक्षा न तु शब्दाद-
वपि । अपि चान्वयव्यभिचारग्रहप्रत्यक्षेपि न कारणतावधारण-
निवारणधारणः प्रकृतबोध्यविरोध्यविषयकत्वात् अनन्यथासिद्धनि-
यतपूर्ववर्तित्वं प्रकृते बोध्यम् तद्विरोधी च विशेषणाभावो विशे-
ष्याभावो विशिष्टाभावश्च । तत्र विशेषणाभावोऽन्यथासिद्धः. न
चासावन्वयव्यभिचारात्मा । विशेष्यन्तु नियतपूर्ववर्तित्वन्तदभावो
नियमाभावः स च व्यतिरेकव्यभिचारपर्यवसन्न एव न त्वन्वय-
व्यभिचारस्य वार्तामपि सहते अन्वयव्यभिचारिणां दण्डादीनां
नियतपूर्ववर्तित्वसत्त्वात् । विशिष्टाभावोपि प्रकृते विशेषणविशे-
ष्ययोस्सामानाधिकरण्याभाव एव । न चासावन्वयव्यभिचारं
स्पृशत्यपि । प्राचीनग्रन्थेषु तस्य दूषणत्वेनाशङ्का प्रमाद एव
भवति तु व्यतिरेकव्यभिचारः प्रत्यक्षस्थले परिपन्थी न तु
शब्दे तत्र धर्मसामानाधिकरण्येनापि जन्यत्वग्रहसम्भवात् ।
अत एवाचार्यचरणाः —"आगममूलत्वाच्चास्यार्थस्य व्यभिचारो
न दोषायेति" । यदि प्रत्यक्षेण कार्यकारणभावग्रह उच्यते तदा
व्यभिचारो दोषः स्यात् तत्र धर्मावच्छिन्नं प्रति नियतपूर्ववर्तित्व-
ग्रहस्य व्यभिचारग्रहेऽसम्भवात् । उच्यते तु शब्देन कार्यकारणभा-
वग्रहः तत्र तु व्यभिचारग्रहो न परिपन्थी धर्मावच्छेदेन जन्यत्व-
ग्रहप्रतिबन्धेऽपि धर्मसामानाधिकरण्य विना प्रतिबन्धादिति तद-
र्थः । तस्मान्न श्रुत्या कार्यकारणभावग्रहे व्यभिचारः प्रतिबन्धक इति
प्रसिद्धम् । गृहीते तु कार्यकारणभावे स्वर्गे जातिविशेष इव समाता-
वपि कश्चिद्विशेषः कल्पनीयः । ननु समाप्तेर्ज्ञानविशेषरूपतया जा-

(सेतु०) तिरूपो विशेषः प्रकृतेऽपि किन्न क्लृप्त इति चेन्न जाति-सङ्करप्रसङ्गात्। तथाहि चरमवर्णज्ञानं हि समाप्तिः चरमवर्णज्ञानञ्च क्वचिच्छ्रावणं क्वचिन्मानसम्। एवञ्च मानसत्वं तज्जातिपरिहारेण सुखसाक्षात्कारादौ सा च जातिर्मानसत्वपरिहारेण श्रावणे चरमवर्णज्ञाने मानसे च द्वितयमिति। एवं शब्दादिचरमवर्णज्ञानमादायापि साङ्कर्यमवधार्यम्। ननु मानसमेव चरमवर्णज्ञानं समाप्तिर्न श्रावणम् शब्दवक्ता वा सार्वत्रिकः किन्तु क्वचित्कः तथा च यत्र स नास्ति तत्र ज्ञानलक्षणां प्रत्यासत्तिमादाय मानसमेव चरमवर्णज्ञानमाश्रयणीयम्। एवञ्च यत्रापि श्रावणादिचरमवर्णज्ञानं तत्रापि तदुपनीतस्य मानसमेव तदास्थेयमिति चेन्न चरमवर्णज्ञानस्यैव लाघवेन समाप्तित्वात्। मानसपदोपादाने गौरवात्। ननु ज्ञानमानसयोरुभयोरपि पदयोरुपादाने गौरवम् न तु केवलस्य मानसपदस्योपादाने ज्ञानमानसयोरुभयोरपि जातिमत्त्वादिति चेन्न उत्सर्गसिद्धतर्कमहिम्ना ज्ञानत्वस्यैव समाप्तिस्वरूपे प्रवेशात्। ननु वर्णज्ञानमात्रमेव समाप्तिः वर्णानामपरिनिश्चितत्वेन समाप्तेऽपि चरमवर्णज्ञाने वर्णज्ञानान्तरसम्भवात्। नापि चरमत्वेन भानम् असौ मया चरमो वर्णः कर्तव्य इति पूर्वं प्रतिसन्धानेपि समाप्त्यभावात्। किन्तु सकलपूर्ववर्णज्ञानोत्तरकालीनं चरमवर्णज्ञानत्वम् तच्च न (तु) श्रावणं सम्भवति चरमत्वस्य श्रोत्राग्राह्यत्वादिति मानसमेव ज्ञानं समाप्तिरिति चेत् न लाघवेनानुपूर्वीविशेषविशिष्टसकलपूर्ववर्णज्ञानोत्तरकालीनचरमज्ञानस्यैव समाप्तित्वात्। वर्णान्तरप्रागभावासमानकालीनत्वस्य कर्त्रोऽज्ञानेऽपि समाप्तेश्च। शाब्दस्य चरमत्वज्ञानसम्भवाच्च, अयं चरमो वर्णोऽस्त्विति गुर्वादिनिर्देशसम्भवात्। किञ्च समाप्तित्वव्याप्यजातेः कार्यतावच्छेदकतयाऽनुगतकारणकल्पनापत्तिः। न च मङ्गलमेव तथास्तीति वाच्यम् अन्योन्याश्रयात्। तथा जातिसिद्धौ मङ्गलस्य व्यभिचाराभावेन कारणत्वसिद्धिः कारणत्वसिद्धौ च तदन्यथानुपपत्त्या कार्यतावच्छेदकतया जातिकल्पनमिति। न च श्रौतकारणत्वान्यथानुपपत्त्या कार्यतावच्छेदकत्वेन जातिकल्पनमिति वाच्यम्। प्रत्यक्षत्वापत्त्या बाधकेन जातेरकल्पनया उपाधेरेव कल्पनात्। अपरञ्च यत्र चरमवर्णज्ञानमपरेण केनचिद्विषयेण समूहालम्बनं जातं

(सेतु०) तत्राऽव्याप्यवृत्तित्वान्न सा जातिरिति। तस्मादुपाधिरेव कश्चिद्विशेषतया समाप्तिकारणतानिर्वाहकतया कल्पनीयः। स च प्रायश्चित्ताद्यनाश्यविघ्नस्थलीयसमाप्तित्वमेव। न चैकमङ्गलाद्बहुविघ्न-स्थलीयसमाप्त्यापत्तिः एकमङ्गलेनैकविघ्ननाशेऽपि विघ्नान्तरसत्त्वेन समाप्त्यभावात् विघ्नध्वंसं प्रति च तत्तन्मङ्गलत्वेन जनकता इति नैकमङ्गलाद्बहुविघ्नध्वंसः। नच द्वारफलयोरेकरूपेणैव जनकता चाक्षु-षज्ञानं प्रति चक्षुष्ट्वेन घटसंयोगं प्रति द्रव्यत्वेन चक्षुषो जनकत्वात्। तस्मात्कारणान्तरविलम्बेन फलविलम्बो न कारणतापरिपन्थीति मङ्गलत्वेनैव कारणतेति वस्तुगतिः।

केचित्तु मङ्गलेतरानाश्यविघ्नस्थलीयसमाप्तित्वेन कार्यता ता-दृशविघ्नान्यूनसंख्याकमङ्गलत्वेन कारणतेति नैकमङ्गलस्थले बहु-विघ्नस्थलीयसमाप्त्यापत्तिरित्याहुः।

तन्न गौरवग्रस्तमेव विघ्नध्वंसस्थले तत्तन्मङ्गलत्वेन तत्त-द्विघ्नध्वंसत्वेन कार्यकारणभावस्य तेऽपि वाच्यत्वात्। एक-मङ्गलाद्बहुविघ्ननाशात्। एवं श्रुतिसिद्धकारणत्वान्यथानुप-पत्त्या कार्यतावच्छेदककल्पनं सिद्धम्। चिरविनष्टस्य मङ्गलस्य कालान्तरभाविसमाप्तिलक्षणफलजनकत्वान्यथानुपपत्त्या व्यापा-रोऽपि कल्पनीयः। स चापूर्वस्य भावतया लघुत्वेऽपि विघ्नध्वंस एव तस्य यदनिष्टज्ञाने सति यत् क्रियते तदनि-ष्टध्वंसस्तत्साध्य इति व्याप्त्या प्रामाणिकत्वात्। न चान्यत्र-क्लृप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तत्सहभूतत्वेनान्यथासि-सिद्धिः मङ्गलस्यापि श्रुतिसिद्धतया प्रामाणिकतया तत एव कार्य-सम्भावनाया असम्भवात्। तस्मान्मङ्गलस्य समाप्तिसाधनत्वमि-ति प्राचामाचार्याणां वाच उपचितार्था एवेति सिद्धम्।

अत्र तत्त्वम्(१)। न तावदुदाहृता श्रुतिः श्रुतिपदार्थं प्रमादादपि पदा परामृशति किन्तु कल्पनाक्रोडमेवाध्यास्ते। कल्पना तु लाघवम-वलम्ब्य तिष्ठति। लाघवन्तु "विघ्नध्वंसकामो मङ्गलमाचरेदिति" श्रुते-रेवाश्रयणे विघ्नध्वंसमात्रफलकत्वात् तच्छ्रुतौ तु फलद्वयं समायाति विघ्नध्वंससमाप्त्योरुभयोर्जन्यत्वात्। ननु कामनानुरोधिनी श्रुतिः कामना च समाप्यतामित्याकारा तथाच लाघवानुरोधमुल्लङ्घ्य काम-

(१) नव्यानामित्यर्थः।

(सेतु०) नामेव श्रुतिरनुसरतीति चेन्न कामनानामनेकपथप्रवृत्तत्वेन तदनुसरणस्याशाक्यत्वात् । तथाहि-केचित्समाप्यतामिति कामनया मङ्गलमाचरन्ति, परे निर्विघ्नं समाप्यतामित्यनया, अन्ये विघ्नो माभूदिति प्रागभावविषयिण्या,इतरे विघ्नो नश्यतु इति ध्वंसावगाहिन्या। तत्र पथप्रवृत्तचतुर्विधकामनामनुसरन्त्येका श्रुतिर्दुस्थतामेवासादयेत् । योगिनामिव श्रुतिकायनिकायकल्पने तु प्रमाणाभाव इत्येककामनानुरोधिनी काचिदेका श्रुतिराकल्पनीया । तत्र च यस्यां लाघवं सैवागमिष्यति न तु गौरवग्रस्ता । लाघवञ्च विघ्नध्वंसफलकत्वबोधिकायामेव एकफलकत्वात् । विघ्नप्रागभावस्यापि विघ्नकारणविनाशेन साध्यत्वात् । नच मङ्गलाभावस्य विघ्नकारणत्वान्मङ्गलादाहत्यैव विघ्नप्रागभाव इति वाच्यम् प्रतिबन्धकाभावस्य संसर्गाभावत्वेन कारणतया मङ्गलनाशानन्तरं झटिति विघ्नोत्पत्त्यापत्तेः । विघ्नकारणविनाशे तु यावन्न तत्सजातीयं कारणान्तरं मिलति तावद्विघ्नप्रागभावरक्षा युज्यते । नच तन्मङ्गलप्रागभावत्वेन तद्विघ्नकारणत्वात्तस्य च मङ्गलोत्पत्त्या नष्टत्वादविघ्न एव विघ्नप्रागभावसद्भाव इति वाच्यम् तथासति तन्मङ्गलप्रागभावस्य दुर्मिलतया तद्विघ्नप्रागभावस्यासत्त्वापत्तेः । तस्माल्लाघवेन विघ्नध्वंसजनकताबोधिकैव श्रुतिरुन्नीयत इति ।

वस्तुतस्तु प्रवर्तकमिष्टसाधनताज्ञानं गौरवात्, तृप्त्यर्थिनस्तण्डुलक्रये प्रवृत्त्यनापत्तेश्च। किन्त्विष्टप्रयोजकताज्ञानम्, एवञ्च विध्यर्थोपीष्टप्रयोजकत्वमेव तथाच समाप्तिकामो मङ्गलमाचरेदिति विधिपक्षेपि समाप्तिप्रयोजकत्वं मङ्गलस्य लभ्यते नतु जनकत्वम्, तत्तु तज्जनकविघ्नध्वंसजनकत्वेनाप्युपपद्यते । यागादौ का वार्तेति चेन्न तत्रापि श्रुत्या प्रयोजकत्वमेव बोध्यते।जनकत्वलाभः कथमिति चेन्न श्रुत्या बोधितस्य नियतपूर्ववर्तित्वस्यान्यथासिद्ध्यभावे कारणतायामेव पर्यवसानात् । नहि यागेऽन्यत्रक्लृप्तेत्यादिरन्यथासिद्धिः अन्यत्र क्लृप्तगङ्गास्नानादेर्यागजन्यस्वर्गस्थलेऽसम्भवात् । मङ्गलस्य तु न कारणत्वसिद्धिः अन्यत्र क्लृप्तस्य विघ्नसंसर्गाभावादेः सम्भवादन्यथासिद्धत्वादिति ।

परमार्थतस्तु नात्र श्रुतिः कारणताग्राहिका आनुपूर्वीविशेषास्फुरणात् । घटमानयानय घटमित्यादौ व्यभिचारेण पदानुपूर्व्या

(सेतु०) हेतुत्वे निघटमानयेत्यतः शाब्दबोधादर्शनेन वर्णानुपूर्व्या हेतुत्वात्। आनुपूर्वीविशेषस्यैव सम्बन्धितावच्छेदकत्वेन तेन रूपेणोपस्थितिं विना पदार्थास्मारकत्वाच्च, प्रमेयत्वादिना हस्तिज्ञानस्य हस्तिपकास्मारकत्वात्। न च कुशमानयेत्यत्र सकारशकारसन्देहे आनुपूर्वीज्ञानस्य कारणत्वात् कथं शाब्दबोध इति वाच्यम् तत्र शाब्दबोधाभावात्। यस्तु कस्यचित्कस्यचिद्बोधो जायते सोऽनुमानादिप्रभवः एवं हस्तकरसन्देहेऽपि। न च तदर्थज्ञापकत्वेनैव ज्ञातात्पदार्थोपस्थितौ शाब्दबोधः वृत्त्या पदोपस्थाप्यस्यैव शाब्दबोधविषयत्वात्। अन्यथा घटोऽस्तीत्यत्राकाशोऽस्तीति बोधापत्तेः आधाराधेयभावसम्बन्धेनाकाशस्मरणसम्भवात्। न चात्र मङ्गलादिपदानां नियतानामेव प्रवेशात् कथं वर्णानुपूर्व्यज्ञानमिति वाच्यम् मङ्गलपदस्य नियतस्य प्रवेशेऽपि कुर्यादाचरेदित्यादीनां बहुविधत्वात्। तत्रापि नमस्कारादिपदैर्बाहुल्यसम्भवाच्च। किन्त्वनुमानं तच्च-मङ्गलं विघ्नध्वंसजनकं तदन्यष्टाजनकत्वे सतीष्टजनकत्वात् इत्याकारकमेव नतु समाप्तिजनकमित्याकारकम्। (१)तत्र विघ्नध्वंसस्यापि जनने हेतोरसिद्धेः। किञ्च मङ्गलं सफलं शिष्टाचारविषयत्वादित्यनुमानेनैव लाघवसहकारेण फलविशेषोपस्थितिः। लाघवं च विघ्नध्वंसजनकत्व एवेत्युक्तमेव। तथा च स्वतन्त्रानुमानेनापि यदि विशेषतः फलम् सिसाधयिषितं तदा तदनुरुद्धमेव साधनीयमविरोधात्। अपि च परिशेषानुमानेन समाप्तिफलकत्वसाधनोद्यनेनाधिकाररूपकामनाविषयसमाप्तीतरफलाजनकत्वे सतीत्यादिर्हेतुर्वाच्यः, अन्यथा प्रागुक्तनयेनासिद्धेः अयमपि च कामनाद्दष्टदर्शिनः सन्दिग्धासिद्ध एव कामनाधिकार इत्यनिर्णयात्। न च समाप्तिजनकसम्भावनया भवदीयोऽपि हेतुरसिद्धः गौरवेण तत्फलत्वनिरासात्। समाप्तिफलकत्वं साधयित्वा विघ्नध्वंसफलकत्वस्य निराकर्तुमशक्यत्वात्। अधिकारत्वनिश्चयोऽपि विघ्नध्वंसकामनायामेव लाघवात् न तु समाप्त्यादिकामनायां गौरवात्। नच विघ्नध्वंसकामनया अधिकारे तां क्रियमाणस्य मङ्गलस्यापवर्गस्य कामनया क्रियमाणस्य योगस्येवानधिकृतकर्तृत्वेन निष्फलत्वापत्त्या समाप्त्यनापत्तिरिति वादैरेव समाप्त्युपपत्तेः। तस्य

(१) समाप्तिजनकानुमान इत्यर्थः।

(सेतु०) चैतावत्प्रतिसन्धानं नास्ति। तस्येश्वरनानात्वावगाहिनीव जायमानापि समाप्तिफलकत्वगोचरानुमितिरप्रमा विषयबाधात् इति नागरिकमनोनुसारी पन्थाः।

ग्राम्यास्तु मङ्गलत्वं सत्ताजातिमत्त्वे सति विघ्नान्यत्वे सति विघ्नोत्सारणासाधारणकारणत्वम्। अत्र स्वस्वत्वध्वंसात्मकसुवर्णदानेऽतिव्याप्तिवारणाय विघ्नान्यत्वे सति सत्ताजातिमत्त्वे सतीति वा। प्रतियोगिनः स्वध्वंसं प्रत्यसाधारणतया तत्राव्याप्तिवारणाय सतीति। कालादावतिव्याप्तिवारणाय असाधारणेति। अवग्रहनिवृत्त्यसाधारणकारणे कारीर्यामतिव्याप्तिवारणाय विघ्नेति। विघ्नत्वं च दुरिताधारपुरुषप्रारिप्सितप्रतिबन्धकदुरितत्वम्। अवग्रहप्रतिबध्या वृष्टिस्तु न दुरिताधारपुरुषप्रारिप्सिता किन्त्विष्टैव। येषान्तु प्रारिप्सिता देवानां न ते दुरिताधारा इति। एवंलक्षणे सुवर्णेऽतिव्याप्तिः सुवर्णतद्दानयोरपि विनिगमनाविरहेण हेतुत्वात् तथा च तत्रातिव्याप्तिवारणायासाधारणपदेन नानाफलकामनया श्रुताभिन्नत्वस्यावश्यवक्तव्यतया तत एव सुवर्णदानस्यापि वारणम् सत्ताजातिमत्त्वे सतीति विशेषणरहितमेव लक्षणमिति।

मङ्गलत्वन्तु जातिर्न भवत्येव संयोगत्वादिना सङ्करात्। संयोगस्य घटपटसंयोगेन मङ्गलत्वपरिहारेण सत्त्वेन मङ्गलत्वस्य च शाब्दात्मिकायां स्तुतौ संयोगत्वपरिहारेण सत्त्वेन करशिरस्संयोगात्मके कायिके द्विनयसत्त्वेन साङ्कर्यस्य स्फुटत्वात्। नचानेन मङ्गलत्वेन समाप्तिकारणत्वमवच्छेत्तुं शक्यते अन्यं प्रति पूर्ववर्तित्वे गृहीते यत्रान्यं प्रति पूर्ववर्तिता गृह्यते तदन्यथासिद्धमित्यन्यथासिद्धेः अन्यथाकाशस्य घटकारणतापत्तेः। तदकारणतायामाकाशत्वस्य शब्दसमवायिकारणत्वरूपतया शब्दपूर्ववर्तित्वे गृहीते घटादिपूर्ववर्तित्वं गृह्यत इत्यन्यथासिद्धिरेव बीजम्। सा च प्रकृतेऽपि प्रक्रान्तपराक्रमैव विघ्नध्वंसकारणत्वपरिच्छेदोत्तरं समाप्तिं प्रति मङ्गलपूर्ववर्तित्वग्रहात्। ननु मास्तु मङ्गलत्वेन कारणता स्तुतित्वनमस्का(१)रादिनैव भविष्यति तत्र विघ्नध्वंसकारणत्वाप्रवेशात्। गुण-

(१) (श्री०) नघु चायुक्तमेतत्। सत्यपि नमस्कारे कारम्बर्यादौ शास्त्रपरिसमाप्तेरदर्शनात्

(सेतु०)वक्तया ज्ञानजनकशब्दस्य स्तुतित्वात्। कृष्णायेति वाचनिके नमस्कारेऽतिव्याप्तिवारणाय गुणवत्तयेति। गुणानाञ्च चेतने उत्कृष्टशब्दप्रवृत्तित्वेनानुगमः अतो न शौर्यादीनामननुगमेनाननुगमः। चेतनमिति विशेषणाच्च शर्करारसो मधुर इत्यादेः स्तुतित्वम्। नमस्कारत्वमपि स्वापकर्षबोधानुकूलतावच्छेदकजातिमत्त्वम्। यद्यपि स्तुत्यपेक्षया स्तोतुरपकर्षः प्रतीयत एव तथापि तत्र न जातिरवच्छेदिका स्तुतित्वस्य जातिसङ्कर्यभयेनोपाधित्वात्। त्वं पण्डित इत्यत्र द्वितयसत्त्वात्, ननु नमस्कारत्वमपि न जातिर्घटपटसंयोगवाचनिकपरिहारेण सतोः संयोगत्वनमस्कारत्वयोरेकत्र कायिके समानाधिकरणत्वात्। तथा च कथं जातिगर्भनमस्कारलक्षणमिति चेन्न कायिकत्वादिजातीरादाय लक्षणनिर्वाहात्। ननु कायिकत्वमपि न जातिः कायिकत्वस्योभयकर्मजन्यसंयोगे सत्त्वेन तत्रान्यतरकर्मजन्यतावच्छेदकजातिविरहादन्यतरकर्मजन्यतावच्छेदकजातेः स्थाणुश्येनसंयोगे सत्त्वेन तत्र कायिकत्वाभावादन्यतरकर्मजन्ये कायिके द्वितयसत्त्वात् सङ्करादिति चेन्न अन्यतरकर्मादिजन्यतावच्छेदकजातिविरहेण तामादाय सङ्कराभावात्। ननु वाचनिकत्वं न जातिः महत्त्वस्य महादेवेत्यत्र सत्त्वेन वाचनिकत्वाभावाद्वाचनिकत्वस्य नतिरित्यत्र सत्त्वेन महत्त्वाभावात् नम इत्यत्र द्वितयसत्त्वादिति चेत् नामत्वादिव्याप्यनानावाचनिकत्वस्वीकारात्। ननु मानसिकत्वं न जातिः कृष्णादहमपकृष्टो घटश्चेति समूहालम्बनेऽव्याप्यवृत्तित्वापत्तेरिति चेन्न समूहालम्बनस्य मानसिकत्वानङ्गीकारात्, अव्याप्यवृत्तिजातिस्वीकाराद्वा, अत एव संशयत्वं जातिरित्येकदेशिनः। मानसिकत्वं द्वि-

---

प्रमाणतोऽर्थप्रतिपत्तौ इत्येवमादौ सूत्रे शास्त्रपरिसमाप्तिः कार्यत्वादवश्यं कारणं वाच्यम् अन्यासम्भवात् धर्मविशेषः कारणमिति। स च नमस्कारादन्यतो भवत्वित्येके। अन्येतु साधनविशेषाद्विशिष्यत इति नमस्कारादेवोपजायते धर्मविशेषः कारणमिति। अथ नमस्काराभावे तर्हि कथं शास्त्रसमाप्तिरिति, न तत्र कार्यसद्भावेन कारणसद्भावसिद्धेः। वाचिकनमस्काराभावेपि मानसो ज्ञायत इति। एकदा हि विशिष्टनमस्कारसद्भावे परिसमाप्तेरुपलम्भादिति। तथाहि मानसनमस्कारोपचितो वाचिकनमस्कारः समाप्तेः कारणमिष्यते मानसस्तु केवलोपीति। अत एव क्वाचित्कवाचिकसद्भावेपि मानसाभावादपरिसमाप्तिर्युक्तेति। तदभावः कार्यानुत्पादेनैव ज्ञायत इति। नमस्काराच्च धर्मः संपद्यते इति आगमाद्यभिग्रहणं तथा लौकिकोपि पुरुषः कृतनमस्क्रियः क्रियाकरणे वर्तमानो दृष्टः किम्पुनर्भगवान्मुनिरनवद्यवादीति प्राचीनाः।

(सेतु०) विघ्नं मत्तः कृष्ण उत्कृष्ट इत्येकं कृष्णादहमपकृष्ट इत्यपरमिति चेन्न स्तुतिनमस्कारयोरपि विघ्नध्वंसकारणत्वप्रवेशस्यावश्यकत्वात्, अमङ्गलीभूतस्तुतिनमस्कारवारणस्यावश्यकत्वात्। न हि बन्दिकर्तृकराजादिस्तुतिरपि मङ्गलम्, तस्या राज्ञस्तोषादिपोषकत्वेऽपि विघ्नध्वंससमाप्त्योरपर्याप्तत्वात्। कर्मानारम्भे क्रियमाणो नमस्कारोऽपि मङ्गलं तेन सुकृतादिजननेऽपि विघ्नध्वंसस्याजननात्। निखिलपापपराभवप्रापिका परमेश्वरप्रणतिस्तदन्तर्गतनया विघ्नध्वंसत्वावच्छिन्नकार्यताकविघ्नध्वंसमर्जयति तथा च मङ्गलीभूतनुतिनत्योर्विघ्नध्वंसकारणत्वगर्भमेव लक्षणसर्वस्वमिति तत्राप्यन्यथासिद्धिरेवेति। अपि च मास्तु लक्षणे विघ्नध्वंसकारणत्वेन प्रवेशनान्यथासिद्धिरन्यथा तु भविष्यति स्तुतिलक्षणे ज्ञानपूर्ववर्तित्वप्रवेशात् नमस्कारलक्षणेऽपि तत्प्रवेशात् अनुकूलतायां जनकताप्रयोजकतान्यतररूपत्वात् प्रयोजकतायामपि पूर्ववर्तित्वप्रवेशात्। ननु विघ्नध्वंसकारणतापि कथं तत्तन्मङ्गलत्वेनात्माश्रयात् इति चेन्न तत्तद्व्यक्तित्वेन कारणत्वादिति वदन्ति। तदवद्यम्। एवं हि दण्डस्यापि कारणताभङ्गापत्तेः। तत्रापि मृदुदण्डवारणाय दृढदण्डत्वेन कारणत्वस्य वाच्यत्वात्। दार्ढ्यस्य भ्रमिजनकत्वादन्यस्य वक्तुमशक्यत्वात्। ननु स्पर्शविशेषोऽवयवसंयोगगर्भो विशेषो दार्ढ्यं न तु भ्रमिजनकत्वमिति चेन्न तथाभूतादपि घुणाघातादिविप्लुताद्भृशं कृशताक्लिष्टशरीराद्वा दण्डाद् घटानुत्पत्तेस्तस्यापि वारणीयत्वात्। वस्तुतस्तु दृढदण्डत्वेन कारणत्वमिति बालप्रलाप एव। दण्डत्वं हि न वेणुदण्डगता जातिः काष्ठशकलादपि तत्स्थलाभिषिक्तात् क्वचिद्घटोत्पत्तेः कर्मकरणकर्कशात्कुलालकरादपि चक्रक्रियादर्शनाच्च तस्माद्भ्रमिजनकत्वमेव दण्डत्वम्। एवञ्च दार्ढ्यस्य पृथग्विशेषणत्वमदृढ एव तथा च प्रकृतेऽपि भ्रमिपूर्ववर्तित्वग्रहानन्तरं घटपूर्ववर्तित्वग्रहादन्यथासिद्धिः स्यादेव। यदि च प्रकृतकार्याजनकमन्यं प्रतीत्यादिविवक्षया तत्रान्यथासिद्धिप्रतिषेधस्तदा प्रकृतेऽपि कथम्? भ्रमेर्घटम्प्रतीव विघ्नध्वंसस्य समाप्तिं प्रति जनकत्वात् तस्मात्पूर्वोक्तयैव रीत्या समाप्तिकारणत्ववारणमिति रमणीयम्। दण्डमङ्गलयोः कुलालपितुरिवान्यथासिद्धिः कुतो न भवतीत्यादिस्तु विचारो ग्रन्थगौरवभयान्न सञ्चार्यते। ननु ग्रन्थ-

(सेतु०) मङ्गलयोः समाप्तिविघ्नध्वंसजनकत्वयोः द्वयोः प्रधानत्वेऽधिकारिकल्पनागौरवमिति चेन्न मङ्गलस्य समाप्तिकारणत्वेऽन्यथासिद्धेरुदाहृतत्वेनास्य प्रमाणपरिगृहीतत्वात् । यथा च समाप्तिकामो मङ्गलमाचरेदिति श्रुतिरपि न समाप्तिसाधनतां बोधयति तथोपदिष्टमेव । यत्तु मङ्गलमदृष्टद्वारा समाप्तिसाधनमिति केषाञ्चिन्मतं तदयोग्यमेव । विघ्नध्वंसस्य प्रतिबन्धकध्वंसतयाऽऽवश्यकत्वात् । तद्ध्वंसस्य च कस्यचिद्विहितस्यैव वक्तव्यत्वेनान्यकल्पनायां गौरवेण मङ्गलस्यैव वाच्यत्वात् । विघ्नध्वंसस्य कालान्तरीयत्वाभावेन तज्जनने मङ्गलेनादृष्टानपेक्षणात् । विघ्नरूपानिष्टज्ञाने सति मङ्गलाचरणेन विघ्नध्वंसस्य मङ्गलसाध्यत्वावश्यकत्वाच्च ।

इदन्त्ववधेयम् । कश्चिन्मङ्गलेनाप्यदृष्टं जन्यत एव अन्यथा नानावर्णात्मकश्रुतौ द्विक्षणस्थायिनां पूर्वपूर्ववर्णानां चरमवर्णेनामिलने कथं विघ्नध्वंसजनकत्वम् तथाचोपान्त्यान्त्यैराहत्यैव विघ्नध्वंसो जन्यते । अन्यैस्तु कलिकासुकृतानि(१) कृत्वेति मन्तव्यम् ।

वस्तुतस्तु गुणवत्तया ज्ञानजनकशब्दो न स्तुतिः मौनिस्तुतावव्याप्तेः । एवं वाचनिको नमस्कारोपि न शब्दात्मकः मौनिप्रतिसंहिते कृष्णाय नम इति शब्दे यत्र वाचनिकं भवति तत्राव्याप्तेः । न च मौनिनः स्तुतिवाचनिकौ नमस्कारौ न भवत एव व्यवहारविरोधात् किन्तु वर्णविशेषप्रतिसन्धानस्तुतिर्वाचनिको नमस्कारश्च वर्णात्मकाविति वाच्यम् अननुगमापत्तेः । एवन्तु पर्याप्तं वर्णानां समूहालम्बने नादृष्टम् ज्ञानभेदे तु केषांचिज्ज्ञानानां नाशे तत्राप्यदृष्टापेक्षत्यस्मदादिष्टमाश्रयणीयम् । विघ्नप्रागभावजनकत्वं तु मङ्गलस्य प्रागेव निरस्तम् । तथा च विघ्नसंसर्गाभावद्वारा समाप्तिसमर्पकत्वञ्च स्मरणपथमप्यवतारणीयमित्यवधारणीयमिति संक्षेपः ।

नन्वीश्वरपदस्य नित्यज्ञानादिमत्परत्वेऽर्थादेव हेतुत्वलाभे हेतुमित्यग्निरुष्ण इतिवदर्थपुनरुक्तमिति चेन्न ईश्वरं यथेष्टविनियोक्तारमित्यर्थात् वस्तुस्तुतिरियम् । न च स्तुतौ पौनरुक्त्यं दोषाय एकेन प्राप्तौ तन्निर्वाह इत्यवधेयम् । आचार्यचरणानामप्य-

(१) पञ्चसुकृतं कलिकासुकृतञ्चेति मीमांसकास्तत्र प्रथमं सफलं द्वितीयमफलम्भवतीति तदाशयः ।

(सेतु०) शैव तात्पर्यं न तु लिखिते पक्षत्रये। तथा हि हेतुपदं व्यर्थं सत्प्रमाणं सूचयति व्यर्थं सदिति न्यायात् इति प्रथमपक्षार्थः। न च स उपपद्यते स्तुतित्वेन व्यर्थत्वाभावात्। न च हेतुपदस्य सहजमेव प्रमाणसूचकत्वम् अन्यत्र तथाऽदर्शनात्। ईश्वरपदसन्निधिप्रयुक्तो वा हेतुशब्दो विशिष्ट एव श्रेयःसमधिगमनिमित्ते वर्तते इति द्वितीयः पक्षः, सोऽपि नोपपद्यते। यदीश्वरप्रयोगादेव प्राप्तार्थस्य हेतुपदस्य व्यर्थत्वात् मोक्षासाधारणत्वबोधकत्वम्, तत्र पूर्वमुक्तमेव स्तुतित्वेन वैयर्थ्याभावादिति। अथेश्वरपदसन्निहितहेतुशब्दत्वेन वाचकता मोक्षासाधारणत्वेन वाच्यतेति। तन्न, ईदृशि शक्तौ प्रमाणाभावात्। प्रकृतश्लोकातिरिक्तस्थले क्वापि तथा व्यवहाराभावात्। अत एव प्रस्तुतशास्त्रसाधारणमिति तृतीयपक्षोऽपि निरस्तः। वैयर्थ्यपुरस्कारशक्तिस्वीकारयोरसम्भवात्। लक्षणया तथार्थकल्पने समाधानान्तरसम्भवे लक्षणाकल्पनस्योपेक्षणीयत्वात्। तस्मात् किरणावलीकृतोपि मदुक्त एवाशय इति संक्षेपः। 'अनु' 'अतः'—इतिपदाभ्यां गुरुतमादिक्रमेण नमस्कार इति शिक्षा। न च शिष्टाचारादेव तत्प्राप्तिः अज्ञातॄन्प्रति शिष्टाचारस्यैव प्रदर्शनात् ज्ञातॄन्प्रति प्रमाणवत् निबन्धस्यापि व्यर्थत्वात्। एवञ्चान्वित्यस्यावश्यकत्वेऽतःपदमपि तथा शाब्दीति न्यायात्। प्रेक्षावदुपादानप्रयोजकं सङ्ग्रहस्य फलवत्त्वं महोदयपदेनाह महांस्तत्त्वविषयः।

व्योमशिवाचार्यकृता व्योमवती टीका(१)।

……प्रमितिविशिष्टानन्तर्यमोनिपादनाच्च तदभावनिरासः। स तच्छब्दोऽपि हेतौ वर्तमानो विशिष्टदेशकुलप्रसूतमविप्लुतेन ब्राह्मणेनाविप्लुतायां ब्राह्म……विप्लु……
देशावासिनाया दुपजातं शुश्रूषाश्रवणग्रहणधारणोहापोहतत्त्वाभिनिवेशतदन्तेवासिनमाहेति। तथा च साङ्ख्यतुरीयानाव……मुनते ब्राह्म……त्वं
लकमाजगाम। न ह वै सशरीरस्य प्रियाप्रिययोरपहतिरस्ति, अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत इति वाक्यादशरीरावस्था सुखदुःखमानिशं प्रतिपद्यते।……
पक्षामाददर्शनमानयत। तं च यथोपपन्नं भगवानधिकारिणं दृष्ट्वा समाधिबलादेकस्मिन्क्षणावुत्पन्नषट्पदार्थतत्त्वज्ञानो महेश्वरेण……सूत्रकरणे प्रवृत्तस्तदर्थसिद्धये सूत्रसन्दर्भस्य चातिसंक्षिप्तत्वा……वोदितया वास्मदादेस्तत्त्वज्ञानं न स्यादिति प्रशस्तपादसङ्क्षेपता।
……त्वादिवदप्रतिभासनादाधिकार्यभावः, तदसत्। उपदेशव्यङ्ग्यत्वात्। तथाहि—द्रव्यादिषु इव कर्ते समयस्य……आनुगत

(१) ग्रन्थारम्भे कृत्स्नव्योमवत्या अनुपलम्भाद्दिग्दर्शनरूपेण दत्तापीयं टीका काशीस्थराजकीयसरस्वतीभवनकृपया साकल्येनोपलब्धाऽतः परं यथोपलब्धा क्रमेण दीयत इति।

ज्ञानमि ………………………………………………………………………………………… आम्नायो-
यमिति ज्ञाने पश्चाद्बाधकानुपपत्तेः । प्रमाणतया शिष्टपदार्थाधिकारिसिद्धेर्निर्विषयत्वाच्च दोषः ।
निरभिधेयत्वम् अविद्धं द्रव्यादि ……………………………………………………………………
भावश्च निरस्त एव तदभिधानात् । तथाप्रयोजनोपन्यासात्तदभावश्चेति । अथ किं पुनश्च विज्ञानं
किं वा निःश्रेयसमिति वाच्यम् । अवस्थितपदार्थवि ………………………………………………
……………………………………………… नवानामात्मविशेषगुणानामत्यन्तोच्छित्तिर्न धर्मा-
र्थकामाः, तेषामल्पसाधनसाध्यत्वात् । अथ निःश्रेयसास्तित्वे किं प्रमाणम् । विष्णुचेतनमनु-
मानभाग ………………………………………………… व तथाहि—नवानामात्मविशेषगुणानां
सन्तानोऽत्यन्तमुच्छिद्यते सन्तानत्वाद्यो यः सन्तानः स सोऽत्यन्तमुच्छिद्यमानो दृष्टः, यथा प्रदीपस-
न्तानः, तथा चायं सन्तानस्तस्मात् ……………………………………………………………
……………………………………………… तमुच्छिद्यत इति । सन्तानत्वस्य च व्याप्त्या बुद्ध्यादिषु स-
म्भवात् । पक्षधर्मतयाऽसिद्धत्वाभावः । तत्समानधर्मिणि च प्रदीपादावुपलम्भात् अविरुद्धत्वं,
न च पक्षे परमाण्वादौ अस्तित्वं …………………………………………………………………
……………………………………………… मित्यनेनैकान्तिकत्वाभावः । विपरीतार्थोपस्थापकयोः प्र-
त्यक्षागमयोरनुपलम्भाच्च कालात्ययापदिष्टः । न चायं सत्प्रतिपक्ष इति पञ्चरूपत्वात् प्रमाणम् ।
अथ निर्हेतुकाविना ……………………………………………………………………………
…………………………………… प्राप्ति …………………………………………… वक्ष्यान्ता-
देरेव हेतुर्वाच्यः यतः समुच्छिद्यत इति । स तूक्त एव तत्त्वज्ञानं निःश्रेयसहेतुरिति निर्देशाच्च तत्त्वज्ञान-
म् अवशिष्टत्वाच्च प्रतिव्यक्त्यपेक्षं किं तु ……………………………………………………
…………………………………… इत्यादि लक्षणा ………………………… तथाहि । द्रव्यादिलक्षणल-
क्षितेषु उत्पद्यते तत्त्वज्ञानमिति । अथ तत्त्वज्ञानस्य निःश्रेयसकारणत्वे समुपजाततत्त्वज्ञानस्त्वन-
न्तरमेवापमृत्यं …………………………………………… मनस्यसम्भवे अस्मदादीनां तत्त्वज्ञाना-
नुपपत्तिः । अथ योगजधर्मादुपजाततत्त्वज्ञानोऽस्मदादेः तत्त्वज्ञानसम्पादनाय कणादः सूत्राणि करोती-
त्यवस्था …………………………………………………… इष्यत गतार्हतत्त्वज्ञान निःश्रेयसकारणे
सत्यप्यभावात् । नैष दोषः । विशिष्टतत्त्वज्ञानस्य निःश्रेयसकारणत्वाभ्युपगमात् । तथाहि—उपजातेऽपि
श्रौते तत्त्वज्ञानेऽस्मदादीनां ………………………………… निःश्रेयसं योगाभ्यासजनिततत्त्वज्ञानस्य
सम्भवात् । श्रौते हि तत्त्वज्ञाने समुत्पन्ने योगाभ्यासे प्रवृत्तस्याभ्यासवशादात्मन्यशेषविशेषालि-
ङ्गितेऽन्त्यन्तत्त्वज्ञानमुपजातं नि …………………………………………………… यसकारणमिति ।
तथा ह्युपलब्धं सम्यग्ज्ञानस्य मिथ्याज्ञाननिवृत्तौ सामर्थ्यम् शुक्तिकादाविति सम्यग्ज्ञानस्य ज्ञानान्तरवि-
रोधित्वादुत्तरकालभाविना मिथ्याज्ञानेनापि सम्यग्ज्ञानस्य विरोधः सम्भवत्येव यदि सा मनः सन्ता-
नोच्छित्तिर्विवक्षितेति । सम्यग्ज्ञानान्मिथ्याज्ञानस्य सन्तानोच्छेदः नैवं मिथ्याज्ञानात्सम्यग्ज्ञानस्येति ।
निवृत्ते च मिथ्याज्ञाने तन्मूलत्वाद्रागादयो नश्यन्ति कारणाभावे कार्यस्यानुत्पादादिति । रागाद्यभावे च
तत्कार्या प्रवृत्तिर्व्यावर्तते । तदभावे च धर्माधर्मयोरनुत्पत्तिः । आरब्धकार्ययोश्चोपभोगात् प्रक्षय इति ।

अथ सञ्चितयोर्विचारः । कथं तत्त्वज्ञानादेवेति । यथोक्तम्—

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुते क्षणात् । ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा(गी०)॥ इति ।

नन्पभोगादेव (१)प्रक्षय इत्यप्यागमोक्तम् । यथोक्तम्—

---

(१) 'क्षीयन्ते' इति खपुस्तके पाठः ।

नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि । अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम् ॥

तथा च (१)विरुद्धार्थत्वादुभयोः कथं प्रामाण्यमिति । भोगाच्च प्रक्षयेऽप्यनुमानमप्यस्ति—पूर्वकर्माण्युपभोगादेव क्षीयन्ते कर्मत्वात् । यद्यत्कर्म तत्तदुपभोगादेव क्षीयते । यथाऽऽरब्धशरीरं कर्म तथा चामूनि कर्माणि तस्मादुपभोगादेव क्षीयन्ते । उपभोगेन च प्रक्षये कर्मान्तरस्यावश्यंभावात् संसारानुच्छेदः । तदसत् । समाधिबलादुत्पन्नतत्त्वज्ञानो हि कर्मणा च सामर्थ्यं विदित्वा युगपच्छरीराणि निर्मायोपभोग..........................क इति । न च कर्मान्तरोत्पत्तिर्मिथ्याज्ञानजनितानुसन्धानाख्यस्य सहकारिणोऽभावात् । अथ मिथ्याज्ञानाभावेऽभिलाषस्याभावाद् भोगानुपपत्तिः । तत्रापभोगे विना हि कर्म...या अनुपपत्तेः । जानन्नपि तदर्थितया प्रवर्त्तत एव । वैद्योपदेशादातुरवदौषधावरणे ज्ञानमप्येवमशेषशरीरोत्पत्तिद्वारेणोपभोगात् । कर्मणां विनाशे व्यापारादग्नि..............................इति व्याख्येयं, न तु साक्षात् । न चैतद्वाच्यम्—तत्त्वज्ञानिनां कर्मविनाशस्तत्त्वज्ञानादितरेषां तु उपभोगादिति । ज्ञानेन कर्मविनाशे प्रसिद्धोदाहरणाभावात् । अन्ये तु मिथ्याज्ञानजनितसंस्कारस्य सहकारिणोऽभावात् विद्यमानान्यपि कर्माणि न जन्मान्तरे शरीरारम्भकाणि इति मन्यन्ते । अत्र च कार्यवस्तुनो नित्यत्वं स्यादिति दूषणम् । अथानागतयोर्धर्माधर्मयोरुत्पत्तिप्रतिषेधे तत्त्वज्ञानिनो नित्यनैमित्तिकानुष्ठानं तर्हि कथम् ? प्रत्यवायपरिहारार्थं, तथाहि—

> नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम् ।
> ज्ञानं च विमलीकुर्वन्नभ्यासेन तु पाचयेत् ॥
> अभ्यासात्पक्वविज्ञानः कैवल्यं लभते नरः ॥ इति ।

केवलं तु काम्ये निषिद्धे च प्रवृत्तिप्रतिषेध इति । यदि वा तत्त्वज्ञानिनो नित्यनैमित्तिकानुष्ठाने न निवर्तते धर्मोत्पत्तिस्तथैवाभिसन्धानात् । तत्फलसंन्यासो वा । तथाहि सर्वकर्मणां परमगुरावर्पणमिति श्रूयते । न वा प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्येत्यलम् । अथास्तु तत्त्वज्ञानं निःश्रेयसकारणम् । अवधारणन्तु निषिध्यते । संन्यासादिक्रियायाश्च मोक्षहेतुत्वेन श्रवणात् । तथाहि—

> संन्यस्यन्तं द्विजं दृष्ट्वा स्थानाच्चलति भास्करः । मम मण्डलं भित्त्वा प्रयाता लोकमक्षयम् ॥
> द्वावेतौ पुरुषौ लोके सूर्यमण्डलभेदिनौ । परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः ॥

इत्याद्युक्तम् । सत्यम् । संन्यासादिक्रियायाः सूर्यमण्डलभेदित्वेनोर्ध्वगमनहेतुत्वमिष्यत एव । यदि नाम 'लोकमक्षयम्' इत्यभिधानादक्षयत्वमधस्तनलोकापेक्षया क्रियान्तरफलापेक्षया वा द्रष्टव्यम् । तथाहि संन्यासादिलक्षणाक्रिया भौतिकान्यक्रियापेक्षया प्रधानभूतेति । न स नवानामात्मविशेषगुणानामत्यन्तोच्छित्तिर्निःश्रेयसं सूर्यमण्डलभेदित्वेन भवतीति, तस्य विशेषगुणवियुक्तात्मरूपतया सर्वत्र भावात् । अत एव न तत्त्वज्ञानकार्यत्वादनित्यत्वमिति वाच्यम्, विशेषगुणोच्छेदस्य प्रध्वंसरूपत्वात् । तदुपलक्षितात्मन एव नित्यत्वादिति कार्यवस्तुनश्चानित्यत्वमिति । न च बुद्ध्यादिनाशे गुणिनस्तथाभावस्तादात्म्यप्रतिषेधस्य वक्ष्यमाणत्वात् । अथ मोक्षावस्थायां चैतन्यस्याप्युच्छेदान्न कृतबुद्धयः प्रवर्तेन्त इति आनन्दरूपो मोक्ष इष्यतामिति मनुषे । यथोक्तम्—आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते इति । तथा 'सुखमहमस्वाप्सम्' इति सुषुप्तावस्थोत्तरकालं स्मरणान्यथानुपपत्त्याऽनुभवो ज्ञायते । तत्र चाभिधानानुमानयोर्व्यापारोऽनुपलब्धो बाह्येन्द्रियाणां चेत्यन्तःकरणस्य व्यापारो ज्ञायते इति मानसं प्रत्यक्षम् । अनुमानं चात्मा सुखस्वभावोऽत्यन्तं प्रियबुद्धिविषयत्वात् अनन्यपरतयोपादीयमानत्वाच्च, यदेवंविधं तत्तत्सुखस्वभावं यथा वैषयिकं सुखम्, तथा चात्मैवंविधः तस्मात्सुखस्वभाव इति । तदेतदसत् बाधकोपपत्तेः । तथाहि तस्यानित्यतायामुत्पत्तिकारणं वाच्यम् । न च मोक्षावस्थायामात्मा-

(१) 'विरुद्धवाचित्वादु' इति खपुस्तके ।

न्तःकरणसम्बन्धः शरीरसम्बन्धापेक्षः सम्भवति शरीरादेरभावात् । न चासमवायिकारणं विना वस्तूत्पत्तिर्दृष्टा । अथ नित्यं तत्सुखमिति चेत् अज्ञातसम्वेदनं तु यदि नित्यं मुक्तावस्थायामिव संसारावस्थायामपि भावादविशेषप्रसङ्गः । स्मरणानुपपत्तिश्चानुभवस्यैवावस्थानात् । संस्कारानुपपत्तिश्चानुभवस्य निरतिशयत्वात् । अथ संसारावस्थायां बाल्यविषयव्यासङ्गात्क्लिश्यमानस्याप्यनुभवस्यासम्वेदनम् । तदभावाच्च मोक्षावस्थायां वेदनमित्यस्ति विशेषः । तदसत् । नित्यसुखे ह्यनुभवस्यापि नित्यत्वाद्व्यासङ्गानुपपत्तिः । तथा ह्यात्मनो रूपादिविषयकज्ञानोत्पत्तौ विषयान्तरे ज्ञानानुत्पत्तिर्व्यासङ्गः । एवम् इन्द्रियस्यापि एकस्मिन्विषये ज्ञानजनकत्वेन प्रवृत्तस्य विषयान्तरे ज्ञानाजनकत्वं व्यासङ्गः । न चैवमात्मनो रूपादिविषयकज्ञानोत्पत्तौ नित्यसुखे ज्ञानानुपपत्तिः, तज्ज्ञानस्यापि नित्यत्वात् । न च शरीरादिना प्रतिबध्यत्वादसंवेदनमिति वाच्यम्, नित्यत्वादेव । तथाहि प्रतिबन्धकं कार्यव्याघातकृदुच्यते । न च नित्यसुखज्ञानस्य अनुत्पत्तिः सम्भवति । तथोपभोगार्थत्वाच्च शरीरादेः भोगप्रतिबन्धकत्वानुपपत्तिः । यद्यदर्थं तत्तस्यैव प्रतिबन्धकमिति नोपलब्धम् । प्रतिबन्धकत्वेन तदपहन्तुर्हिंसाफलं न स्यात् । तथाहि प्रतिबन्धविघातक उपकारक एवेति दृष्टम् । न हि नित्यसुखसंवेदनस्य प्रतिबन्धकस्य शरीरादेः अपहन्तुर्हिंसाफलस्य अभाव इत्यलम् । अथानित्यं तत्संवेदनमिति चेत् । न उत्पत्तिकारणाभावात् । अथ योगजधर्मापेक्षः पुरुषान्तःकरणसंयोगोऽसमवायिकारणमिति चेत् । न, योगजधर्मस्यापि अनित्यतया विनाशे अपेक्षाकारणाभावात् । अथाऽऽद्ययोगजधर्मादुपजातं विज्ञानमपेक्ष्य उत्तरं विज्ञानं तस्माच्चोत्तरम् इति सन्तानम् । तन्न, प्रमाणाभावात् । तथा च शरीरसम्बन्धानपेक्षं विज्ञानमेव आत्मान्तःकरणसंयोगस्य अपेक्षाकारणमिति न दृष्टम् । न च दृष्टाद्विपरीतं शक्यते ह्यनुज्ञातुं आकस्मिकन्तु कार्यं न भवत्येव । अत एव नित्यसुखज्ञानस्य अभावात् 'सुखेनाहमस्वाप्सम्' इति ज्ञानं नेदं स्मरणं, किन्तर्हि दुःखकारणाननुस्मरणाभावेन तदभावानुमितिज्ञानमेतत् सुखेनाहमस्वाप्समिति । विपर्ययो वा नित्यसुखदुःखेनाहमस्वाप्समिति विस्मरणात् नित्यदुःखमपि स्यात् । अथ सुषुप्त्यवस्थान्तराले दुःखकारणासंवेदनाद् दुःखेनाहमस्वाप्समिति ज्ञानमेतत् । एवं तर्हि तदभावात्सुखेन अहमिति भविष्यतीति । अथागमः तर्हि कथम् 'आनन्दं ब्रह्मणो रूपम्' इत्यादि । मुख्ये हि बाधकोपपत्तेः गौण इति । तथाहि दुःखाभावेऽप्यानन्दशब्दः प्रयुक्तः दृष्टः, सुखशब्दो दुःखाभावे यथा भाराक्रान्तस्य बाहिकस्य तदपाय इति । यच्चानुमानमात्मा सुखस्वभाव इति । तत्र यदि सुखस्वभावत्वं जातिसम्बन्धित्वं, तत्र आत्मनि सम्भाव्येत गुण एवोपलम्भात् । न ह्येकाहङ्कारादिवदपरा जातिः द्रव्यगुणयोः साधारणोपलब्धेति । अथ सुखाधिकरणत्वम् । तत्रास्ति, नित्यानित्यत्वविकल्पानुपपत्तेः । तथा सुखत्वाधिकरणत्वे सुखाधिकरणतायां वा तज्ज्ञानस्य नित्यानित्यत्वविकल्पः । ....साधनं चात्यन्तप्रियबुद्धिविषयमनन्यपरतयोपादीयमानत्वञ्च अनैकान्तादसाधनम् दुःखाभावेऽपि भावात् । अनन्यपरतयोपादीयमानत्वं चासिद्धम् सुखार्थमुपादानात् । तथाऽत्यन्तप्रियबुद्धिविषयत्वमप्यसिद्धम् दुःखितायामप्रियबुद्धेरपि भावात् । इत्यनुमानद्वयमप्रमाणम् । यदि च मोक्षावस्थायां नित्यं सुखमस्तीत्यभिलाषेण प्रवर्तेत न मुक्तः स्यात्, रागस्य बन्धनरूपत्वात् । अथ दुःखादिकमुच्छेदयामीति द्वेषादपि प्रवर्तमानस्य तदेव दूषणम् । नानुकूलत्वात् । तथा च प्रतिकूलस्य अदोषस्य प्रतिषेधस्य तद्रागेऽपि समानमित्यदूषणमेतत् इत्यन्यदूषणम् । अथ सर्वगुणोच्छेदाद्वरं वैषयिकं सुखं दुःखसाधनपरिहारेण भोक्तव्यमिति मन्यसे । तन्न, तस्य दुःखानुषङ्गेण दुःखरूपतया हेयत्वात् । येषां चैतदुपादेयं न तान्प्रतीदमर्थवच्छास्त्रम् । सन्ति च वैषयिकसुखद्वेषिणः पुरुषाः । तान्प्रतीदं शास्त्रम् । ते च यदुपदेशमपेक्षन्ते नोपायान्तरादेतदर्थं प्रतिपद्यानुष्ठाने प्रवर्तन्ते इति । मोक्षास्तित्वे च प्रमाणोपपत्तेः । शेषं वचनमात्रमित्युपेक्ष्यते । अन्ये

त्वन्यथाभूतादेव साधनात् अन्यथाभूतं मोक्षं मन्यन्ते । यथोक्तम्—गुणपुरुषान्तरविवेकदर्शनं (१)निःश्रेयससाधनमिति । तथाहि पुरुषार्थेन हेतुना प्रधानं प्रवर्तते । पुरुषार्थश्च द्वेधा—शब्दाद्युपलब्धिः गुणपुरुषान्तरविवेकदर्शनं च । सम्पन्ने हि पुरुषार्थे चरितार्थत्वात् न प्रधानम् शरीरादिभावेन परिणमत इति द्रष्टुः स्वस्वरूपेण अवस्थानं भवतीति, विज्ञानं वा दुष्टतया कुट्टिनीस्त्रीवत् भोगसंपादनाय पुरुषं नोपसर्पतीति । तदेतत् सर्वमसत् प्रधानासत्त्वस्य वक्ष्यमाणत्वात् । स्थिते हि प्रधानसद्भावे पुरुषस्य तद्विवेकदर्शनमुपपद्यते । उपेत्य वा ब्रूमः । यदि प्रधानं पुरुषस्य निमित्तमनपेक्ष्य प्रवर्तते मुक्तात्मन्यपि शरीरादिसम्पादनाय प्रवर्तेत अविशेषात् । अथादर्शनापेक्षमिति चेत् । यस्य हि गुणपुरुषान्तरविवेकदर्शनानुपपत्तिः तं प्रति प्रधानं प्रवर्तते, न चासौ मुक्तात्मनीति । तन्न, मुक्तात्मन्यपि विवेकदर्शनस्य विनाशेन प्रवृत्तिप्रसङ्गात् । न चानुत्पत्तिविनाशयोः अदर्शनत्वेन विशेषं पश्यामः । अथादृष्टापेक्षं प्रवर्तत इति चेत् । तदसत्, तस्यापि प्रधाने शक्तिरूपतया व्यवस्थितस्य उभयत्राविशेषात् । तथा शरीरादिवैचित्र्याभावस्य तस्यैकरूपत्वात् । न च परिणामवैचित्र्यात् शरीरादिवैचित्र्यम् । तद्वैचित्र्ये कारणाभावात् । कथं च साम्येनावस्थितं तत्प्रधानं वैषम्यमवाप्नुयात् । पुरुषार्थस्य प्रवृत्तिहेतोरभावात् । सद्भावे वा पुरुषार्थस्य तदर्था प्रवृत्तिर्न भवेत् वियमानत्वादेव । न च प्रवृत्तिहेतुं विना कर्मप्रवर्तमानस्योपरमो युक्तो हेत्वभावात् । यच्चेदं—द्रष्टुः स्वस्वरूपेणावस्थानमित्युक्तम् । तदिष्यत एव, विशेषगुणरहितस्य अवस्थानाभ्युपगमात् । अथ चिद्रूपस्य अवस्थानं तत्रास्त्यनित्यत्वेन चिद्रूपताया विनाशात् । न च अक्षायन्वयव्यतिरेकानुविधायिनः चैतन्यस्य नित्यत्वे प्रमाणमस्ति । आत्मरूपमिति चेत् । तस्याश्च आत्मतादात्म्ये पर्य्यायमात्रे व्यतिरेके तु संयोगादिभिरनैकान्त्यम् । गुणगुणिनोश्च तादात्म्यप्रतिषेधं वक्ष्यामः । यच्चेदं—दुष्टतया विज्ञानं तु पुरुषं नोपसर्पति इति । असदेतत्, अचेतनत्वात् । तथाहि अचेतनतया प्रधानस्य अहमनेन द्रष्टृतया विज्ञातमिति विज्ञानाभावे पूर्ववत् प्रवृत्तिरविशिष्टेत्यलमतिप्रसङ्गेन ।

अन्ये तु अस्थिरादिभावनावशात् रागादिवियुक्तज्ञानोत्पत्तिः निःश्रेयसमिति मन्यन्ते । तथाहि सर्वं क्षणिकमिति भावयतो विषयेषु आसक्तिर्न्यावर्तते, ममेदमिति सम्बन्धाभावात् । तथा सर्वं निरात्मकमिति भावनायां नाहं परः न ममायमिति परिग्रहद्वेषाभावे भवत्येव विशुद्धचित्तसन्तानोत्पत्तिरिति । तथा च पदार्थस्य प्रतिषेधात् सर्वं शून्यमिति च । एवं हि दुःखस्य समुदयनिरोधमार्गेषु विशिष्टज्ञानं निःश्रेयसकारणमिति । तथाहि दुःखं रूपादिस्कन्धपञ्चकं तस्य समुदयः कारणम् । समुदेत्यस्मादिति तयोर्निरोधो विनाशः तस्योपायो मार्गः । इत्येषु विशिष्टज्ञानवशात् शुद्धचित्तसन्तानतदुच्छेदो वा निःश्रेयसमिति युक्तम् । नैतदेवम् । क्षणिकादिभावनाया मिथ्यारूपत्वात् । न च मिथ्याज्ञानस्य निःश्रेयसकारणत्वमतिप्रसङ्गात् । यथा च न क्षणिकत्वं शून्यत्वं नैरात्म्यं वा तथा वक्ष्यामः । अथासक्तिप्रतिषेधार्थमेवं भावनीयं, तन्न, अन्यथापि भावात् । तथाहि पदार्थतत्त्वज्ञानं प्रवृत्तेः कारणम् । दोषदर्शनं च निवृत्तेरिति दृष्टम् । यथा मधुविषसंपृक्तेऽन्ने दोषादर्शनात् गुणबुद्धितः प्रवर्तते दोषदर्शनाच्च निवर्तते नार्थप्रतिषेधात् । एवं पुत्रादावपि आत्मीयवैरूप्यदर्शनमेव निवृत्तिकारणमिति वाच्यम्, न सम्बन्धाभावः । तत्प्रतिषेधो भाव्यः । उक्तं च न्यायभाष्यकृता—रूपादिषु निमित्तसंज्ञा भावनीया नानुव्यञ्जनसंज्ञेति इत्थं दन्ताः इत्थं केशा इत्यादि । या चेयं दुःखसमुदयनिरोधमार्गेषु भावना सा यदि दुःखं तत्कारणं तयोर्निरोधः तदुपायश्चेतीदं न प्रतिषिध्येत । तथाहि दुःखं स्वरूपत एव अन्यदुःखकारणत्वात् । तच्च—रूपं संज्ञा वेदना संस्कारो विज्ञानमिति रूपादिस्कन्धपञ्चकमन्यद्वा भवतु सुखमपि दुःखं दुःखानुषङ्गादिति, सर्वं दुःखं तस्य विच्छेदोपायस्तत्त्वज्ञानमिष्यत एव । यच्चेदं—रागा-

---

(१) मोक्षसाधनमिति ख पु० ।

दिवियुक्तज्ञानं विशिष्टभावनात इति, तन्नास्ति । क्षणिकत्वे कार्यकारणभावप्रतिषेधस्य वक्ष्यमाणत्वा-
त् । उपेत्यवादेन तूच्यते—न रागादिमनोविज्ञानात्तद्रहितस्य उत्पत्तिर्युक्तेति । तथाहि यथा हि
बोधात् बोधरूपता ज्ञानान्तरे तद्वद्रागादिरपि स्यात् तत्तादात्म्यात् । विपर्यये वा तदभावप्रसङ्गादि-
ति । न च विलक्षणादपि कारणात् विलक्षणकार्यस्योत्पत्तिदर्शनात् बोधरूपतेति प्रमाणम-
स्ति । अत एवास्य ज्ञानस्य ज्ञानान्तरहेतुत्वेन पूर्वकालभावित्वं समानजातीयत्वमेकसन्तानत्वं वा न
हेतुः, व्यभिचारात् । तथाहि पूर्वकालभावित्वं तत्समानक्षणैः समानजातीयत्वं च सन्तानान्त-
रज्ञानैः व्यभिचारीति, तेषां हि पूर्वकालभावित्वेन समानजातीयत्वेऽपि न विवक्षितज्ञानहेतुत्व-
मिति । एकसन्तानत्वं चात्यन्तज्ञानेन व्यभिचारीति । अथ नेष्यत एवान्त्यं ज्ञानं सर्वदा-
ऽऽरम्भात् । तथाहि मरणशरीरज्ञानमपि ज्ञानान्तरहेतुः । ज्ञानावस्थाज्ञानं च सुषुप्तावस्थाज्ञान-
स्यापीति । नन्वेवं मरणशरीरज्ञानस्यान्तराभवशरीरज्ञानहेतुत्वे गर्भशरीरज्ञानहेतुत्वे वा सन्ताना-
न्तरे विज्ञानजनकत्वप्रसङ्गो नियमहेतोरभावात् । अथेष्यत एवोपाध्यायज्ञानं शिष्यज्ञानस्यान्यस्य क-
स्मान्न भवतीति । अथ कर्मवासना नियामिकेति चेत् । न, तस्यापि ज्ञानव्यतिरेकेणासम्भवात् । त-
त्तादात्म्ये सति विज्ञानं बोधरूपतया विशिष्टं बोधाच्च बोधरूपतेत्यविशेषेण विज्ञानं विद्यात्
इत्यलम् । यच्चेदं सुषुप्तावस्थज्ञानस्य जाग्रदवस्थाज्ञाने कारणत्वमित्यसदेतत् । सुषुप्तावस्थायां ज्ञानस-
द्भावे जाग्रदवस्थातो न विशेषः स्यात् । उभयत्रापि स्वसम्वेद्यज्ञानस्य सद्भावाविशेषात् । सुप्तौ निद्र-
यानभिभूतत्वं विशेष इति चेत् । असदेतत्, तद्धर्मतया तस्यापि तादात्म्येन अभिभावकत्वासम्भ-
वात् । व्यतिरेके तु रूपादिपदार्थानामेव सत्त्वात् तत्स्वरूपं निरूप्यम् । अभिभवश्च यदि विनाशो न-
विज्ञानस्य सत्त्वविनाशस्य वा निर्हेतुकत्वम् । अथ तिरोभावो न विज्ञानस्य सत्त्वेन तस्यैव संवेदन-
मित्यभ्युपगम्यते तस्यानुपपत्तेः । अथ सुषुप्तावस्थायां विज्ञानासत्त्वेन अन्त्यज्ञानसद्भावादेकसन्तान-
त्वं व्यभिचारीति । यच्चेदं-विशिष्टा(१)भावेन अवशात् रागादिविनाश इति, असदेतत्, निर्हेतुकत्वा-
द्विनाशस्य अभ्यासानुपपत्तेश्च । अभ्यासेऽव्यवस्थितस्यार्थातिशयाधायकत्वादुपपद्यते न क्षणिके
ज्ञानमात्र इति । अत एव योगिनि सकलकल्पनाविकलं ज्ञानमुत्पद्यते । न च सन्तानापेक्षयातिशयः,
तस्यैव असम्भवात् । अविशिष्टाद्विशिष्टोत्पत्तेरयोगाच्च । तथाहि-पूर्वस्मादविशिष्टादुत्तरोत्तरं साति-
शयं कथमुपजायत इति चिन्त्यम् । यच्च सन्तानोच्छित्तिर्निःश्रेयसमिति तत्र निर्हेतुकतया वि-
नाशस्य उपायवैयर्थ्यम् । अयत्नसाध्यत्वात् । अन्ये त्वनेकान्तभावनातो विशिष्टप्रदेशेऽक्षयशरीरा-
दिलाभो निःश्रेयसमिति मन्यन्ते । तथा च नित्यभावनायां प्रहानित्यत्वे न द्वेष इत्युभयपरि-
हारार्थमनेकान्तभावनेति । एवं सदसदादिष्वपि योज्यम् । प्रत्यक्षं च स्वदेशकालकारणाधारतया
सत्त्वं परदेशादिष्वसत्त्वमित्युभयरूपता । तथा घटादिः मृदादिरूपतया नित्यः सर्वावस्थासूपल-
म्भात् । घटादिरूपतया चानित्यस्तदपायात् । एवमात्माप्यात्मरूपतया नित्यः सर्वदा सद्भावात् ।
सुखदुःखादिपर्यायरूपतया चानित्यः तद्विनाशात् । एवं सर्वत्र स्वकार्येषु कर्तृत्वं कार्यान्तरेषु चा-
कर्तृत्वमित्यूह्यम् । अथ स्वशब्दाभिधेयत्वं शब्दान्तरानभिधेयत्वं चेति । तदेतदसांप्रतम्, मिथ्याज्ञान-
स्य निःश्रेयसकारणत्वेन प्रतिषेधात् । अनेकान्तज्ञानं च मिथ्यैव बाधकोपपत्तेः । तथाहि नित्यानित्य-
योः विधिप्रतिषेधरूपत्वात् अभिन्ने धर्मिण्यभावः एवं सदसत्त्वादेरपीति । यच्चेदं घटादिर्मृदादि-
रूपतया नित्य इति । असदेतत्, मृद्रूपतायास्ततोऽर्थान्तरत्वात् । तथाहि घटादर्थान्तरं मृद्रूपता
मृत्त्वं सामान्यम् । तस्य तु नित्यत्वेन घटस्य तथाभावः, ततोऽन्यत्वात् । घटस्य तु कारणाद्विलक्षण-
तयोपलब्धेः अनित्यत्वमेव । यच्चेदं—स्वदेशादिषु सत्त्वं परदेशादिषु असत्त्वम्, इष्यत एव । इतरेतरा-

(१) 'विशिष्टभावेन' ग. पु. ॥

भावस्याभ्युपगमात् । तथाहि—इतरस्मिन्देशादौ इतरस्य घटस्याभावो नानुत्पत्तिर्न प्रध्वंसः । तत्र तस्य सर्वदा सत्त्वात् । द्वैरूप्ये तु स्वदेशादिष्वनुपलम्भप्रसङ्गः । एवमात्मनोपि नित्यत्वमेव । सुखदुःखादेस्तद्गुणत्वेन ततोऽर्थान्तरस्य विनाशेऽप्यविनाशात् । कार्यान्तरेषु चाकर्तृत्वं न प्रतिषिध्यते । तथाहि यद्यस्यान्वयव्यतिरेकाभ्यामुत्पत्तौ व्याप्रियते इत्युपलब्धम् तत्तस्य कारणं नान्यस्येत्यभ्युपगम्यते । एवं शब्दान्तरानभिधेयत्वेऽपि न सर्वं सर्वशब्दाभिधेयमित्यभ्युपगमात् । न चानेकान्तभावनातो विशिष्टशरीरादिलाभेऽस्ति प्रतिबन्धः । न चोत्पत्तिधर्मिणां शरीरादीनामक्षयत्वं व्याप्यम् । तथा मुक्तावप्यनेकान्तो न व्यावर्तेत इति मुक्तो न मुक्तश्चेति स्यात् । एवं च सति स एव मुक्तः संसारी चेति प्रसक्तेः । एवमनेकान्तेऽप्यनेकान्ताभ्युपगमे दूषणम् । वस्तुनो हि सदसद्रूपताऽनैकान्तिकः । तस्याप्यनैकान्तिकाभ्युपगमे रूपान्तरमपि प्रत्यक्षमेवं नित्यानित्यरूपताव्यतिरिक्तञ्च रूपान्तरमित्यादि वाच्यम् । अन्ये त्वात्मैकत्वज्ञानात् परमात्मनि लयः सम्पद्यते इति ब्रुवते । तथा ह्यात्मैव परमार्थः सन् ततोऽन्येषां भेदे प्रमाणाभावात् । प्रत्यक्षं हि पदार्थानां सद्भावग्राहकमेव न भेदस्येत्यविद्यासमारोपित एवायं भेद इति मन्यन्ते । तदप्यसत् । आत्मैकत्वज्ञानस्य मिथ्यारूपतया निःश्रेयससाधनत्वानुपपत्तेः । मिथ्यात्वं च आत्माधिकारे वक्ष्यामः—व्यवस्थातो नानात्मानः (क० सू० ३ २-२०) इति सूत्रेण । एवं शब्दाद्वैतविज्ञानमपि मिथ्यारूपतया न निःश्रेयससाधनमिति द्रष्टव्यम् । तथाहि सर्वार्थानां शब्दरूपतेति प्रमाणाभावः । अथ भेदेऽपि प्रमाणाभाव इति चेत्तदसत् । चक्षुरादिना शब्दरूपतावियुक्तानामर्थानां प्रतिभासनात् । शब्दरूपता हि श्रावणत्वमर्थस्य सतः । न चार्थेष्वेतदस्ति । श्रोत्रेणाग्रहणात् । अथ शब्दस्यैवावस्थाभेदात् ग्रहणवैचित्र्यमिति चेत् । तत्र, शब्दरूपतायामतत्त्वात् । तत्र च प्रमाणाभाव एव । अथ शब्दसंपर्केण प्रतिभास एव प्रमाणमिति चेत् । न, अगृहीतसमयस्य बाल्यादेस्तदन्तरेणापि प्रतिभासनात् । न च शब्दान्तरेण सम्पर्को युक्तः । समयवैयर्थ्यप्रसङ्गादिति । शब्दरूपतायां साध्यायां न शब्दसंयुक्तप्रतिभासः प्रमाणम् । अत एव वैखरी मध्यमा पश्यन्ती सूक्ष्मा चेति भेदप्रतिपादनमुन्मत्तभाषितम् । न च शब्दाद्वैतज्ञानात् सूक्ष्मावस्था सम्पद्यत इत्यस्ति प्रतिबन्धः । एकस्मिंश्चाद्वैते प्रतिबन्धसमानतया सर्व एवाद्वैतभेदाः प्रतिषिद्धा भवन्तीत्यात्मैकत्वप्रतिषेधादेवेदं प्रतिषिद्धं भविष्यतीत्युपरम्यते ।

अन्ये तु महेश्वरप्रसादादशुद्धैश्वर्यविनाशे तद्गुणसङ्क्रान्तिं मन्यन्ते । तच्चासत् । अन्यगुणानामन्यत्र वृत्तेरदर्शनात् । महेश्वरप्रसादश्च मुक्तौ न प्रतिषिध्यते, तस्यास्तदधीनत्वात् । इति स्थितमसद्वादप्रतिषेधात् षट्पदार्थसाधर्म्यवैधर्म्यतत्त्वज्ञानं मुक्तस्य निःश्रेयसकारणमिति ।

अथेत्यादिवाक्यस्य सूत्रेणापि सम्बन्धो व्याख्यानान्तरमिति मन्यन्ते । तच्चासत् । सर्वस्मिन्व्याख्याने सूत्रितत्वोपदर्शनं भाष्यस्यप्यत एव । "अथातो धर्मं व्याख्यास्यामः" (क० सू० १-१-१) "यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः" (क० सू० १-१-२) इति सूत्रे अथशब्दोऽप्यानन्तर्ये वर्तत इति, अन्यस्यासम्भवात् नमस्कारानन्तरमिति लभ्यते । स च ज्ञानप्रस्तावात् ईश्वरस्यैवेति । भाष्यकारश्च सूत्रकाराभिमतं पदस्य गुरोर्नमस्कारमनूद्यापदस्य नमस्कारं करोमीति व्याख्येयं, न तु कणाद एव स्वात्मनि क्रियाविरोधात् । नापि कणानत्तीति कणाद इति कणशब्देन स्वकर्मफलस्य अभिधानात् । कष्टव्युत्पत्त्या संसारात्मनस्तन्नमस्कारे प्रयोजनाभावात् । 'अथ' शब्दार्थोऽनुशब्देनोक्त एव । 'अतः'शब्देऽपि वचनवृत्त्या धर्मं व्याख्यास्याम इति विविधमनेकप्रकारेण यदुत्पद्यते यतश्च नोत्पद्यत इत्याप्रतिबोधं यावत् तावत्प्रतिपादयिष्यामः । इति धर्मव्याख्यानार्थमेव षट्पदार्थोपवर्णनम्, अत एव पदार्थधर्मैः सङ्गृह्यत इति पदार्थधर्मसंग्रह इत्युक्तम् । उत्तरसूत्रस्य तु विवरणं महोदयः महानुदयः स्वर्गापवर्गलक्षणोऽस्माद्भवतीति महोदय इत्युक्तः । धर्मात् सुखत्वज्ञानं चेति ज्ञानोत्पत्तौ त-

स्यैव प्राधान्यात् । तदुपसर्जनतया शेषं व्याख्यायत इति ।

अथावयवार्थः । *प्रणम्य हेतुमीश्वरमिति* । प्रेत्युपसर्गेण प्रणामातिशयं दर्शयति । हेतुत्वं निमित्त-कारणत्वम् । तच्चान्येषामप्यस्तीति ईश्वरपदम् । ईश्वरशब्दश्च अन्यत्र वर्तमानोऽपि ज्ञानप्रस्तावान्महेश्वर एव वर्तते । 'शङ्करात् ज्ञानमन्विच्छेत्' इति वचनात् । ननु व्यर्थं तर्हि हेतुपदम् ज्ञानप्रस्तावाद्विशेषणसिद्धेः । नैतदेवम् । स्तुतेर्गुणसङ्कीर्तनरूपतया सकलकार्यैककर्तृत्वाभिधानात् । अन्यथा ह्यन्यतराभिधानेनैव गतार्थत्वाद्व्यर्थं स्यादुभयाभिधानम् । तदेवमीश्वरप्रणामानन्तरं मुनिं प्रणमति । मुनयश्चान्येऽपि विशिष्टज्ञानवैराग्यवन्तो भवन्तीति विशेषणम् कणादमिति । विशिष्टज्ञानसम्बन्धित्वं च तदभिहितपदार्थानां प्रमाणान्तरेणाभिधानात् विज्ञायते । अत एव तत्त्वज्ञानस्य सद्भावे मिथ्याज्ञानस्य रागद्वेषहेतोरभावात् द्वेषवैराग्यं निश्चीयते । कणानत्तीति कणादस्तमिति विशिष्टाहारनिमित्त-संज्ञोपदर्शनेनासच्चोद्यनिरासः । तच्च कणान्वा भक्षयेत्कामं माहिषाणि दधीनि चेत्यादियुक्तियुक्तम् । बोधश्च न प्रवृत्तेः कारणम् । प्रवृत्तौ सत्यान्तद्भावात् । तथा हि श्रवणे प्रवर्तमानो विजानाति युक्तमयुक्तं वेति । न तदवबोधे प्रवृत्तिमितरेतराश्रयत्वप्रसङ्गात् । अतो विशिष्टपुरुषप्रणीतत्वोपबोधे सत्यादौ श्रवणे प्रवृत्तिर्युक्ता । तथाहि मनुना प्रणीतं व्यासेन प्रणीतमिति मत्वा प्रवर्तन्ते जनाः । तदेवं परापर-गुरुनमस्कारोपचितधर्मविशेषेऽधर्मप्रतिबन्धात् तत्तत्कार्याणामभावे भवत्येवाविघ्नतः शास्त्रपरिसमाप्तिरिति । ननु चायुक्तमेतत् । सत्यपि नमस्कारे शास्त्रपरिसमाप्तिरदर्शनात् कादम्बर्यादौ असत्यपि दर्शनात् प्रमाणतोऽर्थप्रतिपन्नावित्येवमादौ । सत्यं शास्त्रपरिसमाप्तेः कार्यत्वादवश्यं कारणं वाच्यमित्यन्यस्यासम्भवात् धर्मविशेषः कारणमिति । स च नमस्कारादन्यस्माद्वा भवतु न नियम्यत इत्येके । अन्ये तु साधनविशेषाद्विशिष्यत इति नमस्कारादेवोपजायते धर्मविशेषः कारणमिति । अथ नमस्काराभावे तर्हि कथं शास्त्रपरिसमाप्तिरिति । न, तत्रापि कार्यसद्भावेन कारणसद्भावसिद्धेः । वाचिकनमस्काराभावेऽपि मानसो नमस्कारो ज्ञायत इति । एकदा हि विशिष्टनमस्कारसद्भावे परिसमाप्तेरुपलम्भादिति । तथाहि मानसनमस्कारोपचितो वाचिको नमस्कारः परिसमाप्तेः कारणमिष्यते । मानसस्तु केवलोऽपीति । अत एव क्वचिद्वाचिकसद्भावेऽपि मानसनमस्काराभावादपरिसमाप्तिर्युक्तेति । तस्य त्वभावः कार्यानुत्पादेनैव ज्ञायत इति नमस्काराच्च धर्मः सम्पद्यत इत्यागमात् व्याप्तिग्रहणम् । तथा लौकिकोऽपि पुरुषः कृतनमस्क्रियः क्रियाकरणे प्रवर्तमानो दृष्टः । किम्पुनर्भगवान्मुनिरनवद्यवादी । अन्ये त्वसच्चोद्यनिरासार्थं कणान्ददातीति दयत इति वा व्युत्पत्त्यन्तरमाश्रयन्ते । अत्र किल वैशेषिकसूत्ररचनाकरणेन्युच्यत इति । चिन्त्यमेतत् । प्रसिद्ध्यपरिज्ञानपरिहारार्थं चोपात्तमिति अलं असद्व्याख्यानेनेति । तदेवं परापरगुरुनमस्कारादतोऽन्तरायप्रध्वंसो यतो वान्तेवासी यथोक्तलक्षणसम्पन्नः अतोऽनन्तरमेव प्रतिपक्षक्रियानन्तरितः पदार्थधर्मसंग्रहः प्रवक्ष्यत इति । नच क्त्वाप्रत्ययादेव विशिष्टानन्तर्यप्रतिपत्तिः, तस्य हि समानकर्तृकत्वे सति पूर्वकालभावित्वमात्रे भावात् । तथाहि भोजनानन्तरं शयनादिक्रियाव्यवधानेऽपि भुक्त्वा व्रजतीति प्रयोगो भवत्येव । अत्र चेश्वरप्रणामानन्तरमेव मुनेर्नमस्कारः । तदनन्तरमेव प्रवचनक्रियेति । न चाप्रतिपक्षक्रियाव्युदासोऽवयवचलनादेर्भावात् इति । *पदार्थधर्मसंग्रह इति* । पदार्थानां धर्माः तेषां संग्रह इत्युत्तरपदप्राधान्येऽपि धर्माणां धर्मिष्ठतया सङ्ग्रहो भवत्येव । धर्मिणां सङ्ग्रह इति सुखदुःखसाधनत्वधर्मावबोधे सति प्रवृत्तिनिवृत्त्योर्भावात् । धर्माणामिह प्राधान्यं न निषिध्यते । तत्त्वज्ञानं चात्र प्रधानतया विवक्षितम् । तद्धर्मिषु उपसर्जनतयापि लभ्यत एव । यदि वा तत्त्वज्ञानप्रधानक्रियासम्बन्धादुभयेषां प्राधान्यमिति । पदार्थाश्च धर्माश्चेति समासः । स्वातन्त्र्यं हि प्रधानक्रियासम्बन्ध एव । न धर्मितादात्म्यं धर्माणामिति वक्ष्यामः । पदार्थधर्माणां संग्रह इति निबन्धनान्तरैर्विस्तरोक्तानां संक्षेपेणाभिधानम् । भावव्युत्पत्त्या तत्त्वज्ञानमित्यपरे । स च प्रवक्ष्यते—कथयिष्यते ॥

(व्यो०) किंविशिष्टो महानुदयस्तत्कार्यं च निःश्रेयसमस्माद्भवतीति महोदय इति ।

(भा०) द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानं निःश्रेयसहेतुः ।

(सू०) ननु तत्त्वज्ञानस्य निष्फलत्वात्तदर्थं ग्रन्थे प्रवृत्तिरनुपपन्नेत्यत आह द्रव्यगुणेत्यादि । निःश्रेयसहेतुरिति । तथा च दुःखाभावत्वेनेष्टाया मुक्तेः साधनत्वेनेष्टस्य तत्त्वज्ञानस्य साधने ग्रन्थे प्रवृत्तिर्नोपपन्नेति भावः ।

(सेतु०) कथं पुरुषार्थ इत्यत आह द्रव्येति । द्रव्यादीनां समवायान्तानां साधर्म्यवैधर्म्याभ्यां यत्तत्त्वज्ञानं तन्निःश्रेयसहेतुरित्यर्थः ।

एतावतः पदार्थस्य तत्त्वज्ञानमपेक्षितमित्युक्तं भवति । तत्कारणत्वेन च साधर्म्यवैधर्म्ये उक्ते । व्यतिरेकिणवान्वयिनापीतरभेदानुमितिसम्भवात् । तत्त्वज्ञानस्य च मोक्षजनकतया पुरुषार्थत्वमुक्तम्, तत्त्वपदेन चात्रेतरभेद एव ग्राह्यः इतरभेदज्ञानस्यैव चतुर्विधतत्त्वज्ञानरूपत्वात् । न चैवं तत्त्वमनारोपितमिति किरणावलीविरोधस्तत्र धर्मान्तरस्यापि तत्त्वपदेन सङ्ग्रहादिति रूपभेदज्ञानस्यापि मोक्षजनकत्वाङ्गीकारात् । अभावेऽन्योन्याभावात् पृथिव्यादीनामिवाभावस्यापि आत्मनिष्ठभेदप्रतियोगितया तत्त्वतो ज्ञेयत्वात् ।

(व्यो०) पदार्थधर्मसंग्रह इत्यादिसामान्योक्तेर्विभजनाय द्रव्यादिवाक्यम् । तच्च विशेषापदर्शनात् शेषप्रतिषेधपरम् भवत्येव विभागवाक्यत्वावधारणमिति । षण्णामेवाभिधानात् षडेव पदार्था इति लभ्यते ।

अथाभावः कस्मान्नोपसंख्यायते । भावोपसर्जनतया प्रतिभासनात् । तथाहि—नाप्रसिद्धभावसद्भावस्य नारिकेरद्वीपवासिनः तदभावप्रतीतिरिति भावपरिज्ञानापेक्षित्वादभावस्य न पृथगुपसंख्यानम् ।

(व्यो०) ज्ञाते हि भावे तदभावः प्रतीयत एव । तथाहि-द्रव्यपरिज्ञानात्तदभावपरिज्ञानमे ...... ज्ञानं लभ्यते । तेषां च प्राधान्यमुपदर्शितमेव । *तत्त्वज्ञानमिति* । सम्यक्त्वस्य विशेष्यं ज्ञानमिति । न तु तत्वं च तत् ज्ञानं चेति । उभयपदव्यभिचारे सामानाधिकरण्याभावात् । तत्त्वं हि पृथिव्यां गन्धो न च ज्ञानं । ज्ञानं च मिथ्याज्ञानमपि न च तत्त्वमिति व्यभिचारेपि धर्मधर्मिशब्दाश्च सामानाधिकरण्यम् । तत्त्वं हि सम्यक्त्वं ज्ञानधर्म एव । अन्ये तु तत्त्वे प्रधानत्वात् आत्मनि साधर्म्यवैधर्म्याभ्यामुपजातमिति मन्यन्ते । प्राधान्यं तु द्रव्यादिपदार्थानां मध्ये पुरुषस्य तत्र ह्यभ्यासवशादुपजातस्य ज्ञानस्य निःश्रेयसकारणत्वाभ्युपगमात् । न च मिथ्याज्ञाने प्रसङ्गो निःश्रेयसहेतुत्वासम्भवादिति । निःश्रेयसस्य च हेतुर्यथा तत्त्वज्ञानं तथोक्तमेवादिवाक्ये । तथात्मज्ञानमितरविविक्तत्वादितरपदार्थज्ञानापेक्षमित्यर्थवद् द्रव्यादिसाधर्म्यवैधर्म्यज्ञानम् ।

(भा०) तच्चेश्वरचोदनाभिव्यक्ताद्धर्मादेव ।

(सू०) नन्वासंसारं सर्वेषामेव ग्रन्थादितो द्रव्यादिपदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानमुत्पन्नं न तु कस्यापि मुक्तिर्वार्तेति तत्त्वज्ञानस्य मुक्तिहेतुत्वे मानाभाव इत्यत आह तच्चेति । तत् निःश्रेयसम् । एवकारोऽप्यर्थः । तथाच ईश्वरदेशनया वेदेनाभिव्यक्तात् प्रतिपादितादात्मधर्मिकश्रवणमननाद्यात्मकधर्मादपि निःश्रेयसमित्यर्थः । पदार्थतत्त्वज्ञानसत्त्वेऽपि श्रवणमननाद्यात्मकसहकार्यसत्त्वादेव सर्वेषान्न निःश्रेयसमिति भावः ।

(सेतु०) ननु मननस्य नाहत्य मोक्षहेतुता किन्तु साक्षात्कारस्य, साक्षात्कारस्तु कुतो भवतीत्यत आह तच्चेति । एवकारोऽप्यर्थः । एवञ्चापरोक्षमिथ्याज्ञानोन्मूलनक्षमं तत्त्वसाक्षात्काररूपं तत्त्वज्ञानं धर्मादपि भवतीत्यर्थः । अपिशब्देन साधर्म्यादेः समुच्चयः । एवञ्च वेदात्मकेश्वरोपदेशावधृतान्निःकामकर्मणः साधर्म्यादिना च तत्त्वसाक्षात्कारो भवतीति सिद्धम् । साधर्म्यादिना च मननद्वारा

(सेतु०)तत्त्वसाक्षात्कारो जायते। एवञ्च शास्त्रेण लिङ्गज्ञानं तेन मननं तेन निदिध्यासनं निदिध्यासनोत्तरं निदिध्यासनरूपयोगजन्यपुण्यविशेषरूपया योगजधर्मलक्षणेति-ख्यातया प्रत्यासत्त्या तत्त्वसाक्षात्कारस्ततो मिथ्याज्ञाननिवृत्तौ मोक्षः मननादिना च निष्कामकर्मसापेक्षेण तत्त्वसाक्षात्कारो जन्यते अत एव तदर्थिनः शिष्टास्तादृशकर्मनिष्ठा दृश्यन्ते। अत एव क्वचिन्मननादिनिमग्नमनसामपि तद्विलम्बस्तद्विलम्बादेव तत्र श्रवणं श्रुतिशिरस्समुद्भूतमात्मेतरेभ्यो भिद्यते इत्याकारकं ज्ञानम्। तच्छायमेवानुमितिरूपं मननम्। तत्समानशीलेमत्र स्मरणरूपान्निदिध्यासनम्। तदनुरूपमेव प्रत्यक्षप्रमाणजन्य तत्त्वसाक्षात्काररूपमिति। एतेषां चतुर्णां परस्परसापेक्षेण मोक्षजनकत्वे मूलभूता प्रमाणान्तरानपेक्षा श्रुतिरेव भगवती साक्षिणीति।

नास्तिकप्रमोदाय गुरुचरणप्रसादात्सुलभापि युक्तिस्तन्यते। ननु तच्चेश्वरेत्यादिभाष्यमनुपपन्नम् ज्ञानकर्मणोर्दण्डचक्रयोर्घट इव मोक्षे समुच्चयाभ्युपगमात्। न च महामुनिना कणादेन लिखितत्वात्तदनुसारिभाष्यभाषितमदोषमेवेति वाच्यम् जैमिनेरपि मुनित्वेन सुमनसां विना विचारमेकत्र पक्षपातानुपपत्तेः प्रत्युतास्यैव निरन्तरश्रुतिसर्गावगाहनक्षालितमनसस्सुभाषितत्वप्रसङ्गात्। श्रुत्या ज्ञानकर्मणोर्द्वयोरपि युगनद्धवाहितया कारणताविष्करणादिति चेन्न।

अत्र केचित्। अस्तु(१) ज्ञानकर्मणोर्व्रीहियवयोर्याग इव अपवर्ग-

(१)(व्यो०)अथ संचितयोर्विचारः। कथं तत्त्वज्ञानादेवेति? यथोक्तम् यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन। ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा। इति। ननुपभोगादेव प्रक्षय इत्यप्यागमोक्तम् यथोक्तम् नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि। अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम्। तथाच विरुद्धार्थत्वादुभयोः कथं प्रामाण्यमिति। भोगाच्च क्षयेऽनुमानमपि अस्ति पूर्वकर्माणि उपभोगादेव क्षीयन्ते कर्मत्वात्। यद्यत्कर्म तत्तदुपभोगादेव क्षीयते यथारब्धशरीरं कर्म तथा चामूनि कर्माणि तस्मादुपभोगादेव चीयन्ते इति। उपभोगेन च प्रक्षये कर्मान्तरस्यावश्यंभावात् संसारानुच्छेदः। तदसत् समाधिबलादुत्पन्नतत्त्वज्ञानो हि कर्मणां सामर्थ्यं विदित्वा युगपच्छरीराणि निर्मायोपभोगशेषं भुंक्ते इति। न च पुनः कार्यान्तरोत्पादः मिथ्याज्ञानजनितानुसंधानाख्यकर्मसहकारिणोऽभावात्। अन्येतु मिथ्याज्ञानजनितसंस्कारस्य सहकारिणोऽभावात् विद्यमानान्यपि कर्माणि न जन्मान्तरीणशरीरारम्भकानीति मन्यन्ते। तत्त्वज्ञानिनो नित्यनैमित्तिकानुष्ठानन्तु नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम्। ज्ञानं च विमलीकुर्वन्नभ्यासेन तु पाचयेदित्यादिभगवद्वचनात्प्रत्यवायपरिहारार्थमेव। तथा च काम्यनिषिद्धयोरेव तत्प्रतिषेधः। तथा च तत्कर्मणः फलाननुसन्धानान्न फलोत्पाद इति प्रारब्धशरीरोपभोगसाधनकर्मणः फलं दुरितनिवृत्तिरेव न तत्त्वज्ञानवाञ्छिःश्रेयसमिति व्योमवती।

(सेतु०)स्वर्गे वैकल्पिकी कारणता एकसाधनावरुद्धे समुच्चयबोधनं विना शब्देन साधनान्तरबोधनस्य विकल्प एव पर्याप्तेः अन्यत्र तथैव दर्शनात्। तत्र वैकल्पिकी कारणतेति पदयोर्माता वन्ध्येतिवत् परस्परव्याहतार्थत्वात्। ननु जनकस्त्रीत्वं मातृत्वमजनकस्त्रीत्वं वन्ध्यात्वमिति तयोर्विरोधो युक्तः प्रकृते तु कथं स इति चेन्न प्रकृतं प्रत्यनियतत्वस्य वैकल्पिकत्वरूपतया नियतत्वस्य च कारणत्वरूपतया प्रकृतेऽपि विरोधस्य स्फुटत्वात्, एवञ्च कदाचित्कर्म विना कदाचिच्च तत्त्वज्ञानं विना मोक्षोत्पत्त्या व्यभिचारेण कारणत्वाभावः। न च व्रीहियवयोः का गतिस्तत्र तद्यागविशेषे तस्य जनकत्वात्। ननु विलक्षणकार्ययोः कारणयोः कुलालकुविन्दयोर्न वैकल्पिकी कारणता व्रीहियवयोस्तु सत्यत्र किं बीजं विनिगमकमिति चेन्न एकसाधनावरुद्धे समुच्चयबोधनं विना श्रुत्यादिना साधनान्तरस्थले वैकल्पिकी कारणतेति वैकल्पिककारणतायाः परिभाषितत्वात् तस्याः व्रीहियवयोः सत्त्वात्, कुलालकुविन्दयोरसत्त्वात्। यद्यपि व्रीहियवौ विजातीययागं प्रति जनकौ तथापि तथा बोधनदशायामेकजातिपुरस्कारस्तत्रास्त्येव। एवञ्च यत्रैकजातिपुरस्कारेण साधनताबोधनानन्तरं समुच्चये बोधनं विना श्रुत्यादिना कारणतान्तरबोधनं तत्र विजातीयकार्यसम्भवे वैकल्पिकी कारणता। न चैतत्प्रकृते सम्भवति अपवर्गे वैजात्याभावात्। अपि च मिथ्याज्ञानध्वंसं विना न मोक्षः न च स तज्ज्ञानं तथा च तत्त्वज्ञानं कथं विकल्पेऽन्वेतु। न च काशीमरणादीनां कथं तत्त्वज्ञानं विना मोक्षजनकत्वमिति वाच्यम् तैरपि तत्त्वज्ञानमुत्पाद्य मोक्षजनकत्वात्। ननु तत्त्वज्ञाने क्वचिच्छ्रवणादेः क्वचिच्च काशीमरणादेर्जनकत्वे व्यभिचार इति चेन्न ज्ञाने वैजात्यसम्भवात्। न च संयोगजधर्मं विना कया प्रत्यासत्त्या काशीमृतानां तत्त्वसाक्षात्कार इति वाच्यम् काशीमरणादिजन्यधर्मस्यैव तत्र प्रत्यासत्तित्वात्। न च काशीमरणादीनां धर्मजनकत्वे प्रमाणाभावः श्रुतिबोधितमोक्षसमर्पकत्वान्यथानुपपत्तिकल्प्यसाक्षात्कारान्यथानुपपत्त्यैव तत्कल्पनात्। न वै योगजादिधर्मग्रहणात् योगजधर्मलक्षणा प्रत्यासत्तिरित्येतस्य पुण्यविशेषलक्षणा प्रत्यासत्तिरित्यर्थकारणाद्वा काशीमरणम्मोक्षजनकमित्यस्य काशीमरणानुकूलो व्यापारो मोक्षजनक इत्य-

(सेतु०) र्थः । तद्दशायां तारकोपदेशासम्भवात् मृते तदसम्भवात् । न च मरणोत्तरं शरीरान्तरावच्छेदेन, तत्प्रमाणाभावात् वेदान्तिनां शरीरान्तराभावेन तदसम्भवाच्चेति पितृचरणपवित्रीकृतपन्थाः । ननु यतः कुताश्चित्कर्मणो यत्र मोक्षः श्रूयते तत्र तत्कर्मणा नाहत्य तत्त्वज्ञानं जन्यते तथाऽनुपलब्धेः किन्त्वदृष्टद्वारेति वक्तव्यम् तथाचादृष्टद्वारा मोक्ष एव जन्यतामिति चेन्न मिथ्याज्ञानापनोदाय तत्त्वज्ञानस्यावश्यकत्वात् । तस्मात्तत्त्वज्ञानकर्मणोः वैकल्पिकी कारणतेति कल्पोऽकल्प एव ।

समुच्चयकल्पस्त्ववशिष्यते । तत्र ज्ञानकर्मणोरदृष्टद्वारा वा ? नाद्यः कर्मणो मिथ्याज्ञानध्वंसजनकत्वे प्रमाणाभावात् इदं रजतं नेदं रजतमित्यत्र तथाऽनुपलब्धेः । नापि द्वितीयः एवं सति कर्मणोऽदृष्टद्वारा मोक्षजनकत्वं वाच्यम्, तत्त्वज्ञानप्रतिबन्धकाकर्मनिवृत्त्यर्थं किञ्चिदन्यकल्पनीयमिति गौरवापत्तेः । कर्मणामेवाधर्मनिवृत्तिद्वारा तत्त्वज्ञाननिवृत्त्यर्थंमोक्षजनकत्वे तु न कापि क्षतिः साक्षात्त्वस्याश्रुतेः । तस्मान्निष्कामेन कर्मणा दुरितनिवृत्त्यर्थन्तत्त्वज्ञानं निर्वर्त्य निःश्रेयसन्निर्वर्त्यत इति दिक् ।

निःश्रेयसं त्वविद्यानिवृत्तिर्वेदान्तिनस्तत्र तदभिमतायामनादिभावरूपायामविद्यायामेव मानाभावात् । मिथ्याज्ञानरूपाया ध्वंसस्य च दुःखाभावेतरत्वेनापुरुषार्थत्वात ।

प्रकृतिपुरुषयोर्वियोगावस्थैव मुक्तिरित्यपरे(१) । तदपि न प्रकृतौ मानाभावात् । जगद्वैचित्र्यानुरोधेनावश्यकल्प्यनादृष्टेनोपपत्तेः । न चाजामित्यादिश्रुतिबलात्तयोः सिद्धिः अस्या अदृष्टप्रतिपादकत्वात् । नन्वजामिति स्त्रीलिङ्गनिर्देशादनुत्पन्नत्वाभिधानादेकत्वनिरुक्तः सत्त्वादिलक्षणत्रिगुणत्वनिरुक्त्या त्यागविधानाच्चादृष्टपरत्वमस्याः श्रुतेरिति चेन्न सहकारिस्वरूपशक्तिरूपेऽदृष्टे स्त्रीलिङ्गनिर्देशस्यानुपपत्त्यभावात्, अनुत्पन्नत्वेन चानादित्वमुच्यते तदपि धारया । एवं लक्षणा स्यादिति चेन्न अविद्यादौ प्रमाणाभावेन मुख्यार्थासम्भवेन लक्षणाया अनुचितत्वात । एषा श्रुतिस्तत्र मानमिति चेन्न तथाहि सिद्धेऽविद्यादौ तामादायामुख्यार्थत्वानुरोधेन च तत्सिद्धिरित्यन्योन्याश्रयात् । एकामित्यनेन मुख्यत्वमुक्तमदृष्टस्य कारणान्तरघट-

---

(१) सांख्या इत्यर्थः ।

(सेतु०)कत्वान्मुख्यत्वात् । लोहितेत्यादिना विचित्रकार्यानुकूलानि विचित्राणि सामर्थ्यानि निरुक्तानि त्यागस्त्वसम्बन्धः स च विनाशेऽपि सम्भवति इति नित्यां प्रकृतिं साधयितुं त्यागस्यासामर्थ्यात् । वस्तुतस्तु जगज्जनकत्वेन मतायां अविद्याया जन्यत्वे तत्र च कारणान्तरस्वीकारे तेनैव विश्वप्रभवसम्भवे किमविद्यया तदङ्गीकारे तु स्यादनवस्थेत्यन्यैव सेत्याशयेन श्रुतिं श्रावयति अजामिति । लाघवेन तस्या एकत्वमुपपादयति एकामिति । एकत्वे तस्या विचित्रकार्याजकत्वसामर्थ्यबीजं दर्शयति लोहितेत्यादिना । उपाधेरविद्याया एकत्वे तदुपहितस्य जीवस्याप्येकत्वमित्याह अज एक इति । उपाध्यैक्ये स्वतो भेदराहितस्योपाधिमत एैक्यं प्रसिद्धमेवेति प्रसिद्धार्थकेन हिशब्देनाह । तत्स्वेवनवशादेव चित्स्वरूपोऽप्यात्माऽनुशेतेऽनुशेत इव मुद्रितज्ञाननेत्रो भवतीत्यर्थः । सर्वदाऽविद्यासम्बन्धे श्रवणादिवैफल्यमित्याशंक्याह जहातीति । स्वरूपस्य त्यागासम्भवेन त्यागबीजं भेदमाह अन्य इति । इत्थं कल्पनयाऽविद्यावदेकत्वमस्य वेदस्य वेदनीयम् । एवञ्च भवतामपि मते बहवः शब्दा अत्र लाक्षणिका एव । तथाहि लोहितेत्यादयो हि शब्दा लोहित्यादिगुणविशिष्टं धर्मिणं कथयन्ति गुणमेव वा ? अत्र तु रक्तताप्रभृतयो गुणा ग्राह्याः तथा च लक्षणैव । अनुशेत इत्यत्र लक्षणा भवाद्भिरेवोक्ता अनुशेत इवेत्यभिधानात् । जुषमाण इत्यपि लाक्षणिकमेव सेवाया आराधनरूपाया अचेतनायामविद्यायामसम्भवात् । जहातीत्यपि तादृगेव त्यागस्य कर्मण आत्मन्यसम्भवात् तथाचैकत्र सम्बन्धः परत्र वा सम्बन्धो लक्षणीयः । एवञ्चाजापदेऽपि लक्षणायां कियती क्षतिः । एवं च वेदान्तिभिरविद्याप्रतिपादकतयोपनेयान्युपनिषदुत्तराण्यप्यदृष्टपरतया तद्वासनापरतया वा नेयानि तत्र स्त्रीलिङ्गनिर्देशाप्रतिहतत्वात् । किञ्चोपनिषदां ब्रह्मण्येव तात्पर्याङ्गीकारेणाविद्यायां प्रमाणत्वेनोपन्यासे वेदान्तसिद्धान्तविरोधोऽपि । अनुशेत इत्यत्र मिथ्याज्ञानादिपक्षेऽप्यनुशेत इवेत्येवार्थः मिथ्याज्ञानादिदशायामात्मस्वरूपाज्ञानात् । एवमेव प्रकृतिवादिनं प्रत्यप्येषा श्रुतिरन्यथा नेयेति । जहातीत्यत्र कापिलमतानुयायिनां न लक्षणेति चेन्न पक्षी वृक्षं जहातीतिवदात्मा प्रकृतिं जहातीति त्यागरूपकर्मताया अनुपपत्तेः लक्षणाया आवश्यकत्वात् । एवञ्चैषामलौकिकप्रत्यासत्तीनां त्रैविध्य-

(सेतु०) मर्यादावधि शास्त्रेषु श्रुतं इत्थं स्यादिति वाच्यम् योगजध-र्मपदेन योगजादिधर्मग्रहणात् । योगजधर्मलक्षणा श्रुतिदूती नात्मना नायकेनाविद्याम्प्रकृतिं वा सत्सु वैशेषिकवचोज्योत्स्ना जालेषु घटयितुं प्रभवतीति किमन्यविचारे प्रक्रान्ते विचारान्तरसञ्चारणप्रयासेनेति सङ्क्षेपः । दुर्गमश्च श्रुतिविचार इत्यलमनेन । मार्गमात्रन्तु बाला-नामुपकाराय प्रदर्शितम् ।

लिङ्गशरीरापगमो मुक्तिरित्येके(१) । तदपि न, लिङ्गशरीर एव मानाभावात् निरुक्तनयेनापुरुषार्थत्वाच्च ।

नित्यसुखाभिव्यक्तिरिति मीमांसकाः । तत्तु तन्मतीनां मां-सलत्वमेव प्रकटयतीति । तथाहि नित्या सुखाभिव्यक्तिरि-त्यर्थकरणे मुक्तसंसारिविशेषापात्तः नित्याया अभिव्यक्तेरेवानन्त-त्वाद्धवरघुर्येणापि स्वीकार्यत्वात् । नित्यस्य सुखस्याभिव्यक्ति-रित्यर्थे तु शरीरादुत्पन्नाया प्रथमाभिव्यक्तेरेवानन्तत्वाङ्गी-कारे प्रमाणं विनापि भावकार्यस्यानित्यतास्वीकारः नाशाङ्गी-कारे तु मुक्तस्य संसारितेवाररीकारः । मतिधारास्वीकारे तु कारणं शरीरं विना सर्वोरेव यागहोमादि विना स्वर्गादेस्सम्भवेन बहु-वित्तव्ययायाससमाप्तफलकरणाविलोपापत्तिः तथाच मीमांसाभ्या-सः केवलं कण्ठशोषायैव स्यात् । मुक्तीतरजन्यज्ञानत्वेन शरीरत्वेन कार्यकारणभाव इति चेन्न अन्योन्याश्रयात् । तथाहि विशेषणं हि व्यावर्तकं भवति तथाच मुक्तरूपज्ञानासिद्धौ तद्व्यावर्तके मुक्तीत-रत्वरूपे विशेषणे सुस्थमेन रूपेण कार्यकारणभावासिद्धिः सिद्धे चा-स्मिन् शरीरस्य तथाकारणत्वेन शरीरं विनापि तत्सिद्धिरिति । तस्मा-देवंवादिनान्तेषां मीमांसका इति नाम पारिभाषिकमेव ।

अत एव निरन्तरायोऽहमहमिति ज्ञानप्रवाहोऽपवर्ग इति मत-मपि परास्तम् ।

आत्महानिर्मुक्तिरिति(२) तु मुक्ताभावादेव निरस्तम् ।

कामार्थावेव पुरुषार्थौ मुक्तिर्नास्त्येवेति चार्वाकाः । तदचारु मुक्तेरनुमानादिप्रमाणसिद्धत्वात् । नच तन्मते शरीरस्यात्मतया त-त्सत्त्वेन मुक्तिस्तदभावदशायान्तु कस्य मुक्तिरिति वाच्यम् शरीर-भिन्नस्यात्मनस्साधनीयत्वात् ।

---

(१) त्रिदण्डिसंन्यासिन इत्यर्थः । (२) माध्यमिकमतमिदम् ।

(सेतु०) निर्विषयां चित्सन्ततिं सौत्रान्तिका मुक्तिमाहुः। तन्न, ज्ञानस्य निर्विषयत्वे प्रमाणाभावात्।

चित्तवृत्तिनिरोधो मुक्तिरिति योगाचारः। तदपि न, ज्ञानस्य मुख्यदुःखत्वाभावेन तद्धानेरपुरुषार्थत्वात्।

क्लेशशून्या चित्तसन्ततिर्मुक्तिरिति वैभाषिकाः। तदपि तुच्छम् जीवन्मुक्तिदशायामपि रागद्वेषमोहानामसत्त्वेन परममुक्तिप्रसङ्गात्। ज्ञानस्य सुखदुःखाभावेतरत्वेन पुरुषार्थत्वाभावाच्च।

सुरासुरसेवनं मुक्तिरिति पाखण्डा इति केचित्। ते सुरापायिनामितस्ततःप्रस्खलनस्य मुखे मक्षिकादिप्रवेशस्य च दर्शनेन बोधनीयाः। मुक्तत्वन्तु पामराणां तस्य स्यात्।

शरीरावरणोच्छेदो मोक्ष इति दिगम्बराः। तदपि न, शरीरस्यामुख्यतया तद्धानेरपुरुषार्थत्वात्।

समानाधिकरणया मिथ्यावासनयाऽसमानकालीनो दुःखप्रागभावो मुक्तिरिति परे(१)। तन्न प्रागभावस्य सान्तत्वे मुक्तस्य संसारित्वापत्तिः। अनन्तत्वे प्रागभावत्वविरोधः। प्रायश्चित्तस्थले का गतिरिति चेन्न तत्र कियत्कालं पापनाशद्वारा दुःखप्रागभावपरिपालनेन प्रायश्चित्तप्रवृत्तेस्सार्थकत्वे सिद्धे पापान्तरमासाद्य प्रागभावेन दुःखजननेपि क्षत्यभावात्। न ह्यग्रे मरणेऽपि प्रकृतरोगे जीवनदातुर्भेषजपानस्य वैफल्यमिति। प्रागभावश्च पादप्रायश्चित्तनष्टपापसरूपमेव पापमासादयिष्यति नोचेदन्यादृशप्रागभावे वैचित्र्यभावेन पापवैजात्यादेर्वै दुःखवैजात्यात्।

दुःखात्यन्ताभावो मुक्तिरित्यपरे(२)। तत्तुच्छम्। तथाहि स्ववृत्तिदुःखस्यात्यन्ताभावो विवक्षितः परवृत्तेर्वा? आद्येऽपि व्याप्यवृत्तिरव्याप्यवृत्तिर्वा? नाद्यः। स्ववृत्तिदुःखस्य स्वस्मिन् वाप्यवृत्त्यत्यन्ताभावात्। नापि द्वितीयः। दुःखस्याव्याप्यवृत्तित्वेन तस्य संसारितादशायामपि सत्त्वात्। नापि द्वितीयः परगतदुःखात्यन्ताभावस्य स्वस्मिन् स्वतःसिद्धतयाऽनाकाङ्क्षितत्वेनापुरुषार्थत्वात् कृत्यसाध्यत्वाच्च। नच समानाधिकरणमिथ्यावासनासमानकालीनो मिथ्यावासनाध्वंस एवापवर्ग इति वाच्यम् अत्यन्ताभावस्या-

---

(१) प्राभाकरा इत्यर्थः। (२) नैयायिकदेशिनः।

(सेतु०) पुरुषार्थत्वस्य व्यवस्थापितत्वात्।

समानाधिकरणमिथ्यावासनासमानकालीनो मिथ्यावासनाध्वंस एवापवर्ग इतीतरे(१)। तदपि न, पुरुषार्थेतरत्वात्। प्रायश्चित्तेऽपि दुःखप्रागभावस्यैव पुरुषार्थत्वात्। एवं हि लोके कण्टकादिनाशेऽपि।

समानाधिकरणदुःखसमानकालीनभिन्नो दुःखध्वंसो मोक्ष इति तु कणभक्षाक्षचरणप्रभृतिपक्षसाक्षिणः। दुःखध्वंसो मोक्ष इत्युक्तौ संसारितादशायामतिव्याप्तिस्तदर्थं भिन्न इत्यन्तम्। तदानीन्तनदुःखध्वंसस्तु समानाधिकरणेन दुःखेन समानकालीन एव। दुःखसमानकालीनभिन्नो दुःखध्वंस इत्युक्तौ शुकादिमुक्तावव्याप्तिः अस्मदादिदुःखसमानकालीनत्वात्। समानाधिकरणदुःखसमानकालीनं यत्प्राक्तनं दुःखध्वंसादि तद्भिन्नः शुकादिचरमदुःखध्वंसो भवत्येव।

अत्र प्राञ्चो दुःखस्थलद्वयेऽपि मुख्यत्वं विशेषणमन्यथा प्रथममुख्यपदानुपादानेऽसम्भवश्चरमदुःखध्वंसस्यापि ज्ञानरूपदुःखसमानकालीनत्वात्प्रथमक्षणे चरमदुःखं द्वितीयक्षणे चरमदुःखसाक्षात्कारस्तृतीयक्षणे चरमदुःखनाशश्चतुर्थक्षणे ज्ञाननाश इति परिपाटीपाठेन चरमदुःखध्वंसस्य ज्ञानसमानकालीनत्वात्। चरममुख्यपदोपादानवैमुख्ये चरमज्ञाने निर्वाणतापत्तिः तस्यापि समानाधिकरणमुख्यदुःखनासमानकालीनत्वादिति साडम्बरं प्रपञ्चयन्ति।

ते तु गन्धवती पृथिवीत्यत्र मुख्यत्वं गन्धविशेषणतया कथं नोपादीयते। नहि गन्धशब्दो गौण्या वृत्त्या विरक्त एव, नापि स्वनियतमेव धर्मं लक्षयतीति नियमो, येन रूपाद्यादाय पाथःप्रभृतीन्नानुगृह्णीयादित्युक्त्या व्याकुलताक्षीरोदन्वति पातनीयाः। अस्माकन्तु केषुचिद्ग्रन्थेषु तथा लिखनं त्वरिततदनुरोधत्यागवैमुख्येनेति।

चरमदुःखध्वंसो(२) वा मुक्तिः। चरमत्वञ्च समानाधिकरणदुःखप्रागभावासमानकालीनत्वम्। एवञ्च समानाधिकारणदुःखप्रागभावासमानकालीनदुःखध्वंसोऽपवर्ग इति कणादमुनेर्निरवसाद-

---

(१) शाङ्कराः। प्रमाशिकजीवस्याविद्याप्रभवमिथ्याज्ञाननिवृत्तौ स्वस्वरूपाधिगमो भवतीति तेषामाशयः।

(२) मध्यनैयायिकाजम्भट्टादिमतम्।

(सेतु०)ष्पन्थाः परिशोधित इति सङ्क्षेपः।

अत्र ये केचित्साहसपराङ्मुखाः परमपुरुषार्थस्यास्यापुरुषार्थत्वं प्रार्थयन्ते। ते प्रष्टव्याः। कस्मादकस्मादसौ प्रकर्षकाष्ठानिष्ठप्रभावगरिष्ठानामधिक्षेपाय भवदीया भणितिः? तुल्यायव्ययत्वाद्वा १ कृत्यसाध्यत्वाद्वा २ भूयसा कालेन कृत्याऽनिर्वाहाद्वा ३ कर्तुमशक्यत्वाद्वा ४ अनिष्यमाणत्वाद्वा ५ ज्ञानाविषयत्वाद्वा ६ साक्षात्काराविषयत्वाद्वा ७ समानाधिकरणसाक्षात्काराविषयत्वाद्वा ८ उभयविधसाक्षात्काराविषयत्वाद्वा ९

न तावदाद्यो वादिसदां हृद्यः। तथाहि तुल्यायव्ययता हि सुखस्यापि हान्या निर्वाच्या, नच साऽपवर्गलाभतुल्या सुखहानेरनिष्टतया मोक्षाकाङ्क्षावद्भिरनभिमतत्वात्। अत एव कियती सुखखद्योतिका कियन्ति दुःखदुर्दिनानीति कुपितफणिफणामण्डलच्छायप्रतिमं सुखमपि हातुमिच्छन्ति मुमुक्षव इति महतामहता गिरः।

नापि द्वितीयो द्वितीयस्य हृदि विद्योतते। न तावत्साध्यतया कृतिसाध्यत्वं पुरुषार्थप्रापणसमर्थं स्वर्गेऽपि दुर्लभत्वात्। उद्देश्यतया कृतिसाध्यत्वन्तु स्वर्गवदपवर्गेऽपि संसर्गि, तत्त्वनुत्पन्नस्य दुःखस्य नोपायपरम्परयापि परिहारमर्हति, उत्पन्नस्य तु चरमस्यापि तस्य साक्षात्कारादेव नाशो भविष्यति। दृष्टानुरोधित्वात्कल्पनायाः सृष्टेरिति कथं कृतिसाध्यत्वमिति चेन्न येषां श्रवणादि न जातन्तेषां केषामपि मोक्षानिरीक्षणेन तत्प्रादुर्भावे श्रवणाद्यपेक्षाया वीक्षणेन श्रवणादेश्च कृतिकर्तव्यतया तद्द्वारा तस्यापि कृतिसाध्यत्वात्। यत्र कृत्यसाध्यकाशीमरणादिना तत्त्वसाक्षात्कारोत्पत्त्यनन्तरं मुक्त्युत्पत्तिः तत्रापि तन्मरणानुकूलकाशीवासादिकृतेस्तत्रोपयोगः। अपि च चरमदुःखोत्पत्तेस्तद्ध्वंसः साक्षात्काराद्भविष्यति, न च तदुत्पत्तिर्मोक्षानुकूलकृतिं विना तथाऽदर्शनादिति मोक्षे कृत्यपेक्षाया निष्प्रतिपक्षत्वात्।

नापि तृतीयः कल्पस्तृतीयाकाङ्क्षामनुभवितुं कल्पते। कर्तुमशक्यत्वं हीत्थं न तावदनुपभुक्तेषु कर्मसु सत्स्वेव मोक्षः अशेषविशेषगुणोच्छेदाभावात्। ननु मास्त्वशेषविशेषगुणोच्छेदस्तथापि चरमदुःखध्वंसेन मुक्तिर्भविष्यत्येव, चरमसाक्षात्कारतदाहितसंस्कारयोरिव पराभिमतपरापूर्वप्रायस्य स्वाभिमतासंजातप्रधानाङ्गापूर्वसमानशीलस्य चाधर्मादेः स्थितेर्मुक्त्यविरोधित्वादिति चेन्न तस्य नाशा-

(सेतु०) नङ्गीकारे भावकार्यत्वविरोधात्। काल एव तं केवलयिष्यति इति चेन्न अनेककल्पपरम्पराजनितानामपि कर्मणामवस्थानदर्शनेन तत्र प्रमाणाभावात्। संस्कारस्तु संसारसमयवर्त्यपि कश्चित् कराल-कालव्यालकवलमुपसर्पतीति तथाभ्युपेयते न नश्यतु वाऽनेहसाऽज्ञा-नवासनेव कर्मवासनापि तथापि यावत्कर्मवासना जीवन्ति तावत्क-र्मफलं जनयेयुरेवेति मुक्तस्यापि संसारित्वापत्तिः। तत्त्वज्ञानेन स्वेनेन दोषस्य सचिवस्य मोषान्नार्जयन्ति इति चेन्न धर्मादीनां स्वोत्प-त्ताविव स्वफलोत्पत्तौ दोषापेक्षायामक्षमत्वात् तथात्वे जीवन्मुक्ताव-गमकागमविरोधोऽसमाधेयः स्यात्। अन्येषाङ्कर्मणामवस्थानस्वी-कारेऽपि प्रारब्धकर्मभिर्जीवन्मुक्तेस्तथापि अङ्गीकार्यत्वात्। पूर्वमुदा-हृतमपूर्वद्वयसख्यन्तु स्वरूपयोग्यत्वबोधकप्रमाणेनैव व्युदस्यम। समयेनापसरणस्वीकारेऽपि तुष्यतु दुर्जन इति न्यायानुसारिणां तत्सातङ्कानामेवोचितः। अस्माकन्तु सुजनपदव्यां पदमर्पयतान्तैरेव सपक्षतयाऽऽतङ्कानाक्रान्तमानसानाङ्क्लेषान्तोपेण. तस्मादस्माद्द-शां प्रायश्चित्तादीनामुपशमकानामभावे कथं तदुपशम इत्येव भ-णितिः प्रणयिप्रीणनाय कल्याणिनी। मोक्षसाक्षिणस्तु चरमसाक्षा-त्कारस्य विपक्षस्तदाहितस्संस्कार एव, कर्कटीकुक्षिकोटरक्रोडा-ङ्कुरितार्भकगण इव तामां संस्कारं तु चरमं वृथाभारमसहमानस्स-मय एव समापयिष्यतीति। ननु ज्ञानमेव चरमं "ज्ञानाग्निस्सर्वकर्मा-णीति" वचनेन निखिलगीर्वाणवाणीवर्ण्यमानगुणगणमुकुन्दवदना-रविन्दमकरन्दवृन्दायमानेन जाताभिषेकतया लब्ध्वा बलं तं व्य-पनेष्यतीति चेत् ज्ञानस्य भोगवैमुख्येन कर्मापगमकत्वे प्रमाणाभा-वात्, भगवद्वचनस्य भोगमुत्पाद्य नाशकत्वेऽप्युपपत्तेः। न च तथा-सति ज्ञानस्य कः पुरुषार्थ इति चेत् विषयविपाकसमयानां तावद् झटित्युपभोगवत्तस्माद्भोगाग्रेसरेण ग्रस्तेषु कर्मसु सम्भवत्यपव-र्गोपसर्पणं नच तत्सम्भवति भोगोपायेन पुनः कर्मान्तराकर्षणात् तस्मादिष्टं कर्तुमशक्यम्। न च तदुपपद्यते भोगहेतुना दोषसाचि-व्यव्यतिरेकेण धर्माद्यजननात्। "ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुनेति" भगवद्वागप्यमुमर्थं कटाक्षेण सम्भावयति। भस्मीभू-तैर्बीजैरिवाङ्कुरस्य भोगापद्धतेः कर्मभिरपि दोषापायेन धर्मादेर-नाह्वानादित्यस्यापि तदभिप्रायस्य सम्भवात्।

(सेतु०) नापि तुर्यश्चतुरतरमनसां सचेतसां चमत्काराय धुर्यतामुरीकरोति विषमविपाकानामनन्तानां क्रमिकोपभोगेन हि तथा स्यात्। नच तदास्तिकानामन्तःकरणेऽस्ति कायव्यूहेन झटिति सर्वेषामुपभोगात्। अगस्त्यस्य योगर्द्धिसमृद्ध्या दण्डकामण्डलाम्भोनिधिपाननिरीक्षणेन समुपजातार्थजातसाक्षात्काराणामितरलोकदुष्करणतया कायनिर्माणप्रावीण्यस्य वर्णयितुमनुचितत्वात्। चिरकालोपनेयस्यापि पुरुषार्थे विरोधाभावाच्च।

नापि पञ्चमस्सञ्चरत्प्रपञ्चवचनरचनाचञ्चुराणामग्रतोऽञ्चितुं प्रभवति दुःखत्रयाभिहतेस्तदभावस्येष्यमाणत्वात्।

नापि षष्ठो दोषगणसङ्कटकष्टोदधिमुत्तरीतुमर्हति मोक्षस्य श्रौतशेमुषीसाक्षिकत्वात्।

सप्तमस्तु शप इव दुर्वाससा पदमपि दातुमसमर्थः श्रुतिप्रमाणकस्य सर्वज्ञभगवत्साक्षात्कारस्य विषयत्वात्।

अष्टमोपि तक्षकं दृष्ट्वा दष्ट इव स्वयमेव विनष्टं कथं भवन्तं जये स्थापयिष्यति सर्वविषयकजीवन्मुक्तिकालीनस्वसाक्षात्कारविषयत्वात्।

नवमोपि न मानेषु परिगणितेन केनाप्युपकर्तुमर्हः तादृशेश्वरसाक्षात्कारविषयत्वात्।

इयत्सु पक्षेषु क्षतिराक्षसीकुक्षिप्रक्षिप्तेषु प्रवृद्धतरवियोगभागिव दशमोपि नवदशमीं दशामतिशेते चरमदुःखसाक्षात्कारेण तदंशेन भाविनि दुःखध्वंसेऽलौकिकेन तदुत्पत्त्यनन्तरं नष्टेन समानाधिकरणेन समानकालीनेन विषयीकरणात्। अत एव वर्तमानोप्यचिरमनुभूयत इति प्राचामाचार्याणां सिंहनादः, उत्पत्तिक्षणस्यापि स्थितिक्षणत्वात्। तस्मात्पुरुषार्थगणनायां मूर्धन्यतया चरममुक्तिरितस्यास्य प्रेक्षावद्भिः परमप्रार्थनीयस्य नापुरुषार्थत्वमभ्यर्थनीयमिति।

सर्वमुक्तेरभावेन सर्वसाधारणत्वाभावेन कथमस्य पुरुषार्थत्वमिति त्ववशिष्यते तद्विचारयामः। सर्वमुक्तेरभाव इति कुतः? मोक्षोपायस्य श्रवणादेस्सर्वसाधारणत्वात्। शूद्रादेरपि जन्मान्तरेऽत्रैवर्णिकत्वसम्भवात्, काशीमरणादिना शूद्रादिशरीरावच्छेदेनापि मोक्षसम्भवाच्च। कस्यचित्संसारैकस्वभावत्वे स्वात्मनि तत्त्वशङ्कया

(सेतु०) कस्यापि मोक्षार्थमप्रवृत्त्यापत्तेश्च। न च शमादिमत्त्वेन स्वस्मिन्मोक्षभविष्यत्तामवगम्य प्रवृत्तिः, शमादेर्मोक्षप्रवृत्त्युत्तरकालीनत्वात्तन्मतेकार्यकारणभावस्य मोक्षत्वात्मत्वाभ्यामेव लाघवेनावच्छेदाच्च। तत्रेश्वरवारणाय जीवपदमात्रस्य देयत्वात्। तावता च शमादिमत्त्वेन कारणत्वं वक्तव्यम्। न च तदुपपद्यते एककारणस्यान्यकारणतानवच्छेदकत्वात्। शमादेरपि कार्यतया तत्रात्मनैव कारणत्वाच्च। अपि च सर्वेषां कुतो न मुक्तिः? श्रवणादावप्रवृत्तेरिति येषान्तत्र विश्वासस्तेषां तत्र प्रवृत्तिर्भवतु न सर्वेषामिति चेन्न स्यादेवं यदि कलिरेव सदा स्यात्। न त्वेवम्। एवञ्च प्रमादजातैः बुद्ध्या वा कृतैः सुकृतैः पर्यायेण वेदविश्वासस्य सर्वेषां सम्भवेन कुतो न सर्वमुक्तिः। नहि साङ्गोपाङ्गमपि कृतं वैदिकं कर्मासति च प्रतिबन्धके न फलतीति केनाप्यतिस्तोकेन वक्तुं शक्यते तस्मादस्ति सर्वमुक्तिः। दुःखत्वन्दुःखप्रागभावानधिकरणवृत्तिध्वंसप्रतियोगिशब्दवृत्तित्वं सिध्यतीत्यर्थान्तरतेति वाच्यम् बाधेन तदसिद्धेः। एवञ्च दुःखप्रागभावानधिकरण आत्मा न भवत्येव अन्योन्याभाववृत्तेस्सामयिकयानङ्गीकारेण तदधिकरणस्य तस्य तदनधिकरणत्वासम्भवात्। भवति त्वाकाशादिस्तद्वृत्तिध्वंसप्रतियोगिवृत्तित्वं तु बाधितमेवेति पक्षधर्मतामाहात्म्येन कालविशेषण एवागमिष्यति स एव च सर्वत्र मुक्तिकालः महाप्रलयकालोऽपि स एव। ननु दिगेव तथा कथं न सिध्यति तस्या अपि सर्वाधारत्वेन चरमदुःखध्वंससाधारणत्वासम्भवादिति चेन्न दिशो द्रव्यस्यैकतया दुःखप्रागभावाधिकरणस्य तद्भिन्नत्वासम्भवात्। दिगुपाधिः कोऽपि दुःखप्रागभावानधिकरणदुःखध्वंसाधिकरणं भविष्यतीति चेन्न तादृशस्तदुपाधिः कोपि सृष्टिदशायां नास्त्येव। प्राच्यादय एव हि दिगुपाधयस्ते च दुःखप्रागभावाधिकरणमेव। महाप्रलयदशायान्तु प्रमाणाभाव एव दिगुपाधौ प्राच्यादिव्यवहाराभावात् प्रकृतप्राच्यादेरेव तत्राङ्गीकारे तस्य दुःखप्रागभावाधिकरणत्वमेव प्राच्याद्यन्तरस्य तद्विलक्षणस्य दिगुपाधेर्वा स्वीकारे प्रमाणाभावात् तस्मात्काल एव तादृशीभूयाऽनुभूयत इति रहस्यम्। ननु सृष्टिदशायां भास्वदादिक्रियाः कालोपाधयः खण्डप्रलये तु परमाणुस्य द्वानम् एवं च महाप्रलये कश्चिदुपाधिरस्ति तथा च कथं महाप्रलये

(सेतु०) नार्थान्तरता तत्र तत्र दुःखाभावात् अग्रे सृष्ट्युपगमेन दुःखप्रागभावोपगमात्। दुःखेत्यकरणे दृष्टान्तासिद्धिः आकाशादीनामपि दुःखान्योन्याभावाद्यधिकरणत्वात्। दुःखप्रागभावानधिकरणवृत्त्यभावप्रतियोगिवृत्तीतिकरणे दुःखान्योन्याभावमादायार्थान्तरता तस्य दुःखप्रागभावानधिकरण आकाशे सत्त्वात्। हेत्वर्थस्तु भाववृत्तित्वे सति कार्यमात्रवृत्तित्वात्। भाववृत्तित्वादित्युक्तावात्मत्वादौ व्यभिचारः आत्मादिध्वंसाभावात्। कार्यवृत्तित्वादित्युक्तावनन्तत्वे व्यभिचारः ध्वंसाप्रतियोगित्वस्य तस्याकार्ये आत्मादाविव कार्यध्वंसेपि सत्त्वात् तदर्थं मात्रेति। इदानीं ध्वंसत्वे व्यभिचारः तदर्थं भाववृत्तित्वं सतीति। भाववृत्तित्वे सति कार्यवृत्तित्वादित्युक्तावनन्तत्वे एव व्यभिचारः भाव आत्मादौ कार्यध्वंसेपि सत्त्वात्।

परे तु भावकार्यवृत्तित्वादित्येव हेतुरात्मत्वाद्यनन्तत्वध्वंसत्वानि तु न तथा कस्यचित्कार्ये कस्यचिद्भावे कस्यचिदुभयोः सत्त्वेऽपि भावरूपे कार्ये कस्याप्यवृत्तेरेवञ्च ये धर्मा आत्मेतरपरमाण्वादिवृत्तिध्वंसप्रतियोगिवृत्तयस्ते द्रव्यत्वादयः सपक्षा एव, ये तु सुखत्वादयो न तथा ते पक्षसमा एवेति सर्वमनवद्यमित्याहुः।

ननु बाधादेव शब्दवृत्त्यर्थान्तरवारणे आत्मकालान्यवृत्तिध्वंसप्रतियोग्यवृत्तीतिपक्षविशेषणं वर्द्धमानोपाध्यायैः किमित्युपात्तमिति चेन्न बालान्प्रति बाधस्फुरणार्थं तदुपादानात् बाधबोधवतोऽन्तस्य वैयर्थ्यात् अन्यथा महानसादिवह्निरहितपर्वतो वह्निमान् धूमादित्यनुमानापत्तेः। सर्वमुक्तिसिध्यैव प्रत्येकमुक्तिरपि सिध्यतीति न सा पृथक् साध्यते। अनयैव रीत्या सुखत्वादिकं पक्षीकृत्य तदुच्छेदोपि साध्यः। श्रुतयश्च मोक्षसाधिकाः श्रुत्यभ्यासदक्षेभ्य एव श्रोतव्या इति सङ्क्षेपः।

ननु द्रव्यादय इवाभावाः किमिति नोपदर्शितास्तेषामपि मोक्षोपयोगित्वादिति चेन्न अभ्युपगमसिद्धान्तसिद्धस्यानभिधानेपि क्षत्यभावात्। अन्यथा न्यायदर्शने मनस इन्द्रियत्वम्प्रति पर्यनुयोगापत्तेः॥

ननु पदार्थधर्मेत्यत्र तत्पुरुषे पदार्थानां पूर्वपदार्थानां क्रियान्वय इति चेन्न धर्मस्य धर्म इत्येवमवक्तव्यतयाऽमुकस्य धर्म इति वक्तव्यतया तेषामपि क्रियान्वयात्। मोक्षजनकश्चात्मेतरेभ्यो भिद्यत

(सेतु०) इत्यात्मविशेष्यकमेव ज्ञानं न त्वात्मत्वमितरभिन्नवृत्तीत्याकारकमपि श्रवणादिविधायकश्रुतावात्मनः प्राधान्यश्रुतेः । एतावता ग्रन्थेन मोक्षः प्रयोजनं पदार्था अभिधेयाः प्रयोज्यप्रयोजकभावश्च सम्बन्ध उपवर्णितः ॥

(न्यो०) अथास्तु संग्रहात्तत्त्वज्ञानमवधारणे तु व्याघातः। तथाहि—यदि संग्रहादेव तत्त्वज्ञानं सूत्रकारस्य न स्यात् संग्रहाभावात् । अथ संग्रहात् भवत्येव, तदसत्, मन्दमतेस्सत्यपि संग्रहे तदभावात् । अथ संग्रहात्तत्त्वज्ञानमेव तन्नास्ति दुःखादेरपि दर्शनात् इत्याशङ्कापरिहारार्थं तच्चेश्वरचोदनेत्यादि ।

तथा ह्यस्मदादेः संग्रहादेव तत्त्वज्ञानं, यच्च सूत्रकारस्य ज्ञानं तच्चेश्वरचोदनाभिव्यक्तात् धर्मादिविशेषादेवेति । न च स एवास्त्विति वाच्यम् अस्मदादेस्तथाविधधर्माभावात् । तथा संग्रहात् भवत्येव तत्त्वज्ञानम् । यदि नाम तच्चेश्वरचोदनाभिव्यक्ताद्धर्मादेवेति समुच्चीयमानावधारणमनिर्दिष्टप्रतिषेधार्थम् । मन्दमतेस्तु विशिष्टधर्माभावान्न भवत्यपि । अस्तु वा संग्रहात्तत्त्वज्ञानमेव न दुःखादिकम् । यदि नाम ईश्वरचोदनाभिव्यक्ताद्धर्मादेव यस्य विशिष्टधर्मसद्भावः तस्य अल्पीयसा प्रयासेन तत्त्वज्ञानं सम्पद्यत इति । यदि च कस्माद्धर्मस्यादौ सूत्रे व्याख्यानमीश्वरस्य वा नमस्कार इति चोद्यपरिहारार्थम् । तच्च तत्त्वज्ञानमीश्वरचोदनाभिव्यक्ताद्धर्मादेव भवतीत्यतस्तस्यादौ प्रतिज्ञानमीश्वरस्य च नमस्कार इति । ईश्वरस्य चोदना संकल्पविशेषोऽस्येदमस्मात्सम्पद्यतामिति । तयाभिव्यक्तात्सहकृताद्धर्मात्तत्त्वज्ञानमिति । तया धर्मस्य सद्भावे किं प्रमाणमित्यपेक्षायामिदमेवावर्तनीयम्–ईश्वरस्य चोदनेति । चोदना हि प्रवर्तकं वाक्यम् । तत्प्रधानत्वाद्वेदश्चोदनेति । सा चेश्वरप्रणीतत्वात्प्रमाणम् । तयाऽभिव्यक्तात्प्रकाशिताद्धर्मादेवेदामिति ।

(भा०) अथ के द्रव्यादयः पदार्थाः, किञ्च तेषां साधर्म्यं वैधर्म्यञ्चेति ।

तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि सामान्यविशेषसञ्ज्ञयोक्तानि नवैवेति । तद्व्यतिरेकेणान्यस्य सञ्ज्ञानभिधानात् ।

(सू०) अथेति । द्रव्यगुणाद्याः के कतिविधाः । तेन द्रव्यगुणेत्यादिप्रागुक्तवाक्यादेव द्रव्यगुणादेरवगमात्तेषु प्रश्नासंभवेऽपि न क्षतिः । तेषां पदार्थानां साधर्म्यमनुगतो धर्मः वैधर्म्यमितरव्यावृत्तो धर्मः ।

उत्तरम्—तत्रेति । तत्र द्रव्यादिषु मध्ये सामान्यविशेषसंज्ञयोक्तानि पृथिव्यादीनि नवैव द्रव्याणीति योजना । द्रव्यत्वं

(सू०)यत्सामान्यं तदवान्तरधर्मेण या संज्ञा पृथिवीजलेत्यादिका तयोक्तानि विभक्तानि पृथिव्यादीनीति नवैव द्रव्याणीति तदर्थः। सामान्यविशेषसंज्ञयेत्यस्य जातिविशेषप्रवृत्तिनिमित्तकसंज्ञयेत्यर्थस्तु न शक्यः कालदिगादिसंज्ञायाश्च पारिभाषिकत्वेन जात्यवच्छिन्नशक्तिमत्त्वाभावात्। ननु तमसोऽप्यतिरिक्तद्रव्यस्य सत्त्वात् पृथिव्यादीनि नवैव द्रव्याणीति व्याहतमत आह तद्व्यतिरेकेणेति। पृथिव्यादिसंज्ञाव्यतिरेकेण मुनिना संज्ञान्तरेण द्रव्यस्याविभजनात् इत्यर्थः। तथाच पृथिव्यादिभिन्नं तमो न द्रव्यं किन्तु महाप्रभात्वावच्छिन्नात्यन्ताभावः। तत्रैव च नीलाद्यारोपरूपा नीलं तमश्चलतीत्यादिप्रतीतिरित्याचार्याः। बाधकं विनोक्तप्रतीतेर्भ्रमत्वायोगान्नीलरूपवत्त्वेन तमः पृथिव्येव तस्य चालोकाभावव्यङ्ग्यत्वान्न प्रकाशे प्रत्यक्षमिति तु कन्दलीकृतः।

(सेतु०) एतान् ज्ञात्वा जातजिज्ञासः पृच्छति अथेति। तत्र सामान्यान्तानां संख्याप्रश्नोऽपि अन्यथा उत्तरे तदभिधानानुपपत्तेः। समवायविशेषयोस्तु संख्योत्तरादर्शनेनाप्रश्नो प्रतीयते अन्यथा संख्यान्तरासम्भवेपि समवाय एक इति विशेषा अनन्ता इत्युत्तरं स्यादेव। अस्तु वा तयोरपि संख्याप्रश्नः समवाय एकवचनेन विशेषे बहुवचनोच्चारणेन तयोरप्युत्तरप्राप्तेः। ननु समवाये भवत्वेकत्वप्राप्तिरेकवचनस्य तत्र शक्तेर्बहुवचनस्य तु बहुत्वसंख्यायां शक्तिः सा च त्रित्वादिः परार्द्धपर्यन्ता एवञ्च विशेषे का संख्या ग्राह्येति चेन्न एकैकनित्यद्रव्यव्यावर्तकतया तेषां सिद्ध्यभिधानेन नित्यद्रव्यसमसंख्यात्वप्राप्तौ नित्यद्रव्याणां चानन्तत्वेन तेषामप्यनन्तत्वप्राप्तेः। अनन्तत्वं यदि संख्याविशेषस्तदा तयोत्तरमपि। यद्यसंख्यत्वं तदा संख्याभावेनैवोत्तरं संख्याप्रश्ने तदभावेनोत्तरस्योचितत्वात्, अत्र गेहे को घटस्तिष्ठति इति प्रश्ने न कोपीत्युत्तरवत्। एतेन

(सेतु०) कथमज्ञस्य जिज्ञासोर्विशेषसमवाययोर्न संख्याप्रश्नस्तेन तयोरनन्तत्वैकत्वयोरज्ञानादिति निरस्तम्। एकोऽनन्तश्च विभागौ न भवतः न्यूनाधिकसंख्याव्यवच्छेदकफलो हि सः। न चैकत्वान्न्यूनाऽनन्तत्वादधिका वा संख्या सम्भवति। ननु यथाऽनन्तानां पृथिवीत्वादिभिरुपाधिभिर्विभागस्तथा विशेषाणां किमिति न कृतस्तत्रापि विशेषो द्विविधोऽणुमहद्वृत्तिभेदादिति विभागसम्भवादिति चेन्न स्वतन्त्रेच्छस्य नियोगपर्यनुयोगयोरनर्हत्वात्। रहस्यान्तरमत्रत्यं कणादरहस्ये।

किञ्चेति चकारेण के द्रव्यादय इति पूर्वप्रश्नसमुच्चयो वैधर्म्यं चेति साधर्म्यसमुच्चयः।

अथशब्दोऽत्र मङ्गलं केवलं न त्वानन्तर्यार्थोऽपि अवध्यवधिमतोरभावात्। न च प्रयोजनादिज्ञानानन्तरं वैधर्म्यञ्चेति प्रश्न इत्यन्वयः प्रश्नपदाध्याहारे मानाभावात् तेन विनाऽवधिमात्रप्राप्तावपि अन्वयात्। न च केवलमङ्गलत्वेऽनन्वयेऽपार्थकता एकवाक्याभिप्रायेणाप्रयुक्तत्वात्।

गुणाद्याश्रयतया प्रधानं द्रव्यं प्रथममाह तत्रेति। तत्र द्रव्यादिषु मध्ये। ननु विभागेन द्रव्यस्य नवत्वं प्राप्तं तत्र च किं मूलमित्यत आह सामान्येति। सामान्यसंज्ञा द्रव्यं विशेषसंज्ञा पृथिवीत्यादिका तया सूत्रकृता नवैवोक्तानीत्यर्थः। एतावता सूत्रकार एवात्र प्रमाणमिति भावः। एतेन विभागवचनादेव नवत्वे लब्धे नवग्रहणं व्यर्थमिति शङ्का निरस्ता मनांसि नवैवेत्यन्वयाख्यानात्। भवतु वा तथाऽन्वयस्तथापि न नवशब्दैवकारयोर्वैयर्थ्यम् यो विभागस्य तथा सामर्थ्यं न जानाति तत्साधारणबोधार्थं तयोरुपादानात्। तत्रैवकारस्त्रिविधः। क्वचिद्विशेष्यसङ्गतो यथा पार्थ एव धनुर्धर इत्यादौ। तत्र विशेषणतावच्छेदकस्य विशेष्यादन्यस्मिन् योगाभावप्रतीतेस्सोऽन्ययोगव्यवच्छेदार्थः,—पार्थ एव धनुर्धर इत्यत्र पार्थादन्यो न धनुर्धर इत्यर्थप्रतीतेः। क्वचिद्विशेषणसङ्गतो यथा शङ्खः पाण्डुर एवेत्यादौ। अत्र विशेषणतावच्छेदकस्य विशेष्येऽयोगव्यवच्छेदः प्रतीयते, शङ्खः पाण्डुरत्वायोगवान्नेति प्रतीतेः। क्वचित्क्रियासङ्गतो यथा नीलं सरोजं भवत्येवेत्यादौ। अत्र विशेषणतावच्छेदकस्यात्यन्तायोगव्यवच्छेदः प्रतीयते, सरोजे नैल्यस्यात्यन्तमयो-

(सेतु०)गो नास्तीति प्रतीतेः । अत्र तु नवैव द्रव्याणीत्यत्र नवेत्वे-त्यस्य विशेष्यत्वेन चातिरिक्ते द्रव्यत्वं नास्तीत्यर्थः ।

अत्र मीमांसकाः । न तावत्तमो नास्त्येव तस्य तमालस्तोमश्यामलस्याध्यक्षसाक्षिकत्वात् । नाप्यभावेष्वसौ सम्भावयितुं शक्यः घटो नास्तीतिवत् अमुको नास्तीति प्रतीत्यापत्तेः । अपि चाभावत्वे तेजोभावत्वमस्य वाच्यम् तेनैव विरोधावधारणात् । तत्र न तेजोऽन्योन्याभावः सः भास्करकरनिकराक्रान्तेषु प्राङ्गणादिषु तद्व्यवहारापत्तेः । नापि प्रत्येकं प्रागभावध्वंसात्यन्ताभावाः, यत्किञ्चित्तेजःप्रतियोगिकानां तेषां यत्किञ्चित्तेजोयोगिन्यप्यधिकरणे सत्त्वात् । नापि यावत्प्रतियोगिकास्ते तथा, प्रागभावध्वंसयोः सामान्याभावत्वस्यासम्भवेपि प्रतियोगिमतीव प्रागभाववति ध्वंसवति वाऽनुपगमात्, अन्यथाऽऽद्यक्षणे घटे रूपसामान्यात्यन्ताभावापत्तिः । नापि यावत्प्रतियोगिकाः समुदिताः प्रागभावादयस्तथा, प्रत्येकावृत्तिश्च धर्मो न समुदायवृत्तिरिति न्यायेन समुदितेष्वपि यावत्प्रतियोगिकत्वाभावात् । नापि यावांस्तेजःसंसर्गाभावस्तमः, देशान्तरवर्तिनां प्रागभावादीनां देशान्तरेऽसत्त्वेन देशमात्रे तमोव्यवहारविलोपापत्तेः । अपि चैवं विशेषाभावकूटस्य तमोव्यवहारभाजनत्वे तत्र भिन्नाभिन्नानां प्रतियोगितावच्छेदकानामनुपस्थितौ तमःप्रत्यक्षानुपपत्तिः प्रतियोगितावच्छेदकप्रतियोगिज्ञानस्याभावप्रत्यक्षकारणत्वात् । किञ्च तमःशरीरे प्रागभावप्रध्वंसयोरपि प्रवेशेन तयोश्च कदाचिदेव प्रत्यक्षतया तद्घटिततमसः कथमन्यदा प्रत्यक्षत्वमिति नाभावस्तमः । नापि विशेषसमवायौ प्रत्यक्षत्वात् । नापि सामान्यं पृथिव्यादिवृत्तित्वे सति पृथिवीत्वादिवदालोकेपि ग्रहणापत्तेः । आगन्तुकव्यक्त्यन्तरवृत्तित्वे तमस उपलम्भकाले तस्यापि उपलम्भापत्तेः । तादृशव्यक्त्यन्तरकल्पनायां गौरवेण तादृशव्यक्त्यन्तराभावाच्च । एवञ्च न कलृप्तप्रत्यक्षपृथिव्यादिवृत्तिस्तमालोकसमवधाने तद्ग्रहेपि तदग्रहात् । नाप्यतीन्द्रियवृत्तित्वं वायुत्वादीनामिवाप्रत्यक्षत्वापत्तेरिति व्यक्त्यन्तरं कल्पनीयम् तत्र च गौरवमेव ।

अत एवाचार्याः—"तेषां व्यञ्जकवैचित्र्येपि व्यक्त्याश्रयसंबन्धिभामुपलम्भमन्तरेणानुपलम्भानियमादिति" । अयमाशयः । सा-

(सेतु०)मान्यं सत्तमो निर्व्यक्तिकं सव्यक्तिकं वा ? आद्ये "सामान्यस्य व्यक्त्युपलम्भमन्तरेणानुपलम्भनियमादिति" व्यक्तेरुपलम्भप्रमां विना सामान्यस्यानुपलम्भनियमाद्प्रमानियमाद्यस्य व्यक्तिर्न प्रमाणसिद्धा तत्सामान्यमप्रमाणमित्यर्थः । निर्व्यक्तिकस्य सामान्यत्वव्याघातादित्याशयः । अत एवोक्त"मुपलम्भने वा तत्त्वव्याघातादिति"। निर्व्यक्तिकस्य प्रमाणसिद्धत्वे सामान्यत्वव्याघातादित्यर्थः । निर्व्यक्तिकं सामान्यतया प्रमाणसिद्धं न भवति सामान्यत्वस्य व्यक्तिघटितत्वादित्यभिप्रायः । द्वितीये न तु क्लृप्तानां पृथिव्यादीनां व्यक्तित्वं न वाऽक्लृप्तस्य कस्यचिदित्युक्तमेव । ननु यथा तैले गुणवत्त्वेन व्यञ्जकेन द्रव्यत्वमभिव्यज्यते न च तद्दशायां पृथिवीत्वग्रहनियमो गन्धवत्त्वाग्रहे, तैलं पृथिवी जलं वेति सन्देहाद्गन्धवत्त्वेन तु व्यञ्जकेन पृथिवीत्वग्रहस्तथाऽऽलोकस्य व्यञ्जकत्वे पृथिवीत्वग्रहो यदा त्वालोकाभावो व्यञ्जको भवति तदा पृथिव्यामेव तमो गृह्यत इत्यस्तु पृथिवीसामान्यमेव तम इति चेन्न लाघवेन चाक्षुषसामान्यत्वेनैवालोकव्यङ्ग्यत्वात् तमोभिन्नत्वाविशेषणे परस्पराश्रयप्रसङ्गात् सिद्धे तमसि सामान्ये तमोभिन्नत्वं विशेषणं विशेषणे चालोकाव्यंग्यतमोरूपचाक्षुषसामान्यसिद्धिरिति । तथाहि यच्चाक्षुषं सामान्यं तदालोकव्यङ्ग्यमित्यत्र तमसि व्यभिचारे तमोभिन्नत्वं विशेषणं घटते व्यभिचारश्च तमसः सामान्यत्वसिद्धौ स्यात् सामान्यत्वासिद्धिश्च न निर्विशेषणायां व्याप्तौ व्यापकनिवृत्त्या व्याप्यनिवृत्तेस्सामान्यत्वमूर्द्धनि पर्यवसानात्,सविशेषणायान्तु सम्भवति तमोभिन्नत्वमादाय पर्यवसानसम्भवादिति । विशेषत्वमपि तमसो न सम्भवति न तावदपवरकादिविशेषत्वं महत्तस्तमोपरमाणुपरिहारेणापि वृत्तेः । आश्रयपरिहारेणापि विशेषवृत्तौ मानाभावात् । नाप्यात्मादिगतत्वं विशेषस्याव्याप्यवृत्तित्वे प्रमाणाभावात् । अपवरकादितमस आत्माद्यव्यापकत्वात् । तत्रात्माकाशादीनां सर्वेषां सत्त्वेन विनिगमकाभावेनैकाविशेषत्वस्य वक्तुमशक्यत्वाच्च, विशेषानेकवृत्तित्वाभावाच्च । नापि द्रव्यान्तरमेव तमो रूपविशेषाश्रयत्वेन कल्पनीयम्, तत्र प्रमाणाभावात् । अत एवोक्तं "विशेषस्याश्रयोपलम्भमन्तरेणानुपलम्भनियमादिति"। अर्थस्त्वत्रापि सामान्यन्यायेन उत्तरफक्किकापि तथैवावतारणीया । समवा-

(सेतु०) योपि भवन् घटपटत्वादीनां क्लृप्तानां समवायः प्रबलालोकेपि तेषां समवायप्रतीतेः। तथाच सम्बन्ध्यन्तरमेवाप्रामाणिकं वक्तव्यं तत्र च समवायस्य सम्बन्ध्युपलम्भमन्तरेणानुपलम्भनियमादिति किरणावली। एवञ्च व्यञ्जकानां प्रमाणानां वैचित्र्येपि बाहुल्येपि व्यक्त्यादीनामप्रामाणिकत्वे सामान्यादीनां केनापि प्रमाणेन ग्रहणञ्च भवति व्यक्त्यादिरहितानां च प्रमाणपरिशीलितानां सामान्यत्वादिव्याहतिः। सामान्यविशेषत्वयोर्व्यक्तिगर्भत्वात्सम्बन्धस्य सम्बन्धिनं विनानुपपत्तेरिति किरणावल्याम् परिशिष्टप्रणेतुरभिप्रायः। तस्माच्च सामान्यादीनां विशेषोऽन्धकार इति। नापि कर्म क्लृप्तानामपवरकादीनां कल्पनीयस्य वा कर्मत्वम् तेषां पूर्वदेशविभागाद्यापत्तेः। गुणत्वे च नातीन्द्रियेषु गुणेष्वन्तर्भावः ऐन्द्रियकत्वात्। नापि द्वीन्द्रियग्राह्येषु त्वचाऽपरिच्छेदात्। नाप्येकेन्द्रियग्राह्येषु मनोग्राह्यत्वस्योभयासिद्धत्वेन गुणत्वे सति रूपत्वं तु स्यात् तल्लक्षणसत्त्वात्, न च तत्संभवति लाघवेन चाक्षुषरूपस्यैवालोकव्यङ्ग्यत्वात्। तमोभिन्नत्वविशेषणेऽन्योन्याश्रयात्। तस्माद्द्रव्यत्वमपरिशिष्यते। तत्र न चक्षुरग्राह्येषु वाय्वादिष्वन्तर्भावः चक्षुर्ग्राह्यत्वात्। नापि तेजसि भास्वररूपराहित्यात्। न जले शैत्याभावात्। न पृथिव्यामुद्भूतनीलरूपवत्पृथिव्या उद्भूतस्पर्शवत्त्वनियमात्। नच मणिप्रभासहचरितनीलभागे व्यभिचारः तदनङ्गीकारात्, मणिनैल्यस्यैवारोपात्। नयनगतपित्तद्रव्ये व्यभिचारवारणाय नीलेति। तस्माद्द्रव्यान्तरमेव तम इति कथं नवैवाति।

अत्रोच्यते। न तावच्चाक्षुषसाक्षात्कारत्वेनालोकेतरविषयकचाक्षुषसाक्षात्कारत्वेनालोकव्यङ्ग्यताऽऽलोकाभावग्रहे व्यभिचारात् किन्त्वालोकाभावेतरालोकेतरचाक्षुषसाक्षात्कारत्वेन। एवं च तमस आलोकाभावभिन्नत्व आलोकं विना चक्षुर्ग्राह्यत्वं न स्यात्। न चान्धकारेतरेत्यादिविशेषणमन्योन्याश्रयात्। सिद्धे हि तमसि द्रव्यान्तरे तच्चाक्षुषे व्यभिचारवारणाय तद्भिन्नत्वं विशेषणम्, सिद्धे च तस्मिन्विशेषणे आलोकं विना कथं चाक्षुषत्वमिति दूषणापाकरणे द्रव्यान्तरत्वसिद्धिरिति।

केचित्त्वालोकेतरेति न विशेषणम् आलोकेऽवयविन्यवयवस्य ग्राहकत्वात् त्रसरेणुरूपेऽवयविनि आलोकान्तरस्य वा व्यञ्जकत्वा-

(सेतु०) दित्याचक्षते ।

तन्न, न तावदसम्बद्धस्यालोकस्य ग्राहकता अनालोकापवरकवस्तुग्रहापत्तेर्नापि सम्बन्धत्वमात्रेण बाह्यालोकसम्बद्धापवरकभित्तिसम्बद्धस्यापवरकान्तःस्थितस्य घटादेर्ग्रहणप्रसङ्गात् । नापि साक्षात्सम्बन्धत्वेन तदपेक्षया संयोगत्वस्य जातितया संयुक्तत्वस्य लघुत्वादवयवावयविनोश्च संयोगाभावादित्येके । तन्न, एवं हि रूपादिव्यञ्जकताऽऽलोकस्य न स्यात् रूपादिना संयोगाभावात् किन्तु यैस्सम्बन्धैरिन्द्रियं ग्राहकं तैरालोकोऽपि । एवं च यथा चक्षुषस्संयोगस्य द्रव्यग्रहे संयुक्तसमवायस्य रूपादिग्रहे संयुक्तसमवेतसमवायस्य रूपत्वादिग्रहे सम्बद्धविशेषणताया घटाभावादिग्रहे ग्राहकता तथाऽऽलोकस्यापि इति संयोगेनैवालोको ग्राहक इति रिक्तं वचः । समवायेन तु चक्षुरिवालोकोपि न ग्राहकः । आलोकग्रह आलोकसमवायत्वस्य घटादिग्रह आलोकसंयोगत्वस्य वाच्यत्वेऽननुगमात् । साक्षात्सम्बन्धत्वस्य द्रव्यग्रहे वाच्यतायां संयोगत्वस्य लघुत्वात् । ननु द्रव्यस्थले आलोकग्रहे समवायत्वेन तदितरस्थले संयोगत्वेन ग्राहकतायां कार्यभेदान्नाननुगम इति चेन्न कार्यकारणभावान्तरकल्पनापेक्षयाऽऽलोककार्यतायामालोकेतरविषयत्वविशेषणादानस्यैव लाघवेनौचित्यात् । ननु मास्त्ववयवावयविनोः संयोगः परम्परावयवावयविनोस्तु स स्यादेव तथाचालोकः कथं नालोकम्प्रकाशयेत् इति चेन्न विषयरूप आलोके सति तद्विलम्बेन विलम्बाभावे तस्यालोकाप्रकाश्यत्वात् । एवं सति कालादीनामपि घटादिकारणता न स्यात्तद्विलम्बेन विलम्बाभावात् । विलम्बेन विलम्बाभावेपि यदि प्रमाणान्तरासिद्धत्वात्तत्र कारणत्वाङ्गीकारस्तदाऽऽलोकाभावेतरविषयकचाक्षुषत्वेन लाघवेन कार्यत्वे भवत्वालोकेऽप्यालोकप्रकाश्यताऽवयवावयवस्यावयवित्वेन संयोगाभावात् ।

वस्तुतस्तु आलोककारणतायाम् क्लृप्तायां तत्सम्बन्धेनालोकस्थले समवायत्वेन वा कारणत्वकल्पनं न दोषाय फलमुखगौरवस्यादोषत्वात् । यदि वाऽऽलोककारणतामुपजीव्य न सम्बन्धताग्रहः, किन्त्वन्वयव्यतिरेकाभ्यामेव तदाऽवयवावयवसंयोगस्य बाध्यत्वादित्यसावपि पन्थास्तार्किकपथप्रस्थितैः परिशीलनीयः ।

(सेतु०) यत्तु द्रव्यग्रह एवालोकस्य कारणता रूपग्रहविलम्बस्तु तद्विलम्बादेवेति, तन्न, द्रव्यग्रहस्य रूपाग्राहकत्वात् । अन्यथा प्रभाप्रत्यक्षतापक्षे रूपप्रत्यक्षतापत्तेः ।

घटाभावादिग्रहे नालोकस्यालोकत्वेन कारणता, किन्तु योग्यानुपलब्धिकारणतायां योग्यताघटकत्वेनोपयोगीत्यपि कश्चित् । एतन्मते ऽभावेतरविषयकचाक्षुषत्वेनैव जन्यतेति । नचैवं चक्षुषोपि चक्षुष्ट्वेन जनकता न स्यात् प्रमाणं विना प्रमानुत्पत्तेरित्यलं प्रासङ्गिकेन ।

ननु मास्तु तमसः चक्षुर्ग्राह्यत्वं तामसमिन्द्रियान्तरन्तद्ग्राहकं भविष्यति स्थितिस्तु तस्य गोलक एव सर्पानामेकस्मिन्निन्द्रियद्वयाधिष्ठानत्वदर्शनादिति चेन्न परस्पराश्रयत्वप्रसङ्गात् । तमसो द्रव्यत्वसिद्धौ तामसेन्द्रियसिद्धिः तत्सिद्धौ च द्रव्यत्वसिद्धिरिति ।

वस्तुतस्तु तेजस्तमसोस्तावद्विरोधः सकलानुभवसिद्धः स घटत्वपटत्वयोरिव भावयोर्वा घटाभावयोरिव भावाभावयोर्वा ? आद्ये भावद्वयमभावद्वयं च स्यादिति गौरवम् तथाचैकस्य भावत्वमपरस्याभावत्वमुचितम् तत्र तमसो भावत्वे तेजसोऽभावता स्यात् । तथाच तत्रारोपणीयस्य भास्करोष्णादेरधिकरणान्तरं कल्पनीयम् पृथिव्यादेस्तदनाश्रयत्वादिति गौरवमेवं च तेजो भावस्तमस्त्वभाव इति युक्तं तत्रारोपणीयस्य नैल्यादेष्पृथिव्यादौ सुप्रसिद्धत्वात् । अपिचोद्भूतनीलरूपवत उद्भूतस्पर्शवत्त्वनियमात्तमो न तथा न च पृथिव्यान्तथा परस्पराश्रयत्वप्रसङ्गात् । तथाहि तादृशव्याप्तौ बाधकाभाव उद्भूतस्पर्शरहितस्य नीलरूपवतो द्रव्यान्तरस्य सिद्धिः सिद्धे च तस्मिस्तद्वारकविशेषणोपादानमिति । नीलरूपप्रतीतिस्तु स्मर्यमाणारोपेण भ्रान्ता । तत्र च नालोकापेक्षा नीलरूपस्य स्मर्यमाणत्वात् आलोकाभावस्य च निरपेक्षत्वात् स्वव्याघातकत्वात् प्रतियोग्यग्राहकतयाऽनुपलब्धियोग्यतायामघटकत्वाच्च विशेषणज्ञानविशेष्यभानसामग्रीभ्यामसंसर्गाग्रहे विशिष्टबोधस्याप्रतिहतत्वादिति । किञ्च तामसेन्द्रियस्वीकारे तेजस्तमसोः समूहालम्बने चक्षुस्तामसेन्द्रियप्रयोज्यजात्योस्सङ्करापत्तिः ।

नन्वालोकाभाव आरोपितनीलं रूपं तम इति कन्दलीकारमतमेवास्त्विति चेन्न नीलं तम इति प्रतीतावुभयोरंशयोर्नील-

रूपविषयत्वेऽभावभानांशस्याभावेन तथा भ्रमस्यासम्भवात्। आरोपविषयाविषयकस्य भ्रमस्य ब्रह्मणापि समर्थयितुमशक्यत्वात् । न च यथा प्रभाऽभानेपि तद्रूपं भासते तथा प्रकृतेपीति वाच्यम् आरोपविषयाभानेऽतद्वति तत्प्रकारकत्वस्य भ्रमत्वस्य वक्तुमशक्यत्वात् । ततः संयुक्तसमवायादिसत्त्वे सामग्रीसम्पत्तौ नीलरूपभानस्य सम्भवात् प्रकृते च विशेषणादिरूपसामग्र्या विशिष्टज्ञानजनकत्वात् । न च नीलवत्तमोवादिति प्रत्ययार्थः मत्वर्थकल्पनायां प्रमाणाभावात् ।

यत्त्वालोकाभाव आरोपितनीलरूपस्य तमस्त्वे तमस्त्वं ज्ञानगर्भं चाक्षुषे चेतसि कथं चकास्तीति ।

तदचारु । प्रौढप्रकाशकयावत्तेजःसंसर्गाभावत्वेपि प्रकाशप्रवेशेन दोषाविषम्यात् । उपनीतभानशरणानुसरणसिद्धान्तस्यापि साम्यात् । यदपि तमोनीलयोरैक्ये नीलिमा तम इत्यनुभवः स्यान्न तु नीलं तमः इति तदपि चिन्ताबीजमधिरोहति । ननु गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वतीत्यतो नीलशब्दस्य गुणपरत्वे नीलस्तम इति प्रयोगः स्यादित्येव बीजमिति वाच्यमिति चेन्न अस्य नीलं रूपमित्यादौ स्फुटं व्यभिचारित्वेन गुणशब्दात् पुंलिङ्गस्य विशेष्यतायां तथा नियामकत्वात् प्रकृते च तमःशब्दस्य नपुंसकस्य विशेष्यतायां नपुंसकताया एवोचितत्वात् । नन्वेका नीला रूपव्यक्तिरिति गुणे स्त्रीलिङ्गतापि स्यादिति चेत् यद्यस्ति प्रामाणिकप्रयोगस्तदा स्यात् । नन्वेवं नीलो गुणो नीलं रूपं नीला द्रव्यव्यक्तिर्नीलो घटो नीलं वासो नीलावनीतिप्रयोगाणामभ्युपगमे विशेष्यलिङ्गतैव शुक्लादिपदानां कथं नोक्तेति चेत् एष हि पर्यनुयोगोऽमरकोषकृतान्न तु तर्ककर्कशानाम् । नीलतमसोरैक्ये नीलं तम इति सह प्रयोगोऽयोग्यः स्यादित्यपि न रमणीयम् , धर्मभेदेन पृथिवी द्रव्यमित्यादाविव सहप्रयोगस्योचितत्वात् नीलत्वालोकाभावारोपितनीलत्वयोर्धर्मयोर्भेदस्य प्रामाणिकत्वात् ।

वस्तुतस्तु नीलस्याप्याचार्यचरणनिरुक्तासहप्रयोगानुपपत्तिरुपपन्ना, तथाहि नीलं तम इत्यस्य हि नीलमालोकाभावारोपितनीलमित्यर्थः । तत्र च नीलयोः सहप्रयोग एव, न च नीलमालोकाभावारोपितमित्यर्थः । तावन्मात्रस्यातमस्त्वेन तमःपदे लक्षणापत्तेः आ-

लोकाभावे क्रियादेरप्यारोपेण तावन्मात्रस्यातमस्त्वात् । न च सामान्यविशेषभावेन सहप्रयोगः द्रव्यं पृथिवीद्रव्यमित्यादेः सहप्रयोगस्यानुचितत्वादस्याप्यनुचितत्वात् । मूढप्रबोधपरतया पिकः कोकिल इत्यादिवत् सहप्रयोगसमाधानं तु न सम्यक् । यत्तु नीलं तम इति भ्रम आलोकाभावभानस्यावश्यकतया स एव तम इति, तत्र नीलभानस्यावश्यकतया तस्यैव तमस्त्वापत्तेः । यदपि नीलं तम इति भ्रमोत्तरं नेदं नीलमिति बाधदर्शनान्नेदं तम इति बाधादर्शनाच्च नीलतमसोरैक्यमिति, तदपि न, न हि प्रमातुरातुरदारोदरम्भस्तकणादप्रवाहस्य वा प्रत्यक्षतोऽत्र बाधः किन्त्वौपपत्तिकः, स च स्वस्वदर्शनानुसारी स्वानुसारी कस्य न सुलभ इति । न चैवमाचार्यविरोधे परमोपजीव्यविरोधः आचार्यचरणानां मतस्तोषस्य भास्करे तदक्षराणां वर्द्धमानानुरुद्धव्याख्यानेन कृतत्वात् । तस्मादुक्ताभिरेव युक्तिकिरणोभिः कन्दलीकारयुक्तिकमलिनी निष्कलङ्कतां प्रापणीयेति सङ्क्षेपः ।

आलोकज्ञानाभावस्तम इति प्राभाकराः परिभावयन्ति । तदपि निर्मानभावितमिव, ज्ञानस्य मानसतया तदभावस्याचाक्षुषत्वात् तमसश्च चाक्षुषकत्वात् । ननु प्रागुक्तदोषादालोकाभावोऽपि कथं स इति चेन्न यदि तावत्प्रागभावादीनां समयविशेषेऽतीन्द्रियाणां प्रवेशात्तद्गर्भान्धकारः कथं प्रत्यक्ष इति पूर्वोक्तो दोषः, तदेह उत्तरञ्च तावत्प्रागभावादयः प्रागभावत्वादिना तमोलक्षणप्रविष्टाः किन्तु संसर्गाभावत्वेन । न च संसर्गाभावत्वादिनापत्तिः कादाचित्कीमध्यक्षतां पुरः कुर्वन्नत्र प्रागभावोऽत्यन्ताभावो ध्वंसो वेतिसंशयेऽपि घटो नास्तीति निश्चयात्, प्रागभावत्वादिनिश्चये व्यञ्जकापेक्षा न तु संसर्गाभावत्वेनापि ।

इदं चावधेयम् । अत्यन्ताभावत्वेनापि निश्चयो न दृष्टिपातमात्रसाध्योऽत्यन्ताभाववत्यपि देश इहात्यन्ताभावो ध्वंसो वेतिसंशयात्किन्तु व्यञ्जकविशेषनिबन्धन एव, तस्माच्च संसर्गाभावत्वेन प्रागभावादीनां व्यञ्जकविरहकालेऽप्यध्यक्षताविरोध इति कथं तद्घटितस्यान्धकारस्याप्रत्यक्षत्वमिति । व्यञ्जकञ्चात्यन्ताभावत्वेन ग्रहेऽधिकरणस्य त्रैकालिकप्रतियोग्ययोग्यत्वादि प्रागभावत्वेन ग्रहे तदधिकरणस्योत्पादकसमवधानं ध्वंसत्वेन ग्रहे तदधिकरणध्वंसोत्पत्त्युत्तरका-

लानियतकिञ्चित्समवधानमिति सङ्क्षेपः।

ननु यावतां संसर्गाभावो यावतां संसर्गाभावा यावान् संसर्गाभाव इत्येतेषु पक्षेषु दूषितेषु किमुत्तरमिति चेन्न प्रौढप्रकाशकतेजस्त्वावच्छिन्नप्रतियोगिताकप्रौढप्रकाशकतेजस्संसर्गाभावस्य तमस्त्वात्। ननूक्तमेव सामान्याभावस्तेजसाम्नास्त्येव विशेषाभावप्रतियोगिता तु कथं सामान्यधर्मेणावच्छिद्यत इति चेत् प्रतियोगितात्वेनानुगतीकृतानां सामान्यधर्मेणावच्छेदकत्वसम्भवात् व्याप्तीनामिव धूमत्वादिना। ननु तदवच्छिन्नप्रतियोगिताकेषु कस्यचित्सत्त्वे कथं न तमोव्यवहार इति चेन्न प्रौढप्रकाशकतेजस्त्वावच्छिन्नप्रतियोगिताकत्वावच्छिन्नस्याभावस्य तमस्त्वात्। सम्भवति चात्र प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानं प्रौढप्रकाशकतेजस्त्वेन सामान्यलक्षणया तादृशां सर्वेषां स्फुरणसम्भवात्।तस्मादालोकाभाव एवान्धकारो न द्रव्यत्वमिति सिद्धम्। नवैव द्रव्याणीति। अस्मत्पितृचरणाराध्याः श्रीप्रगल्भभट्टाचार्यास्त्वालोकाभावस्य तमस्त्वेऽनुद्भूतस्पर्शाया प्रभाया अपि प्रतियोगिप्रवेशे तस्याश्च विनिगमनाविरहेण रूपस्पर्शयोरुभयोरुद्भवस्य द्रव्यप्रत्यक्षप्रयोजकत्वेनातीन्द्रियतयातीन्द्रियप्रतियोगिकतयाऽप्रत्यक्षत्वापत्तिस्तथा च प्रौढप्रकाशकयावत्तेजोरूपाभाव एव तमः। प्रौढप्रकाशकत्वं च प्रौढप्रकाशजनकत्वम्। प्रौढत्वं च ज्ञानगतो जातिविशेषः। न च तज्जनकस्य चक्षूरूपस्य सत्त्वात्कथमित्थम्? उद्भूतत्वेन प्रतियोगिनो विशेषणीयत्वाद्रूपत्वावान्तरजातिग्राहकतेजोरूपसत्त्वे प्रौढप्रकाशकयावत्तेजोरूपाभावश्छाया रूपत्वाग्राहके तत्सत्त्वे रूपत्वावान्तरग्राहकताद्विरहोऽवतमसं रूपत्वग्राहकताद्विरहोऽन्धतमसमिति तद्भेदलक्षणमिति प्रथयन्तीति सङ्क्षेपः।

ननु गुणेषु यथा केचित् कण्ठोक्ताः केचिदभ्युपगमसिद्धान्तसिद्धास्तथा द्रव्याण्यपि भविष्यन्तीत्यत आह—तद्व्यतिरेकेणेति। गुणेष्वेकत्र निरुक्तसंज्ञातो भिन्नास्संज्ञाः केषुचित्स्थलेषु निरुक्ताः सन्तीति भवत्वभ्युपगमसिद्धान्तसिद्धा गुणाः, न त्वेवं द्रव्यमित्यर्थः।

तदेवं द्रव्यादिसाधर्म्यवैधर्म्यज्ञानस्य निःश्रेयसकारणत्वमभ्युपगम्य तत्स्वरूपपरिज्ञानार्थमाह—*अथ के द्रव्यादयः पदार्थाः किं स्वरूपाः* इति। किञ्च तेषां साधर्म्यं किंरूपं च वैधर्म्यमिति

द्रव्यादिषु वा नानारूपतया परैरभिधानात्संशये सति इदम् । तथाहि विशेष्यं द्रव्यमिति केचित् । क्रयविक्रययोग्यं चेत्यादिविपर्यस्तो वा द्रव्यादीनामसत्त्वं मन्यमानः ।

अथ के द्रव्यादयः पदार्थाः न सन्तीत्याह—तदभावान्न साधर्म्यं नापि वैधर्म्यमिति । तथाहि चक्षुःस्पर्शनाभ्यां रूपस्पर्शयोः प्रतिभासनात् न तद्व्यतिरिक्तं द्रव्यमस्ति । यच्चेदं घटादिज्ञानं न तत्र प्रमाणम्, कल्पनाज्ञानत्वात् । बाधकं च प्रमाणमस्ति वृत्तिविकल्पादि । तथा चावयवाः अवयविनि वर्तन्त इति नाभ्युपगतम् । अवयवी चावयवेषु वर्तमानः किमेकदेशेन वर्तते व्याप्त्या वा ? एकदेशेन वृत्ताववयवान्तरप्रसङ्गः । अथैकदेशे वर्तते अनेकवृत्तित्वव्याघातः । एकद्रव्यं च द्रव्यं स्यात् । तत्र चावयवविभागाभावात् । नित्यत्वमेकस्य च क्रमयौगपद्याभ्यामजनकत्वम् । रूपाद्यनुपपत्तिश्च नैकरूपादिजनकत्वाभ्युपगमात् । अवयवेषु चावयवीति प्रतिभासाभावः । तस्यैकद्रव्यत्वात् । अथ न प्रत्येकं परिसमाप्त्या वर्तते । किं तर्हि सर्वावयवेष्वेक एवेति । तत्राप्येकस्वरूपेणावयवान्तरप्रवृत्तौ तेषामेकताप्रसङ्गः तदवयववृत्तिरूपत्वादवयविनः, स्वरूपान्तरेण चानेकत्वं स्वरूपभेदस्य भेदलक्षणत्वादिति । वृत्त्यनुपपत्तेरसत्त्वं वृत्त्या हि सत्त्वं व्याप्तम् । सा च व्यावर्तमाना स्वव्याप्तं सत्त्वं गृहीत्वा व्यावर्तेत इत्याशयः । परस्य गवाश्वादिवत् । भिन्नदेशतया ग्रहणम् । तदग्रहे तद्बुद्ध्यभावाच्चावयविनोऽसत्त्वं रूपादिसमुदायमात्रं घटादय इति समुदायः समुदायिभ्यो नार्थान्तरमिति संवृतिसन्नेव । एवं विज्ञानमात्रं सर्वं ततोऽर्थान्तरस्य सद्भावे प्रमाणाभावादित्येवं शून्यवादिवादा अपि यथावसरं निराकर्तव्या इति नेह प्रतन्यन्ते ।

संशयितव्युत्पन्नस्य द्रव्यस्वरूपप्रतिपादनार्थमाह—*तत्र द्रव्याणीत्यादि । यथा प्रत्यक्षेण रूपादिव्यतिरिक्तस्य द्रव्यस्यावधारणात् विपर्यस्तव्युदासः । रूपं हि चक्षुषैव गृह्यते स्पर्शस्त्वगिन्द्रियेण । द्वीन्द्रियग्राह्यं तु द्रव्यम् । कथमेतत्? प्रतिसन्धानात् । तथाहि यमहमद्राक्षं चक्षुषा तमेव स्पृशामि यं चास्प्राक्षम् तमेव पश्यामीति । न च द्वाभ्यामिन्द्रियाभ्यामेकार्थग्रहणं विना प्रतिसन्धानं न्याय्यम् । रूपस्पर्शयोश्च प्रतिनियतेन्द्रियग्राह्यत्वादेतन्न सम्भवतीति । अथेदं कल्पनाज्ञानमिति चेत् । किमिदं कल्पनाज्ञानं नामेति ? अथ क्षणिकत्वान्निर्विकल्पकज्ञानसमकालमर्थविनाशे स्मरणानन्तरमेव तद्भवतीति निर्विषयत्वादप्रमाणमिति चेत् । न क्षणिकत्वासिद्धेः स्मरणानन्तरभाविनोऽपि निर्विकल्पकज्ञानवदर्थान्वयव्यतिरेकानुविधानात् अर्थजत्वमेव । अथार्थजत्वे निर्विकल्पकज्ञानसमकालमेवार्थस्य सद्भावादिन्द्रियाणां चाविचारकत्वेन स्यादिति । तन्न । सहकार्यभावात् । तथाहि इन्द्रियसर्थेषु सविकल्पकज्ञानोत्पत्तौ सङ्केतस्मरणापेक्षम् । अथ स्मरणे चार्थस्येन्द्रियस्य च किमतिशयाधानमनतिशयनिवृत्तिरिष्यते । न तस्यैवातिशयत्वात् । तथाहि यद्यस्य सद्भावे कार्यं करोति स तस्यातिशयः स्मरणसद्भावे चेन्द्रियं कार्यकृदिति स्मरणमेव तस्यातिशयः स्मरणाद्वा कारकसाकल्यमेवातिशयः सम्पद्यते । तद्वैकल्यं चानतिशयो निवर्तते । साकल्ये हि कार्यकरणाद्वैकल्ये चाकरणादिति । एतेन यदाहुः—

यः प्रागजनको बुद्धेरुपयोगाविशेषतः ।
स पश्चादपि तेन स्यादर्थापायेऽपि नेत्रधीः ॥

इत्येतदपास्तं भवति । उपयोगविशेषस्यासिद्धत्वात् । तथाहि निर्विकल्पकबोधे नेन्द्रियस्य सङ्केतस्मरणमस्ति । सविकल्पके त्वस्तीत्युपयोगविशेषः । अथ शब्दाकारं सविकल्पकं ज्ञानम् । शब्दरूपता चार्थे नास्ति प्रथमेन्द्रियसन्निपात एव सविकल्पकोत्पत्तिप्रसङ्गात् । चक्षुरादिना वा परिच्छेदः श्रोत्रपरिच्छेद्यत्वेन दर्शनादिति निर्विषयत्वं सविकल्पकज्ञानस्य ।

तदसत् । आकारवादप्रतिषेधस्य वक्ष्यमाणत्वात् न शब्दाकारता ज्ञानेऽस्ति । ज्ञानवैलक्षण्ये तु सहकारिवैलक्षण्यमेव कारणमित्युक्तम् । द्रव्यासत्त्वे चान्यन्निमित्तं वाच्यं प्रतिसन्धानस्य । अथास्त्येवानादिकालपरिपुष्टवासनेति चेत् । न तस्याः सद्भावे प्रमाणाभावात् । अथ सविकल्पकं ज्ञानमेव प्रमाणमिति चेत् । नान्यथापि भावात् । तथा ह्यर्थसद्भावेऽप्युपपद्यत इति कथं वासनासद्भावे प्रमाणमन्वयव्यतिरेकाभ्यामन्यत्रापि च कार्यकारणभावावगतिस्तौ चेन्द्रियस्येहापि स्त इति । अथ निर्विकल्पकज्ञानोत्पत्ताविन्द्रियस्य व्यापारात्तदधीनतया च सविकल्पकेऽपि व्यापार इव संलक्ष्यते । न वस्तुतस्तत्राक्षणिकत्वे सत्युभयत्रापि व्यापारसम्भवात् । न च निर्विकल्पकं ज्ञानमेव सङ्केतस्मृतिद्वारेण सविकल्पकज्ञानोत्पत्तौ कारणमित्यस्ति प्रतिबन्धः । प्रत्यक्षस्य नियमेन स्वलक्षणविषयत्वेन क्रमाविषयत्वादनुमानन्तु सामान्यविषयमेवेति । न च प्रतिबद्धं लिङ्गमस्ति । कार्यं चान्यथा सम्भवतीति न क्रमे प्रमाणम् । स्वसंवेदनवादिनश्च विज्ञानं स्वपरिच्छेद एव प्रमाणं नार्थान्तरस्येति । यदि च वासनैव निमित्तं सा न विज्ञानादर्थान्तरं रूपरसगन्धस्पर्शशब्दज्ञानव्यतिरिक्तस्य निमित्तस्यानभ्युपगमात्तादात्म्ये तु बोधरूपतया सर्वत्राविशेषाद्विकल्पवैचित्र्यं न स्यात् । अथ विकल्पवैचित्र्यादेव वासनावैचित्र्यं न कार्यत इति चेत् । तासां च विज्ञानादभेदे विज्ञानवदेकताप्रसङ्गो विज्ञानस्य वाऽनेकत्वम् अनेकार्थतादात्म्यात् । विपर्यये वा तादात्म्यानुपपत्तेः । यदि च वासना विशिष्टज्ञानहेतुर्बोध्या चेति संज्ञामात्रं भिद्यतार्थो वासनेति । अथ वस्तुत्वेनैव वासना न तर्हि तस्या ज्ञानजनकत्वमर्थक्रियाकारित्वस्य वस्तुलक्षणत्वात् । अथ स्मरणानन्तरभावित्वं सविकल्पकत्वम् । तदार्थजत्वस्य प्रमाणाधितत्वान्न दूषणम् । अभ्युपगमे वा निर्विकल्पकस्यापि सविकल्पकत्वप्रसङ्गः । तथाहि रूपस्मरणानन्तरं रसरसनसन्निपाते रसज्ञानमुत्पद्यते । तत्र च रूपस्मृतेः पूर्वकालभावित्वात्समनन्तरकारणत्वं बोधात् बोधरूपतेति न्यायादस्तु तस्यापि कल्पनात्वम् स्मरणानन्तरभावित्वात् । न चात्र बोधरूपतया समनन्तरकारणत्वमन्यत्र स्मृतिरूपतयेति वाच्यम् । बोधादर्थान्तरस्य स्मृतिरूपस्य तादात्म्ये सत्यभावाच्च चाभेदे सति व्यवस्थोपपद्यते । क्वचिद्बोधरूपतया समनन्तरकारणत्वं क्वचिद्रूपान्तरेणेति । अतो न स्मरणानन्तरभावित्वं सविकल्पकलक्षणम् । न चार्थजत्वसिद्धौ नामजात्याद्युल्लेखेनोत्पत्तिर्दूषणमिति । कल्पनात्वस्यासम्भवात् । प्रतिसन्धानं द्रव्यसिद्धौ प्रमाणम् । एवं घटादिज्ञानस्यालम्बनं वाच्यम् । तस्य हि सम्यग्ज्ञानत्वात् । रूपादिसमुदायः रूपादीनां प्रतिनियतेन्द्रियग्राह्यतया तत्समुदायस्यैकेन्द्रियाविषयत्वात् । न चापरमार्थसतो रूपादिसमुदायस्य ज्ञानजनकत्वम् । तस्य चानुपलब्धत्वे नाणूनां सद्भावे प्रमाणमस्ति । तेषां हि कार्यगम्यत्वात् । न चासम्भवतः परमाणुरस्ति । षट्कोणयुगपद्योगादिति । तस्याप्यसत्त्वे परमार्थतः, असञ्चीयमानश्चास्मद्दर्शनविषयो न भवत्येवेति घटादिबुद्धेर्निर्विषयत्वप्रसङ्गः । न चाबाध्यमानज्ञानस्यानालम्बनत्वमित्यभिन्नत्वादभिन्नावयविविषयत्वम् । अथास्ति वृत्तिविकल्पादि बाधकमिति चेत् । न तस्याप्रमाणत्वात् । तथाहि वृत्त्यनुपपत्तेरसत्त्वमिति किमिदं स्वतन्त्रसाधनमुत प्रसङ्गसाधनमिति । यदि स्वतन्त्रसाधनं अवयवी धर्मी नास्तीति साध्यमिति प्रतिज्ञावाक्ये पदयोर्व्याघातः । यथेदं नास्ति चेति हेतोराश्रयासिद्धत्वम् च धर्मिणोऽप्रसिद्धत्वात्तथा स्वमते रूपादीनां सत्त्वम् । न च वृत्तिरस्तीति व्यभिचारः । समवायानभ्युपगमात् । अथ परव्याप्त्या परस्यानिष्टापादनमिति परेण ह्यवयव्यभ्युपगत इति धर्मित्वेनोपात्तस्तस्य प्रतिषाध्यत्वादिति । तत्र यदि परेण प्रमाणात्प्रतिपन्नस्तेनैव बाध्यमानत्वादनुत्थानं विपरीतानुमानस्य । न चानेनैव तस्य

बाधात्तदन्तरेण पक्षधर्मत्वादिति । अथाप्रमाणेन प्रतिपन्नस्तर्हि प्रमाणं विना प्रमेयस्यासिद्धि-रिति वाच्यं किमनुमानोपन्यासेन । तस्यापक्षधर्मतयाप्रमाणत्वात् । न च परस्य वृत्त्यासत्त्वं व्याप्तम् । तदन्तरेणाप्याकाशादौ उपलम्भादित्यनैकान्त्यं स्वरूपासिद्धश्च वृत्तेः समवायस्य सिद्धत्वात् । यच्चेदं नैकदेशेन सर्वात्मना वा वर्तत इत्येवमेकदेशस्यावृत्तित्वात् । न च भेदशब्दस्याभिन्नाश्रय-वित्त्युपपत्तिः बहुषु दृष्टत्वात् । तथाहि बहूनामन्यतमाभिधानमेकदेशः । निरवशेषता च सर्व-शब्दस्यार्थः । तथा विशेषप्रतिषेधस्य शेषाभ्यनुज्ञाविषयत्वात्प्रकारान्तरेण वृत्तिः प्राप्नोति । अन्यथा हि न वर्तत इति वाच्यम् । न चैकदेशे सति वृत्तिर्यथा वंशस्य स्तम्भेषु निर्देशानाय वृत्तिप्रसङ्गात् । परमाणूनां च वृत्त्यभावे द्व्यणुकादिप्रक्रमेण कार्यानुत्पत्तिः । अथायं विकल्पार्थः तत्र किं व्याप्त्या वर्तते उताव्याप्त्येति । तत्र रूपादिवदाश्रयव्यापित्वेनाभ्युपग-मः । असंयोगादिवदव्याप्यत्वं वृत्तित्वेनेति । तथा ह्यवयवेष्ववयवी वर्तते । समवायवृत्त्या तु रूपान्तरेणेति स्वभावकल्पोऽपि निरस्तः । अथावयवी गृह्यमाणो यदाशेषावयवग्रहणात् गृह्यते मध्यापरभागावयवानामग्रहणादग्रहणमेव स्यात् । एकावयवग्रहणे तु सास्नामात्रोपलम्भेऽप्युपल-म्भः स्यात् । नैतदेवम् । भूयोऽवयवेन्द्रियसन्निकर्षानुगृहीतेनावयवेन्द्रियसन्निकर्षेण ग्रहणात् कार्यसद्भावाच्च कारणचिन्ता प्रवर्तत इत्यपरोक्षज्ञाने सिद्धावयविन्येतत्कारणमित्युच्यते । एवं देशभेदेनाग्रहणादिति रूपादिभिर्व्यभिचारः । तथाहि रूपादयो न देशभेदेन गृह्यन्ते । तथापि सन्तः परस्परं भिन्नाश्चेति प्रतिभासभेदस्य विद्यमानत्वात् । गवादयोऽपि प्रतिभासभेदादेव भिद्य-न्ते न देशभेदात् । निर्देशानामभेदप्रसङ्गात् । एवं तद्ग्रहे तद्बुद्ध्यभावाच्चेत्ययमपि विरुद्धः । तथाहि तेषामवयवानामग्रहे नाभिन्नावयविनि बुद्ध्यभावः इत्ययमर्थोऽवयवग्रहे अवयविनि बुद्धि-रित्यवयविनः सत्त्वम् । तथाच विशेषणग्रहणात् विशेष्यबुद्धेर्न चासत्त्वम् । न चास्यभेदः । सर्वावयवाग्रहे अवयवाग्रहो ऽसिद्धः । मन्दमन्दप्रकाशे सति संस्थानमात्रस्यावयविनो ग्रहणादि-ति । अयं चावयविवादोऽस्मद्गुरुभिर्विस्तरेणोक्त इति नेह प्रतन्यते । सिद्धे चावयविनि प्रायः तदभिन्ना गुणादयोऽपि सिध्यन्ति च । तत्र द्रव्येषु प्रतिज्ञां करोति द्रव्याणि परमार्थसन्तीति अ-बाध्यमानज्ञानविषयत्वात् । यद्यदबाध्यमानज्ञानविषयं तत्तत्परमार्थसत् यथा विज्ञानम् । तथाऽबाध्यमानविषयाण्यमूनि । तस्मात्परमार्थसन्तीति । अत्र च पक्षीकृतेष्वबाध्यमानज्ञानवि-षयत्वमुक्तमिति पक्षधर्मत्वम् । परमार्थसति च ज्ञाने ज्ञानविषयत्वं वक्ष्याम इति सपक्षे सत्त्वं वि-पक्षाच्च खरविषाणादेर्व्यावृत्तिरिति । विपरीतार्थस्थापकयोः प्रत्यक्षागमयोरनुपलम्भादबाधितवि-षयत्वम् । असत्प्रतिपक्षोपपत्तेश्च प्रामाण्यमिति । एवं पृथिव्यप्तेजोवाय्वाकाशकालदिगा-त्ममनांसि इत्यत्र द्वन्द्वसमासः सर्वेषां स्वातन्त्र्यात् । अत्र च द्रव्याणीति प्रतिज्ञायां द्रव्यत्वयोगं साधनं वक्ष्यति । तथा पृथिव्यादिभेदे च पृथ्वीत्यादिविशेषोपलक्षणमिति । एतानि च सामान्यवि-शेषसंज्ञोक्तानि सामान्यसंज्ञा द्रव्यमिति विशेषसंज्ञा च पृथ्वीत्यादयः ताभिरुक्तानि कियन्ति नवैवेत्यवधार्यन्ते न्यूनाधिकप्रतिपादकप्रमाणाभावात् । तथाहि पृथिव्यादिसद्भावस्य वक्ष्यमा-णत्वान्न न्यूनता । अथाधिक्योपलब्धेस्तदभावोऽसिद्धः । तथाहि छाया द्रव्यम्, क्रियावत्त्वात् गुण-वत्त्वाच्चेति । चक्षुर्व्यापाराद् गच्छतीति ज्ञानोत्पत्तेः देशान्तरप्राप्तेश्च । तथाहि गतिमती छाया देशान्तरप्राप्तिमत्त्वात् । यो यो देशान्तरप्राप्तिमान् स स गतिमानुपलब्धः, यथा देवदत्तः, तथा देशान्तरप्राप्तिमती छाया तस्माद्गतिमती । गुणवत्त्वं च "आतपः कटुको रूक्षश्छाया मधुरशीतला" इत्यागमात् । तदेतदसत् । भासामभावरूपत्वाच्छायायाः । तथाहि यत्र यत्र वारकद्रव्येण तेजसः

सन्निधिर्निषिध्यते तत्र तत्र छायेति व्यवहारः । वारकद्रव्यगता च क्रियामातपाभावे समारोप्य प्रतिपद्यते—छाया गच्छतीति । अन्यथा हि वारकद्रव्यगतं क्रियापेक्षितत्वं न स्यात् । यच्चेदं देशान्तरप्राप्तिमत्त्वं तत्किं देशान्तरेण संयोगः । तस्यापि साध्यत्वात् । तथाहि द्रव्यत्वसिद्धौ संयोगः सिध्यति संयोगात् द्रव्यत्वमिति इतरेतराश्रयत्वं स्यात् । अथ देशान्तरप्राप्तिः समवायः । सोऽप्यसिद्धः । न ह्येकत्र समवेतः अन्यत्र समवैतीति । छाया त्वेकत्र सम्बद्धोपलब्धा पुनर्देशान्तरेऽप्युपलभ्यते । न च क्रियावत्त्वं देशान्तरसमवायात् सिध्यति । तस्यायुतसिद्धेष्वेव भावादिति । क्रियावत्त्वं साधनम् । यच्चेदमागमान्माधुर्यं शैत्यं वा छायायास्तदप्युपचारात् । ये हि मधुरद्रव्यस्य शीतद्रव्यस्य वा गुणाः ते छायासंसेवनाद्भवन्तीति तत्कार्यकर्तृत्वेन तथोक्ताः । अपि च क्रियावत्त्वात् गुणवत्त्वाच्च द्रव्यं छायेति न वाच्यम् । न च द्रव्यान्तरमस्तीत्युपपन्नं, नवैव द्रव्याणीत्यवधारणात् । अत्र केचित् द्रव्याणि नवैव न्यूनाधिकप्रतिपादकप्रमाणाभावे सति व्यवच्छेद्यव्यवच्छेदकभावापन्नवलक्षणयोगित्वादुभयाभिमतघटादिनवद्रव्यादिवादिति हेतुं ब्रुवते। तथाप्याधिक्यप्रमाणाभावो दर्शित एव । न च लक्ष .... यथावसरं वक्ष्याम इति । तथा सर्वज्ञेन मुनिना पृथिव्यादिसंज्ञाव्यतिरेकेण संज्ञान्तरानभिधानात् द्रव्यान्तरासत्त्वमिति । यदिह भावरूपं तत्सर्वं मयोपसंख्यातव्यम् इति प्रतिज्ञा मुनेः ।

(भा०) गुणाश्च रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाश्चेति कण्ठोक्ताः सप्तदश । चशब्दसमुच्चिताश्च गुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दाः सप्तैवेत्येवं चतुर्विंशति गुणाः ।

(सू०) गुणाः कतिविधा इत्यत्रोत्तरम् गुणा इत्यादि । गुणाः सप्तदश रूपरसाद्याः कण्ठोक्ताः रूपत्वरसत्वाद्यवान्तरधर्मेण विभक्ताः रूपरसगन्धस्पर्शाः संख्यापरिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वबुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणा इति सूत्रेण सप्तदशानां स्वयमेव कणादेर्विभजनादिति भावः । गुरुत्वादेरविभजनान्मुन्युक्तविभागस्य न्यूनत्वमपाकुर्वन्नाह चशब्देति । प्रयत्नाश्च गुणा इत्युक्तसूत्रस्थचशब्दसमुच्चिताश्चेत्यर्थः । तत्रानुगतस्यादृष्टत्वस्य मिथ्याज्ञानवासनादिजन्यतावच्छेदकतया सिद्धस्य सत्त्वेऽप्यदृष्टपदं धर्मत्वाधर्मत्वाभ्यामेव विभिन्नरूपाभ्यां धर्माधर्मताप्रसपर्कपतो न गुरुत्वादेः सप्त-

त्वविरोधः । गुणत्वसाक्षाद्व्याप्यजात्यैव गुणानां विभागात् नियमे प्रमाणाभावात् अन्यथा वेगस्थितिस्थापकभावनास्वनुगतसंस्कारत्वजातेर्निष्प्रमाणकत्वाद्वेगत्वादिभिरेव गुणत्वसाक्षाद्व्याप्यजातिभिर्विभजने गुणानां षड्विंशतित्वापत्तेः । इत्येवमिति । कण्ठोक्तैः सप्तदशभिश्चकारसमुच्चितानां सप्तानां मिलनेनेत्यर्थः ।

(से०)गुणाश्चतुर्विंशतिः। नन्वेवमत्र विरोधे कथं संख्यान्वयः सप्तदशसंख्याकानामेव कथनात् । न च यद्यपि स्वस्ववाचकासाधारणशब्देन रूपादयः सप्तदशैवोक्तास्तथाप्यनुक्तसमुच्चयपरेण सूत्रस्थचशब्देन सप्त ग्राह्या इति वाच्यम् । चकारस्योक्तसमुच्चयपरत्वेनाप्युपपत्तेरिति चेन्न चकारस्यानुक्तसमुच्चयपरत्वाभावेऽभ्युपगमसिद्धान्तासिद्धानां गुणानामग्रहणे विभागसूत्रस्य न्यूनतापत्तेरित्याह गुणास्त्विति । कण्ठोक्ताः स्वस्ववाचकासाधारणशब्देनोक्ता अनुक्तसमुच्चयपरकचशब्दः सप्तसाधारण इति भावः । ननु चशब्देनानुक्ताः कति ग्राह्या इत्यत आह चशब्देति। तावतामेवाभ्युपगमसिद्धान्तासिद्धत्वादित्यर्थः। गुरुत्वादिशब्दानुक्त्या सर्वान् कथयतो भाष्यकारस्यादृष्टशब्दस्य नानार्थत्वेऽभिप्रायः । एवं च सैन्यपदेन घोटककमेलकयोरिवादृष्टपदेन धर्माधर्मयोरुपस्थितौ सप्त प्राप्यन्ते कण्ठोक्तसमुच्चितयोरेकत्वे नैवं च चतुर्विंशतिर्भवतीति भावः । नन्वदृष्टत्वेन रूपेण धर्माधर्मयोरेकत्वे त्रयोविंशतिरेव गुणाः स्युः।न च जातिपुरस्कारेणैव जातिमतां विभाग आवश्यकः न गुणविभागस्तथा प्रमाणाभावादिति चेन्न ईदृशि स्थले भगवत्या एव तन्त्रेच्छाया एव शरणत्वात् । नन्वदृष्टत्वं जातिर्न भवतीत्याचार्यचरणैरुक्तन्तेषां कोऽभिप्राय; । न च कात्र प्रश्नापेक्षा कार्यैक्यादीनां तद्व्यवस्थापकानामभावादिति तैरेवोक्तत्वात् प्रकृते च भिन्नयोः सुखदुःखयोः कार्यत्वाद्विहितनिषिद्धयोः कर्मणोः कारणत्वादिति वाच्यम् अदृष्टत्वेनोपपत्तिमत्त्वेन कार्यकारणानुरोधेन कारणतावच्छेदकतयाऽदृष्टस्यावश्यवाच्यतया कार्यताकारणतावच्छेदकयोश्च जातिबाधकं विना जातावेव पर्यवसानमिति तैरेवोक्तत्वात् । उपाधिभिरेवाश्वैरुपहता गाव इतिन्यायेन जातेरपाकरणे

(से०)रूपत्वमपि न स्यात्तत्राप्युपाधेः संभवात्। ननु तत्रोपाधिश्चक्षुर्मात्र-ग्राह्यगुणत्वं न सम्भवत्येव परमाणुरूपादावव्याप्तेः किन्तु चक्षुर्मात्र-ग्राह्यजातिमद्गुणत्वम्। न च स जातिं विनोपपद्यत इति चेन्न, अदृष्ट-त्वस्याप्यतीन्द्रियात्मविशेषगुणमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजाति-गर्भत्वात्। अत्र साक्षात्पदेन भावनावारणम् भावनाया गुणत्वव्या-प्यसंस्कारत्वव्याप्यत्वान्मात्रपदेनापि सैव वार्यते। संस्कारत्वस्य गुण-त्वसाक्षाद्व्याप्यस्यातीन्द्रियात्मविशेषगुणे भावनायां सत्त्वादती-न्द्रियगुणमात्रवृत्तीति। करणं गुरुत्वेऽतिव्याप्तिर्गुणत्वसाक्षाद्व्याप्य-जातेर्गुरुत्वस्यातीन्द्रियगुणमात्रवृत्तित्वाद् गुरुत्वस्य सर्वस्यातीन्द्रि-यत्वात्तदर्थमतीन्द्रियात्मगुणमात्रवृत्तीत्यादि। ननु विशेषपदं व्यर्थमि-ति चेन्न अतीन्द्रियविशेषगुणमात्रवृत्तीत्यादेरेकस्य लक्षणस्यातीन्द्रि-यात्मगुणमात्रवृत्तीत्यादेरपरस्य लक्षणस्य कर्त्तव्यत्वात्। न च तत्र धर्म-त्वादिनैव जातिगर्भलक्षणोपपत्तिः, सितत्वादिना रूपलक्षणस्याप्युप-पत्तेः। एवञ्च जातिबाधकाभाव एव रूपत्वजातिसाधकः स न दुष्टः। न चावश्यंपियोगार्थनैवारपात्तिमत्त्वं प्रत्यदृष्टजनकत्वोपपत्तौ किं जा-त्येति वाच्यम्, एवं हि द्रव्यत्वमपि न स्यात्तत्रापि गुणवत्त्वेनोपा-धिना कारणतावच्छेदकसंभवात्। ननु कारणतावच्छेदकं कारणमिव कार्यात् पूर्ववर्त्यपेक्षितमन्यथा भाविदार्व्यस्य दण्डस्य घटकारणता-पत्तेः, तथा च प्रथमक्षणेऽसतो गुणस्य कथं गुणादिकारणतावच्छे-दकत्वमिति चेन्न गुणयोग्यतया अवच्छेदकत्वात्। ननु सा द्रव्य-त्वमेवेति चेन्न गुणात्यन्ताभावानधिकरणस्य तादृशोपाधिमत्त्वस्य चावि-वक्षितत्वात्। नन्वेवाधिः स्फुटतः न जातिबाधकः किन्तु व्यक्तिभेदादि-षट्कमेवेति चेन्न अदृष्टत्वेऽपि युक्तितुल्यतायाः स्पष्टत्वात्। तस्माददृ-ष्टत्वं जातिरिति चेन्न, अस्तु तावदिदमापातमनोरमं तथापि विभागो धर्मत्वादिनैव स्वतन्त्रेच्छावतो नियोगपर्यनुयोगयोरयोग्यत्वादिति दिक्। व्यक्तिभेदादिकं जातिबाधकमिति तूपलक्षणम् योग्यव्यक्तिम-त्त्वेऽयोग्यत्वस्यापि जातिबाधकत्वात् अव्याप्यवृत्तित्वस्यापि तथात्वा-त्। न चायं सिद्धान्तः प्रमात्वं कथं जातिरित्याशङ्क्य प्रमायामव्या-प्यवृत्तित्वान्मनसा ज्ञानपरिच्छेदेऽपि प्रामाण्यापरिच्छेदादित्युत्तरं प्रापयद्भिः पूर्वपण्डितैरनयोर्दोषयोः स्फुटं स्वीकारात्। दुरूहतया स-र्वसाधारणप्रसिद्धेरभावात्। मयापि मङ्गलस्वरूपनिरूपणावसरे-

(से०)ऽनयोर्दोषयोः परिष्कृतत्वात् । कार्यमात्रवृत्तिधर्मस्य कार्यतावच्छेदकत्वाभावश्च जातित्वबाधकः कार्यमात्रवृत्तिजातेः कार्यतावच्छेदकत्वनियमात्तस्य कार्यतावच्छेदकत्वेऽनुगतकारणाभावाद्वा भवत्वन्यथा बाधादर्शनस्य तु अनुगतजातित्वाभावनियम एव, एवं धर्मस्याखण्डत्वमपि जातित्वाबाधकम् । एतौ च दोषौ पृथगेव बाधकौ आचार्यपरिगणितदोषानपेक्षत्वेनैव जातित्वाभावसाधकत्वात् ।

(व्यो०)तथा गुणेषु प्रतिज्ञाङ्करोति । गुणाः परमार्थसन्तः पूर्वोक्तादेव साधनात् तथा गुणव्यवहारे गुणत्वयोगं साधनं वक्ष्यति । रूपादिभेदं चैतद्विशेषलक्षणमिति । ते तु रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाः कण्ठोक्ताः सूत्रकारेणेति वचनवृत्त्याभिहिताः । तांश्च वक्ष्यामः । समासश्चात्र द्वन्द्वः । न्यूनाधिकव्यवच्छेदार्थं सामर्थ्यलब्धाः पुनरुच्यन्ते संख्यया सप्तदशेति । चशब्दसमुच्चिताश्च गुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दाश्चेति । अदृष्टशब्देन धर्माधर्मयोरभिधानात् सप्त भवन्तीति । अथ संस्कारस्य त्रैविध्यादधिकत्वं स्यात् । न संस्कारजात्यपेक्षयैकत्वात् । न चैवमसत्त्वं सामान्यमस्तीति । न चान्येषामपि कामक्रोधादीनां सम्भवादुपसंख्यानं कार्यमिति वाच्यम् । अत्रैवान्तर्भावस्य वक्ष्यमाणत्वात् । इत्येवमुक्तप्रकारेण । चतुर्विंशतिगुणा इति न्यूनाधिकव्यवच्छेदार्थम् । तत्प्रतिपादकप्रमाणाभावे सति परस्परं व्यवच्छेद्यव्यवच्छेदकभावापन्नचतुर्विंशतिलक्षणयोगित्वादुभयाभिमतघटादिचतुर्विंशतिद्रव्यवदिति । अथ निर्गुणत्वाद् गुणानां संख्यायोगोऽनुपपन्नः । न उपचाराभ्युपगमात् । तथा हि मुख्ये बाधकप्रमाणसद्भावे सत्युपचारः कल्प्यते । स च निमित्तापेक्ष इत्यसाधारणधर्मयोगो निमित्तम् । यत्र हि संख्योपलब्धिः तत्र साधारणधर्मयोगोऽपीति । तत्स्मरणादारोपः प्रवर्तत इति । व्यापकत्वानिमित्तसमर्थक्रियाजनकत्वं वा नैकार्थसमवायः तस्य व्यापकत्वात् । तथा हि संख्याविशिष्टज्ञानान्यथानुपपत्त्या विशेषणविशेष्यभावस्य द्रव्य इव गुणादौ चाविशेषोपलब्धेरुपचारः कथम् । संयुक्तं समवेतं वा विशेषणमिति नियमानभ्युपगमाच्च । नैतदेवम् । गुणकर्मसामान्यानां समवेतानामेव विशेषणत्वोपलब्धेः । न च गुणेषु निर्गुणतया संख्यासमवायः सम्भवति । असमवेतानां च गुणकर्मसामान्यानां विशेषणत्वे मिथ्याज्ञानाद्यभावः तद्विशिष्टज्ञानस्योभयत्राविशेषादिति वक्ष्यामः । तस्मादुपचरित एव गुणादिष्वेकादिव्यवहारो व्याख्येयः ।

(भा०) उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्चैव कर्माणि । गमनग्रहणाद् भ्रमणरेचनस्पन्दनोर्ध्वज्वलनतिर्यक्पतननमनोन्नमनादयो गमनविशेषा न जात्यन्तराणि ॥

(सू०) कर्माणि कतिविधानीत्यत्रोत्तरयति उत्क्षेपणेत्यादिना । ननु भ्रमणादेरपि कर्मान्तरस्य सत्त्वात् पञ्चैवेति वि-

(सू०)भागो व्याहत इत्यत आह गमनग्रहणादिति । न जात्यन्तराणि न तु गमनावृत्तिजातिमन्तीत्यर्थः ।

(से०)एवं च गुणादिकारणतया प्रथमं द्रव्यनिरूपणं तदनु कर्ममात्रजनकतया गुणस्येदानीं सामान्याश्रयतया सामान्यात्पूर्वं कर्मविभागमाह । ननु विभागो न्यूनो भ्रमणादीनामग्रहणादित्यत आह गमनग्रहणादिति । गमनशब्देनैव ते परिगृहीता इत्यर्थः । नन्वेवं गमनभिन्नेषु तेषु गमनशब्दस्य लक्षणा स्यादित्यत आह गमनविशेषा एवेति । तथाच गमनपदशक्तिरेव तेष्विति भावः । एवं च द्वेधाऽत्र योजना–गमनग्रहणाद् भ्रमणादयो गृह्यन्त इति न भाष्यगतन्यूनतेत्येका । भ्रमणादयो गमनविशेषा एवेति लक्षणेत्यपरा । न चैवं भ्रमणादिपदानामावृत्त्यापत्तिः अन्यथानुपपत्त्या तत्र दोषाभावात् । अन्यथा तु भाष्यमपाख्यातमेव तिष्ठतीत्यत्र हि भाष्यतात्पर्यविदस्सहृदया एव साक्षिण इति दिक् ॥

(व्यो०)तथा कर्माणि प्रतिज्ञां करोति । गमनग्रहणाद् भ्रमणरेचनस्पन्दनोर्ध्वज्वलनतिर्यक्पतनमनोऽभ्रमनादयो गमनविशेषा (एव) न जात्यन्तराणीति ।

कर्माणि परमार्थसन्ति पूर्वोक्तादेव साधनात् । कर्माणीति व्यवहारे कर्मत्वयोगं साधनमिति वक्ष्यति । उत्क्षेपणादिभेदे च तत्सामान्यमिति । तथोत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानीति द्वन्द्वसमासः । न्यूनाधिकव्यवच्छेदार्थं च पञ्चैव कर्माणीत्यवधारणम् । अत्र तु पञ्चलक्षणयोगित्वं सविशेषणं पूर्ववत्साधनम् । अथ भ्रमणादीनामुपलम्भात् अवधारणानुपपत्तिः न गमन एवान्तर्भावादित्याह— गमनग्रहणात् भ्रमणरेचनस्पन्दनोर्ध्वज्वलनतिर्यग्गमननमनोऽभ्रमनादयो गमनविशेषाः गमनसंगृहीतास्तद्भेदा न जात्यन्तराणि । अन्ये तु गमनविशेषा एव न भवन्ति भ्रमणादयः । किन्तर्हि ? जात्यन्तराणीति मन्यन्ते । एतच्चासद्व्याख्यानमिति वक्ष्यामः कर्मपरीक्षायाम् ।

(भा०)सामान्यं द्विविधं परमपरञ्च । तच्चानुवृत्तिप्रत्ययकारणम् । तत्र परं सत्ता महाविषयत्वात् । सा चानुवृत्तेरेव हेतुत्वात् सामान्यमेव । द्रव्यत्वाद्यपरमल्पविषयत्वात् । तच्च व्यावृत्तेरपि हेतुत्वात् सामान्यं सद्विशेषाख्यामपि लभते ।

(सू०)सामान्यं कतिविधमित्यत्रोत्तरयति सामान्यमिति ।

(मू०)द्वैविध्यं दर्शयति परमपरमिति। ननु व्यक्तिभिन्नस्य सामान्यस्यालीकत्वात्तद्विभागोऽनुपपन्न इत्यत आह तच्चेति। अनुवृत्तिप्रत्ययोऽनुगतबुद्धिस्तत्कारणं शक्तिर्यत्र तादृशम्, तथाच व्यक्तिभिर्नानाधर्मिकानुगतबुद्ध्यसम्भवात्तन्निर्वाहकमवश्यं सामान्यमुपेयम्।

ननु लक्षणतः सामान्यरूपेणावगतस्यैव विशेषतो विभागौचित्यात् प्रथमतः सामान्यस्य विभागोऽनुचित इत्यत आह तच्चेति। नानाधर्मिण्येकप्रकारकप्रमाप्रकारीभूतो यो धर्मः स सामान्यमित्यर्थः। प्रकारकत्वञ्च समवायेन ग्राह्यमतोऽभावत्वादेरखण्डत्वेऽपि न तत्रातिव्याप्तिः। अभावत्वादिकमपि सामान्यमेव जातित्वं पुनस्तस्य नास्ति समवेतसामान्यस्यैव तथात्वादित्यपि कश्चित्।

तत्र परापरसामान्ययोर्मध्ये। महेति। महान् सकलसामान्याश्रयो विषय आश्रयो यस्य तत्त्वात् इत्यर्थः। ननु द्रव्यत्वादिरिव सत्तापि सामान्यविशेषात्मतया कथं न व्यवह्रियत इत्यत आह सा चेति। सा सत्ता अनुवृत्तेरनुगतबुद्धेरेव हेतुत्वात् सामान्यमेव सामान्यपदाभिलप्यमानमेव न तु सामान्यविशेषपदाभिलप्यमाना अनाश्रयसामान्यवद् (?) व्यावृत्तिधीजनकसामान्यविशेषत्वादिति सम्प्रदायः।

वस्तुतो घटः सन्नित्यादिप्रतीतेर्वर्तमानत्वादिरूपसत्त्वावगाहित्वेनैवोपपत्तेः सत्तासामान्ये प्रमाणाभाव इत्यत आह सा चेति। अनुवृत्तेरिति। भावी भूतो वर्तमानश्च सर्व एव घटः सन् न त्वसन् इत्याकारकानुगतप्रतीतेर्हेतुत्वान्नियामकत्वात् सामान्यमेव न तु वर्तमानत्वरूपा भाविन्यतीते वा वर्तमानत्वाबाधेन तादृशमतेर्भ्रमत्वापातादिति नव्याः। द्रव्यत्वादीति। सामान्यमित्यनुषज्यते। अल्पेति। अल्पो विषय आश्रयो यस्य तत्त्वात् सामा-

(सू०)न्यवान्निष्ठाभ नमतियोगिसामान्यवत्त्वादिति यावत् । ननु द्रव्यत्वं जातिविशेष इ...दिः कथं व्यवहारः सामान्यत्वविशेषत्वयोर्मिथो विरोधादित्यत आह तच्चेति । तत् द्रव्यत्वादि तद्द्रव्यावृत्तेः आनाश्रयसामान्यवद्द्रव्यानुवृत्तत्वमते तत्त्वाजनकत्वात् विशेषाख्यां विशेषसंज्ञां लभते न तु नित्यद्रव्यवृत्त्यन्त्यविशेषत्वादित्यर्थः ॥

(से०) इदानीं सामान्यादिषु त्रिषु प्रत्यक्षसिद्धतया प्रथमं सामान्यविभागमाह सामान्यमिति । अत्र विभागस्सामान्यत्वेन रूपेण । तच्च नित्यत्वे सत्यनेकसमवेतत्वम् । नित्यत्वं जलपरमाणुरूपादावपीत्यनेकेति । अनेकसमवेतत्वं संयोगादावपीति नित्यत्वे सतीति । नित्यत्वे सत्यनेकवृत्तित्वं घटत्वात्यन्ताभावेऽपीति समवेतत्वमिति भावः । ननु सामान्ये किं प्रमाणमित्यत आह तच्चानुवृत्तीति । न हि भिन्नासु व्यक्तिष्वेकाकारा मतिरनुगतधर्ममपुरस्कृत्य, देवदत्तयज्ञदत्तादिषु हि भिन्नेषु पाचकत्वाद्यपुरस्कारे देवदत्तो यज्ञदत्त इत्यनेकाकारमतेरेव दर्शनात्, तत्पुरस्कारे तु पाचकः पाचक इत्याद्येकाकारमतिः स्यात्, एवं घटादावप्यनुगतबोधार्थमनुगतधर्मत्वेन जातिस्वीकार इति भावः । ननु लवणघोटकयोः सैन्धवशब्दवाच्यत्वेनेव घटादिशब्दवाच्यत्वेनैवानुगतमतिरस्तु किं जात्येति चेन्न वाच्यतावच्छेदकत्वेन जातेरावश्यकत्वात् अगृहीतशब्दशक्तीनामपि घटादिष्वेकाकारदृष्टिदर्शनाच्च । न च कम्बुग्रीवावयवत्वेनोपाधिनैवानुगतमतिरस्त्विति वाच्यम् घटारम्भकसंयोगविशेषरूपायाः कम्बुग्रीवाया अननुगमात् तस्य विशेष्यजातेरन्यस्य वक्तुमशक्यत्वात् । ननु घटभिन्नभिन्नत्वादिकमेवानुगतमस्त्विति चेन्न घटभिन्नेत्यत्र घटत्वस्यानुसरणीयत्वात् ज्ञाते हि घटत्वे घटभिन्नत्वज्ञानेऽन्यस्मिंश्च ज्ञाते तद्भिन्नत्वलक्षणघटत्वज्ञानमित्यन्योन्याश्रयात् । न हि तद्व्यक्तिभिन्नभिन्नत्वं घटत्वमननुगमात् । नापि व्यक्तिमात्रभिन्नाभिन्नत्वम् असम्भवात् सकलव्यक्तिभेदस्याप्रसिद्धेः । नापि कुतश्चिद् व्यावर्तकं कस्यचिदनुगमकं धर्मान्तरमस्ति यद्वशात् तद्भिन्नत्वं घटत्वं स्यादिति । तत्र परं परमिति व्यवहर्तव्यम् अन्यथा साध्याविशेषापत्तेः । सत्ता सत्तादि अन्यथा पृथिवीत्वाद्यपेक्षया द्रव्यत्वादीनां परत्वानापत्तेरिति कश्चित् ।

(से०) तन्न सा चेत्यग्रिमग्रन्थविरोधात् । उदाहरणपरतयाऽसौ ग्रन्थोऽवतारणीय इत्याचार्यः । महाविषयत्वात् द्रव्यत्वादिभ्योऽधिकदेशवृत्तित्वात् । एवञ्च यद्यदपेक्षयाऽधिकदेशवृत्ति तत्तदपेक्षया परमिति व्यवहर्तव्यमिति भावः । ननु स्वरूपसत्त्वेनैव सत् सदिति व्यवहारोऽस्तु किं सत्तयेति चेन्न स्वरूपसत्त्वस्य तत्र तत्स्वरूपेणाननुगमात् । ननु भावत्वमेवास्तु सत्ता सत्तार्थकधातोरेव शब्दनिष्पत्तेस्तद्विरहादेव चाभावोऽभाव इत्युच्यते अन्यथा सत्ताजातिं पुरस्कृत्य भावशब्दप्रयोगे द्रव्यादीनां त्रयाणामेव भावत्वे सामान्यादीनामभावत्वापत्तिरिति चेन्न अभावाविशेष्यधीविशेष्यकत्वादेर्भावत्वस्य सत्तात्मकत्वे घटः सन्नित्यादिचाक्षुषबोधेऽभानापत्तेः । प्रामाणिकत्वमेव सत्त्वमिति चेन्न अभावेऽपि सत्त्वापत्तेः । प्रमाणप्रवृत्तेः पूर्वं घटादावसत्त्वापत्तेरिति केचित् । तन्न ईश्वरप्रमामादाय सर्वदा सर्वथा सर्वत्र प्रमाविषयत्वस्य सत्त्वात् । भावत्वं सत्ताजातिरेव सामान्यादीनामभावत्वानापत्तिस्तत्रापि केनचित्सम्बन्धेन सत्तासत्त्वात् । नन्वभावेऽप्येकार्थवृत्तित्वेन सत्तास्तीत्यभावोऽपि भावः स्यादिति चेन्न व्यवहारानुरुद्धस्य सम्बन्धस्य नियामकत्वात् । अभावे च प्रामाणिकानां भावत्वाव्यवहारात् । एवञ्च द्रव्यादिषु समवायस्सामान्यादिष्वेकार्थसमवायस्सत्ताया भावत्वप्रयोजकः, न च समवाये स बाधितः सत्तासमवाये सति समवायस्य स्वरूपसंम्बन्धात्मकसमवायसत्त्वात् । एवं धातुपाठोऽप्यनुगृहीतो|भवति अन्यथा बाधं विना तस्याप्रामाण्यस्वीकारेऽतिप्रसङ्गापत्तिरित्यपि चरतु । न च सम्बन्धभेदेऽपि सुरभि कमलं सुरभिः समीरण इत्येकाकाराअप्युक्तय इति वाच्यम् तत् सति (?) । नन्वनुवृत्तेरेव हेतुत्वात् इत्येवकारेण व्यावृत्तिहेतुत्वं व्यावर्तते सामान्यमेवेत्येतत्तु विशेषणम्, तच्चाव्यावृत्तिधीहेतुत्वमेव एवञ्च । व्यावृत्तिबुद्धेरहेतुरिति वाच्यम् तथा च साध्याविशेष इति चेन्न । अत्रापि व्यवहारस्य साध्यत्वात् । ननु सामान्यादिभ्यो द्रव्यादीन् सत्ता कुतो न व्यावर्तयति । व्यक्तिमात्रव्यङ्ग्यायास्तत्रापि प्रतीतेरिति चेन्न उपपत्तिकव्यतिरेकनिश्चयसत्त्वादिति चेन्न सामान्यवत्प्रतियोगिकत्वावृत्तिबुद्धिजनकत्वस्य विशेषत्वस्य सत्तायामभावात् । अपरमपरमिति व्यवहर्तव्यम् अन्यथा साध्याविशेषात् । अल्पेति । यद्यदपेक्षया न्यूनवृत्ति तत्तदपेक्षया

(से०)ऽपरमित्यर्थः । द्रव्यत्वादिसामान्यवत्प्रतियोगिकव्यावृत्तिधीहेतुत्वाद्विशेषोपीत्याह तच्चेति ।

(न्या०) एवं सामान्ये प्रतिज्ञां करोति । सामान्यं परमार्थसदिति । पूर्ववत्साधनम् । सामान्यव्यवहारे तु लक्षणं वक्ष्यमाणं साधनमिति भेदं निरूपयति । द्विविधं केन रूपेणेत्याह—परमपरं चेति । अनुवृत्तिप्रत्ययकारणमिति कार्येण सत्तां दर्शयति । तथाहि—यदनुगतज्ञानं द्रव्यगुणकर्मनिमित्तं तदर्थान्तरसम्बन्धात् भवतीति वक्ष्यामस्तत्परीक्षायाम् । तदेतदसाधारणत्वात्सामान्यस्येतरस्मात् भेदकमपि भवति । तथाहि द्रव्यगुणकर्मनिमित्तमबाध्यमानं चानुगतं ज्ञानं न सामान्यं विना भवतीति असाधारणमेव । तत्र परापरभेदं निरूपयन्नाह—सत्ता परं सामान्यमिति । कुतः ? महाविषयत्वात् । तथाहि द्रव्यत्वेन द्रव्याणि गुणत्वेन गुणान् कर्मत्वेन कर्माणि सत्ताया द्रव्यादिविषयव्यापकत्वेन महाविषयत्वात् परत्वमिति । यो हि यद्विषयं व्याप्नोति स तदपेक्षया परः यथाल्पविषयपार्थिवापेक्षया महाविषयं द्रव्यम् । सा च सत्तानुवृत्तेरेव कारणमिति सामान्यमेव । यद्यप्यसामान्यादिभ्यो व्यावर्तते । तथापि सामान्यं यस्मादनुवृत्तज्ञानस्यैव कारणमिति सामान्यमेव । तथा द्रव्यत्वाद्यपरमिति । द्रव्यत्वमादिर्यस्येत्यादिग्रहणात् गुणत्वकर्मत्वपृथिवीत्वादेर्ग्रहणम् । तच्च सत्तापेक्षया अल्पविषयत्वादपरमिति । तद्धि सामान्यलक्षणयोगित्वेन सामान्यं सदुपचारतोऽत्र विशेषाख्यामपि लभते । न चोपचारो निमित्तं विना वर्तते इत्याह—व्यावृत्तेरपि हेतुत्वादिति । न केवलमनुवृत्तेरेव । किं तर्हि व्यावृत्तज्ञानस्यापि हेतुत्वात् । विशेषाणां हि व्यावृत्तज्ञानजनकत्वं दृष्टम् । तदिहाप्यस्तीत्युपचारः प्रवर्तते । मुख्यास्तु विशेषास्तल्लक्षणयोगिन एव ।

(भा०) नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः ते च खल्वत्यन्तव्यावृत्तिबुद्धिहेतुत्वाद्विशेषा एव ।

(सू०) विशेषत्वं यदि व्यावर्तकत्वमात्रं तदा सामान्यादावतिप्रसक्तिरतो विशेषत्वमभिदधान एव बहुवचनेन तदाश्रयस्यानेकविधत्वं दर्शयति नित्येति । नित्यं सर्वदा द्रव्यवृत्तयो द्रव्यसमवेता इत्यर्थस्तेन द्रव्यकर्मणोर्घटत्वगुणत्वादेश्च व्युदासः । तावन्मात्रं नित्यगुणद्रव्यत्वाद्यतिप्रसक्तमत उक्तमन्त्या इति । अन्तो विरतिर्नित्यद्रव्यवृत्तिजातिगुणयोर्विच्छेद इति यावत् तत्रत्वन्तु इत्यर्थस्तेन सर्वदा द्रव्यसमवेतत्वे सति नित्यद्रव्यवृत्तिजातिगुणाभ्यां भिन्नत्वमेव प्रकृते विशेषत्वमिति फलितार्थः । यद्वा अन्तेऽन्ते काले महाप्रलये वर्तमाना अन्त्याः तेन कर्मव्यक्तीनां

(मू०)व्युदासः। तन्मात्रं च घटत्वपटत्वादौ ध्वंसे च गतमत उक्तं नित्यद्रव्यवृत्तय इति। नित्यद्रव्यमात्रसमवेता इति तदर्थः। न चैवं नित्यगुणेषु रूपत्वादिजातौ चातिप्रसक्तिः कर्मावृत्तिसामान्यशून्यत्वे सति नित्यद्रव्यसमवेतान्यत्वेनापि विशेषणीयत्वादिति भावः। ननु द्रव्यत्वादिसामान्यानामिवान्त्यविशेषाणामपि न कुतः सामान्यविशेषत्वमत आह ते च खल्विति। अत्यन्तव्यावृत्तिबुद्धिहेतुत्वात् अनुवृत्तिबुद्ध्यजनकत्वे सति व्यावृत्तिबुद्धिजनकत्वात्। विशेषा एव विशेषपदाभिलप्या एव नतु सामान्यपदाभिलप्या अपीत्यर्थः।

(सू०) सामान्यान्तात्समवायिनो निरूप्य समवायितया समवायात्पूर्वं विशेषं निरूपयति नित्येति। अत्र विशेषा इति बहुवचनेन विना बाधकमसङ्कोचेनानन्त्यं विवक्षितम्। अन्त्या इत्यनेन चरमविशेषत्वम् यदेकैकमात्रव्यक्तिकतयाऽनुगमकत्वं वारयता सामान्यत्वं प्रतिषिद्धम्। एवञ्च सत्तासामान्यमेव द्रव्यत्वसामान्यं विशेषश्च विशेषा एवेत्युक्तं भवति। ननु विशेषे प्रमाणाभावः, न चैकैकघटादिव्यावर्तकतया तत्सिद्धिराश्रयादिभिरेतेषां व्यावृत्तत्वादत आह नित्यद्रव्यवृत्तय इति। नानित्यद्रव्यव्यावर्तकत्वेन विशेष उच्यते येनाश्रयादिभिरन्यथासिद्धिः स्यात् किन्तु नित्यद्रव्यव्यावर्तकतया नित्यद्रव्यस्याश्रयोऽस्ति। न च जातिरेकैकमात्रव्यावर्तिकाऽनेकवृत्तित्वात्। न च प्रत्येकवृत्तयो रूपादयस्तथैकपरमाणुरूपस्यापरपरमाणुरूपादव्यावृत्तत्वे अपरपरमाणोः स्वाश्रयाव्यावर्तकत्वात् व्यावृत्तिबोधश्च न स्वाश्रयेणान्योन्याश्रयाव्यावृत्तत्वात्। परमाणो रूपव्यावृत्तश्चेत्तस्माच्च व्यावृत्तात्परमाणुव्यावृत्तिरिति। न च धर्मान्तरव्यावृत्तेन रूपेण परमाणुव्यावृत्तिरनवस्थानात्। नापि रूपादयः स्वतोऽव्यावृत्तास्तेषां तथा व्यावृत्तत्वे धर्मिग्राहकस्यान्यस्य वा प्रमाणस्यास्याभावात्। तस्माद्धर्मिग्राहकात् प्रमाणात् स्वतो व्यावृत्तत्वेन सिद्धा विशेषा एव नित्यद्रव्यव्यावर्तकाः तत्र तेऽव्यावृत्ताः कथं व्यावर्तका इति वक्तुं न शक्यतेऽसिद्धिदशायामाश्रयासिद्धोऽस्य-

छिद्दशायां स्वतो व्यावृत्तत्वेनैव सिद्धत्वात्परमाणुगुणादिषु च विशेषस्वीकारो विशेषव्यावृत्तेस्तैरेव तेषां व्यावृत्तिसंभवादिति भावः।

विशेषलक्षणन्तु—जातिविशेषत्वे सत्येकमात्रसमवेतत्वम् । अत्र रूपादिवारणाय सत्यन्तम् । सामान्यवारणाय मात्रेति । रूपध्वंसादिवारणाय नैकमात्रवृत्तित्वोक्तिः । अन्यथा इत्यनेन सूचितं केवलविशेषत्वं दर्शयति ते चेति । विशेषे ह्यन्याविशेषाव्यापकविशेषत्वम् तच्चैकमात्रवृत्तित्वे उपपद्यते उभयवृत्तिविशेषस्यैकमात्रवृत्तिविशेषाव्यापकत्वात् । न चैकमात्रवृत्तेरनुगमत्वं सम्भवतीति भावः ।

अत्यन्तव्यावृत्तिबुद्धिहेतुत्वं व्यावृत्तिबुद्धेरेव हेतुत्वम् । किरणावल्यां फक्किकैषा तथा व्याख्याता । सन्दर्भविरोध आचार्यशैलीशरणम् । आचार्या हि क्वचित् प्रमेयान्तरसञ्चाराय सन्दर्भविरुद्धमप्यभिदधति । भाष्यसन्दर्भे हि सत्तासामान्यमेतद्द्रव्यत्वादिसामान्यं विशेषश्चेति पूर्वमुक्तमेवञ्चात्रेऽपि विशेषाविशेषा एवेत्यर्थो युक्तः । किरणावल्यान्तु—ननु नित्यद्रव्यव्यावृत्तिबुद्ध्यर्थं विशेषा स्वीक्रियन्ते । सा च सामान्यादिभिरेव भविष्यतीति किं पदार्थान्तर्भूता एव न(?)सामान्याद्यन्तर्भूतास्तैः प्रत्येकं व्यावृत्तेरशक्यत्वादित्युक्तम् । न चैतत्सन्दर्भमनुसरतीति प्रत्यक्षमेव ॥

(व्यो०) एवं विशेषेषु प्रतिज्ञां करोति । विशेषाः परमार्थसन्त इति पूर्ववत्साधनम् । नित्यद्रव्यवृत्तय इति । तथा बुध्यादयोऽपि नित्यद्रव्येष्वेव वर्त्तन्त इति विपक्षैकदेशवृत्तिव्यवच्छेदार्थं नित्यद्रव्येषु वृत्तिरेवेत्यवधारणम । न चैवं बुध्यादय इति । नित्यद्रव्येष्वेव वृत्तिरेव एषामिति साधारणं वाक्यमेतत् । द्रव्यगुणकर्माणि तु नित्यद्रव्येष्वनित्यद्रव्येषु च वर्तन्त इति सामान्यं चाद्रव्येष्वपीत्युपपन्नमवधारणम् । नित्यद्रव्येष्वेवेत्यन्ययोगव्यवच्छेदेन नित्यद्रव्येषु वर्तमानत्वाद्विशेषाः परस्माद्भिद्यन्त इति । अन्ये तु पदार्थापेक्षया लक्षणं विवक्षितमिति नित्यद्रव्येष्वेव वर्तमानत्वं हेतुरिति ब्रुवते । तच्चायुक्तम्, विपक्षैकदेशवृत्तेरगमकत्वात् । न च पदार्थापेक्षयाप्ययोगव्यवच्छेदं विना विपक्षैकदेशात् बुध्यादेरस्य व्यावृत्तिरिति । नित्यद्रव्यवृत्तय इत्यन्त्यपदस्य विवरणमेतत् । तथा च वक्ष्यति । नित्यद्रव्याण्युत्पत्तिविनाशयोरन्ते व्यवस्थितत्वात् अन्तशब्दवाच्यानि तेषु भवास्तद्वृत्तयोऽन्त्या इति व्याख्यायन्ते । ते च विशेषाः विशेषयन्ति व्यावर्त-

यन्ति स्वाश्रयमाश्रयान्तरादिति। परीक्षार्थमाह ते चात्यन्तं सर्वदा व्यावृत्तिबुद्धेरेव हेतुत्वाद्विशेषा एव न सामान्यमपीति। तथाहि—समानजातिगुणक्रियाधाराः परमाणवो विशेषसम्बन्धिनो व्यावृत्तबुद्धिविषयत्वात्। यो यो व्यावृत्तज्ञानविषयः स स विशेषसम्बद्धो यथा स्थाण्वादि। तथाच व्यावृत्तज्ञानविषयाः परमाणवः तस्माद्विशेषयोगिन इति। व्यावृत्तज्ञानविषयत्वं च घटादिषूपलब्धमिति नित्येष्वपि साध्यते द्रव्यत्वेनैव हेतुना। न च गुणादीनामन्यतरस्यैव परमाणुषु व्यावृत्तज्ञानकारणत्वम्। समानजातिगुणक्रियाधारत्वेन विशेषितत्वात्। न च दृष्टान्ते गुणादिविशेषोपलब्धेरिति दृष्टान्तदार्ष्टान्तिकयोर्वैधर्म्यापादनेन विलक्षणविशेषासिद्धिरिति वाच्यम्। सर्वानुमानेषु समानत्वादिति। व्यावृत्तज्ञानजनकत्वेन नित्येषु विशेषाणां सद्भाव इति स्थितम्। विस्तरेण तु विशेषपरीक्षायां परीक्षिष्यन्त इत्यलम्।

(भा०) अयुतसिद्धानामाधार्याधारभूतानां यः सम्बन्ध इहप्रत्ययहेतुः स समवायः॥

(सू०) समवायस्यैकत्वाद्विभागासंभवेन तस्य लक्षणमेवाह अयुतेति। अयुतसिद्धानामपृथग्भूतानां सर्वदा मिथःसमवेतानामिति यावत्। तादृशानामाधार्याधारभूतानां यः सम्बन्धः स समवायस्तेनात्मत्वात्मनोर्नित्यद्रव्यद्रव्यत्वयोर्नित्यगुणगुणत्वयोर्वा सम्बन्ध इति फलितम्। बहुवचनस्य नानानिरुक्तितात्पर्यकत्वात्। तन्मात्रश्च कालिकपरम्परादिसम्बन्धेऽतिप्रसक्तमत उक्तमिहेति। इह द्रव्ये द्रव्यमित्याकारप्रत्यये हेतुः सम्बन्धमर्यादया भासमान इत्यर्थः। न तु तादृशप्रत्यये विषयविधया हेतुरित्यर्थो ग्राह्यः कणादनये समवायस्यातीन्द्रियत्वेन तदसम्भवात्।

(से०) इदानीं क्रमप्राप्तं समवायमाह अयुतेति। अत्रायुतसिद्धयोः सम्बन्धः समवायोऽयुतसिद्धिश्चोभयोरसम्बद्धयोरविद्यमानता। संयोगस्थले च संयोगोत्पत्तेः पूर्वमुभावसम्बद्धावपि तिष्ठतः समवायस्थले तु नित्यसम्बन्धिनौ नित्यं सम्बद्धावेव। घटरूपादि-

स्थले यद्यपि रूपाद्यनुत्पत्तिदशायां घटोऽसम्बद्धस्तिष्ठति घटनाशे क्षणमात्रं रूपसम्बद्धो न तिष्ठति जात्या तु घटादिरुत्पत्तिक्षण एव संबद्धो भवतीति समवायसम्बन्धिनोर्द्वयोरसम्बद्धयोः क्षणमात्रमपि नावस्थितिः, तथापि कारणाकारणसंयोगात् घटाकाशादिसंयोगो जायते तत्रापि घटस्यापि संयोगकारणत्वात् घटोत्पत्त्यनन्तरमेव तज्जन्म तथाच घटोत्पत्तिक्षणे घटाकाशावसम्बद्धावेव तिष्ठतः, एवञ्च प्रकृतलक्षणं संयोगे नातिप्रसक्तिमेव गच्छति। यत्तु घटत्वात्यन्ताभावप्रागभावादीनां स्वरूपसम्बन्धे तेषां सर्वदा सम्बद्धत्वान्नित्यसम्बन्ध इति करणेऽपि तत्र जातिधर्मद्वयात्मकस्य स्वरूपसम्बन्धस्य नित्यत्वात्तद्वारणाय नित्यप्राप्तिः समवाय इति वदति, तत्रापि प्राप्तसंयोगसमवायान्यतररूपतया तदाश्रयस्वरूपसम्बन्धातिरिक्तसम्बन्धसम्बद्धभिन्नभावत्वं विवक्षितम्। स्वरूपसम्बन्धश्च धर्मिद्वयात्मकसम्बन्धो न तु संयोगसमवायौ विना विशिष्टप्रतीतिजननयोग्यत्वं येनात्माश्रयः स्यादिति भावः। आधार्याधारभूतानामित्यनेन धर्मधर्मिणोरेव समवायो न तु संयोगन्यायेन धर्मधर्मिभावानापन्नयोरपि क्वचिदिति समवायस्वरूपं दर्शितम्। इहेतिप्रत्ययहेतुरित्यनेन इह गवि गोत्वमित्यादयः प्रत्ययाः कार्यतया समवाये प्रमाणतयोपन्यस्ताः।

ननु समवायं विनापि शुक्ताविह रजतमिति प्रत्ययो दृश्यते। न च प्रमारूपेहेतिप्रत्यये समवायो हेतुः, इह कुण्डे बदरमित्यत्र तदभावात्। न च यत्र संयोगो न सम्भवति तत्र समवायो हेतुः, भूतले घटाभाव इत्यत्र तदभावात्। न चेहेतिप्रत्यये सम्बन्धो हेतुः स च द्रव्यस्थले संयोगोऽभावस्थले स्वरूपसम्बन्धो गुणादिस्थले समवाय इति वाच्यम् अत्रापि स्वरूपसम्बन्धसम्भवात्। न च स्वरूपस्याननुगततयाऽनुगतः समवाय एव कल्प्यः, अभावेऽप्यनुगतवैशिष्ट्याख्यपदार्थान्तरभूतसम्बन्धकल्पनापत्तेः। न च वैशिष्ट्यस्यैकत्वे घटाभाववति पटवति पटाभावव्यवहारापत्तिः पटाभाववैशिष्ट्यस्यापि तत्र सत्त्वादिति वाच्यम्। समवायस्यैकत्वेऽपि रूपाभाववति स्पर्शवति रूपस्य व्यवहारापत्तिः रूपसमवायस्यापि तत्र सत्त्वात्। न च समवायसत्त्वेऽपि रूपनिरूपितः समवायस्तत्र नास्तीति वाच्यम् वैशिष्ट्यसत्त्वेपि पटाभावनिरूपितं वैशिष्ट्यं तत्र नास्तीति वक्तुं शक्यत्वात्। न चाभावाधिकरणयोर्वैशिष्ट्यं सम्बन्धो वैशिष्ट्य-

यतोऽत्र स्वरूपसम्बन्ध इति प्रथमत एव स्वरूपसम्बन्धोऽस्त्विति, तुल्यत्वात्। न च भूतले घटाभाव इति प्रत्ययो घटतदभावयोरभावभूतलयोश्च स्वसम्बन्धं विषयीकरोति सम्बन्धौ चैतौ विलक्षणौ एकत्राधाराधेयप्रत्ययेऽप्यपरत्र तदप्रत्ययात्तथा च कुत्र स्वरूपसम्बन्धः कुत्र वैशिष्ट्यमिति विनिगन्तुमशक्यतयोभयत्र वैशिष्ट्यस्वीकारे वैलक्षण्यानुपपत्त्योभयत्र परस्परविलक्षणस्वरूपसम्बन्धस्वीकार एवेति वाच्यम् एकेनापि संयोगेनाकाशसंयुक्ते भूतले घट इति विलक्षणप्रत्ययवदिहाप्युपपत्तेः। न च तत्रैकत्राधाराधेयभावस्य सत्त्वेन परत्र वाऽसत्त्वेन संयोगस्य साम्येपि वैलक्षण्यमिति वाच्यम् वैशिष्ट्येयवैशिष्ट्यात्। न चाधाराधेयभावस्यावश्यकत्वे तेनैवोपपत्तौ किं वैशिष्ट्यकल्पनया। न चैवं संयोगोच्छेदः तस्य प्रत्यक्षत्वद्रव्यासमवायिकारणत्वानुरोधाभ्यामावश्यकत्वादिति वाच्यम् एवं हि समवायायाऽपि जलाञ्जलिर्वितीर्येत तत्राप्याधाराधेयभावस्य सत्त्वात्। न च धर्मत्वसममाधेयत्वं धर्मसम्बन्धित्वञ्चाधारत्वं न च तत्संबधिनोपपद्यत इति न समवायानुपयोग इति वाच्यम् वैशिष्ट्यानुशिष्टावपि अस्य न्यायस्य न्यायत्वात्। न च वैशिष्ट्यत्राभावप्रतियोगि पर्यनुयोगापत्तेः, न भावो अभावे भावानङ्गीकारात्, नोभयात्मकं विरोधात्, पूर्वोक्तदोषद्वयसंहतेः सन्निपाताच्च नोभयात्मकं "परस्परविरोधे हि न प्रकारान्तरस्थितिरिति" स्थितेः, तस्मान्नास्त्येव वैशिष्ट्यमिति वाच्यम्। अखण्डाभावत्ववादिभिर्भावरूपस्याप्यभावत्वस्याभावे भावस्वीकारात्। न चैवमभावत्वमादाय पदार्थान्तरापत्तिः। सामान्यं द्विविधं जातिरूपमुपाधिरूपञ्च। उपाधिर्द्विविधस्सखण्डोऽखण्डश्चेति नयेन, तस्य सामान्य एवान्तर्भावात्। ननु विषयविषयिभावस्य स्वरूपसम्बन्धात्मकत्वे स्वरूपसम्बन्धस्य क्लृप्ततयाऽन्यत्रापि स एवास्त्विति चेन्न तत्रापि वैशिष्ट्यस्वीकारात् समवायेऽपि तुल्यत्वात्।

अत्रास्मत्पितृचरणैरङ्गीकृतः पन्थाः। अस्ति तावत् समवायिकारणासमवायिकारणनिमित्तकारणानां भेदः अन्यथा कपालकपालसंयोगयोर्नाशादिव दण्डनाशादपि घटनाशापत्तेः। न चैषां भेदो विना समवायं समञ्जसः। न च द्रव्यत्वे सति कारणत्वं समवायिकारणत्वं गुणत्वे सति कारणत्वं चासमवायिकारणत्वम्, दण्डस्य

घटसमवायिकारणतापत्तेः दण्डचक्रसंयोगस्य च तदसमवायिकारणत्वापत्तेः, कर्मणां संयोगविभागवेगासमवायिकारणत्वानापत्तेश्च । नाप्याधारीभूतं सत् कारणं समवायिकारणम् तादृशकारणप्रत्यासन्नं च कारणमसमवायिकारणमिति वाच्यम् । कालादेर्जगत्समवायिकारणत्वापत्तेः । नापि स्वरूपसम्बन्धविशेषसम्बद्धं कारणं समवायिकारणम् घटध्वंसस्य तु कपाले स्वरूपसम्बन्धसत्त्वेऽपि न तद्विशेष इति वाच्यम् स्वरूपसम्बन्धविशेषे प्रमाणाभावात् काले घट इति वत् कपाले घट इति प्रतीतेर्जायमानत्वात् तत्र च विशेषास्फुरणात् । तस्माद्यत्समेवतं कार्यमुत्पद्यत इत्याद्येव समवायिकारणादिलक्षणम् । तस्मात् सिद्धः समवाय इति । न च कार्यनाशप्रयोजकनाशप्रतियोगित्वं समवायिकारणत्वम् , असमवायिकारणेऽतिव्याप्तेः । न चासमवायिकारणभिन्नत्वे सति कार्यनाशप्रयोजकनाशप्रतियोगित्वम् , अपेक्षाबुद्धौ द्वित्वनिमित्तकारणलक्षणसिद्धावसमवायिकारणलक्षणसिद्धिः समवायिकारणप्रत्यासन्नमित्यादेरसमवायिकारणलक्षणत्वात्तत्सिद्धौ च समवायिकारणलक्षणसिद्धिरित्यन्योन्याश्रयात् । एवं निमित्तकारणमादायाप्यन्योन्याश्रयात् । उभयकारणभिन्नकारणस्य निमित्तकारणत्वात् । समवायिकारणत्वसिद्धौ तन्नाशत्वेन कारणतासिद्धिस्तत्सिद्धौ च समवायिकारणत्वसिद्धिरित्यन्योन्याश्रयाच्चेति दिक् ।

नन्वभावः किमिति न विभक्तः ? सम्भवति हि तत्र विभागः । अभावो द्विविधः संसर्गाभावोऽन्योन्याभावश्च । संसर्गाभावस्त्रिविधः प्रागभावध्वंसात्यन्ताभावभेदात् । ननु प्रागभावध्वंसौ किमिति स्वीक्रियेते भूतले न घटः कपाले न घट इति प्रतीत्योरविशेषात् अत्यन्ताभावेनैवोपपत्तेः । न चात्यन्ताभावस्य त्रैकालिकतया कपाले घटासत्त्वापत्तिः, सामयिकस्य समयञ्चातिकस्य वाऽत्यन्ताभावस्यावश्यस्वीकार्यत्वात्तेनैवोपपत्तेः अन्यथा चत्वरे स्थितघटस्यान्यत्र गमने चत्वरे कोऽभावः ? न तावत् प्रागभावध्वंसौ तयोः प्रतियोग्यसमानकालीनत्वात्, नापि त्रैकालिकोऽत्यन्ताभावः तस्य प्रतियोगिमत्यवृत्तेरिति सामयिकस्समयञ्चातिको वाऽत्यन्ताभाव एव स्वीकर्तव्यः, तथाच प्रकृतेऽपि तथास्त्विति चेन्न । उत्पत्स्यते घटो नष्टो घट इति विलक्षणाभ्यां प्रतीतिभ्यां स्वसत्ताकाले प्रतियोगिसत्ताविरो-

धिविषयकाभ्यां प्रागभावप्रध्वंसयोस्सिद्धेः। अपि च स कश्चिदभावः कपाले घटस्य स्वीकर्तव्यो यो घटजनकः,उत्पन्नस्य घटस्य तदितरसकलकारणस्य सत्त्वेपि तद्विलम्बादेव पुनरनुत्पत्तेः। स च यद्यत्यन्ताभावस्तदा तस्य त्रैकालिकतयोत्पन्नोऽपि घटः पुनरुत्पद्येत। न च घटोत्पत्तिदशायां कपाले तस्य सम्बन्धविरहान्नोत्पन्नस्योत्पत्तिरिति वाच्यम्, अधिकरणभेदेनाभावभेदाभावेन तस्यैव भूतलसम्बद्धतया कपालसमवतस्येव भूतलसमवेतस्यापि घटस्योत्पत्त्यापत्तेः। न च तदभावसत्त्वेऽपि भूतलस्य समवायिकारणत्वाभावान्न तत्समवेतो घट इति वाच्यम् विलक्षणप्रतीतेरेव प्रागभावादिसाधकत्वात्। अत्यन्ताभावस्तु समवायिको नाङ्गीकर्तव्यः समयज्ञप्तिकेनैव पूर्वप्रतीतेरुपपत्तेः। न चात्यन्ताभाववति कथं प्रतियोगिसत्ता कथं वा प्रतियोगिकाले सतोऽत्यन्ताभावस्यानुपलब्धिरिति वाच्यम् घटकालेऽत्यन्ताभावाधिकरणयोः सम्बन्धविरहात्। न च स्वरूपद्वयसत्त्वे स्वरूपसम्बन्धात्मकस्य सम्बन्धस्य कथमभाव इति वाच्यम् स्वरूपस्य सम्बन्धताया विशिष्टबोधात्मकफलकल्प्यत्वेन तदानीं विशिष्टबोधाभावेन सतोपि स्वरूपस्य सम्बन्धत्वाभावात्। अन्यथा घटवद्भूतलचत्वरीयघटाभावयोरपि स्वरूपसम्बन्धापत्तेः। एवञ्च त्रैकालिकेनैवात्यन्ताभावेनोपपत्तावुत्पत्तिविनाशशाली कश्चिदत्यन्ताभावस्तुरीयसंसर्गाभावो नास्तीति मतमनादेयम्।

विशिष्टाभावश्च सम्बन्धाभाव इति चिन्तामणिकृतः। विशेषणावच्छिन्नप्रतियोगिताको विशेष्याभाव एव विशिष्टाभाव इत्याचार्याः।

तत्र चिन्तामणिकारमते विशिष्टाभावः कश्चित्प्रागभावो यथा दण्डपुरुषसंयोगानुत्पत्तिदशायां, कश्चित् ध्वंसो यथा संयोगनाशे, कश्चिदत्यन्ताभावो यथा रूपादिनाशे तद्विशिष्टघटाभावः तत्र सम्बन्धस्य समवायस्यात्यन्ताभावः। तथाऽन्यत्र सतो दण्डविशिष्टपुरुषस्यान्यत्राभावोऽत्यन्ताभाव एव तत्संयोगस्यान्यत्रात्यन्ताभावात्। न च दण्डपुरुषसंयोगस्य दण्डपुरुषनिष्ठतया तद्ध्वंसस्यापि तद्गतत्वेन कथं भूतले तेन विशिष्टाभावव्यवहार इति वाच्यम् केनचित्सम्बन्धेन संयोगस्य तत्रापि सत्त्वेन तद्ध्वंसस्यापि तत्र सत्त्वात्। समवायिन्येव देशे ध्वंसप्रागभावात्रितयस्यापवादमात्रत्वा-

त् अन्यथेदानीं प्रागभावो ध्वंस इति प्रतीत्या कालेपि प्रागभावाद्य-सिद्ध्यापत्तेः । न च तत्र प्रतीतिरेव साधिका भूतले घटो नष्ट इत्या-दिप्रतीतेरत्रासत्त्वात् । तस्मान्माणिकृन्मते विशिष्टाभावः सम्बन्ध-प्रागभावादिस्वरूप इति विचारमर्यादया समायाति ।

सर्वत्र सम्बन्धात्यन्ताभाव एव विशिष्टाभाव इति केचित् ।

तदस्मन्मनसि नायाति आवश्यकेन ध्वंसादिनैवोपपत्तावत्य-न्ताभावकल्पनायां मानाभावात् । विशेषणाभावादिसमकालमेव वि-शिष्टाभावो यद्यस्ति तदा दण्डध्वंसानन्तरं संयोगध्वंसस्य जायमा-नत्वेन भवत्यत्यन्ताभावेनैव विशिष्टाभावव्यवहारः संयोगदशायान्तु तदत्यन्ताभावः कथं स्थास्यति इति विचारमर्हति ।

आचार्यमते तु विशिष्टाभावः प्रागभावादिरूपोऽपि भवत्यत्यन्ता-भावरूप एवेति विचार्यते ।

यत्र च पुरुषध्वंसे दण्डी पुरुषो नास्तीति व्यवहारस्तत्र पुरुष-ध्वंसेनैव विशिष्टाभावव्यवहार इति केचित् ।

तन्न विशेषणावच्छिन्नप्रतियोगिताको हि विशेष्याभावो विशिष्टाभा-वः,न च पुरुषध्वंसस्तथा ध्वंसप्रतियोगिताया विशेषणावच्छेदे प्रमा-णाभावात् । तस्माद्विशेषणवत्त्वेन विशेष्यात्यन्ताभाव एव विशिष्टाभा-वः,अन्योन्याभावस्तु न विशिष्टाभावः अन्यथा दण्डविगमदशायां दण्डि-नि दण्डिभेदापत्तेः । न च दण्डदशायां स एव तद्भिन्न इति समयभेदेन भेदाभेदौ न विरुद्धाविति वाच्यम् । एवं हि मूले वृक्षः कपिसंयोगी नाग्र इति प्रतीतिबलाद्देशभेदेनाप्यन्योन्याभावसत्त्वापत्तेः । न च तत्र संयो-गात्यन्ताभावेनैव तथा व्यवहारोपपत्तिः प्रकृतेपि दण्डाभावेनैव नाय-मधुना दण्डीति व्यवहारोपपत्तेरिति । समयतो देशतो वाऽव्याप्य-वृत्त्यन्योन्याभावस्वीकारे प्रमाणाभावः । भूतलं दण्डिभिन्नमिति प्रती-तेर्विशिष्टान्योन्याभावः कुतो न सिद्ध्यतीति ? भावानवबोधात् । य-था च दण्डीत्यत्र विशेषणाभावदशायां विशिष्टात्यन्ताभावास्तिप्रति तथाऽदण्डीत्यत्र विशेषणाभावदशायां दण्डिभेदो नास्तीत्यभि-प्रायात् । दण्डविशिष्टपुरुषादिभेदः पुरुषेष्वपि नास्तीत्यभिप्रायः । तस्मादन्योन्याभावो देशमादायेव कालमादायापि नाव्याप्यवृत्ति-रित्याभिप्रायेणास्माकं तथा लिखनं न विरुद्धमिति ध्येयम् ।

क्वचिद्विशेषणाभावः क्वचिद्विशेष्याभावः क्वचिदुभयाभावो विशि-

ष्टाभाव इति मणिकारोक्तमते तस्यैव दाहकारणतया मण्यादौ कारणीभूताभावाप्रतियोगिनि प्रतिबन्धकत्वव्यवहारो भाक्तः स्यात् । परम्परासम्बन्धेन करादिसम्बद्धस्य च सम्बन्धस्य प्रतिबन्धकत्वं स्यात् दण्डी पुरुषो नास्तीत्यादौ दण्डपुरुषसम्बन्धो नास्तीत्यर्थकल्पनायां लक्षणा च स्यात् ।

विशेषणावच्छिन्नप्रतियोगिताको विशेष्याभावो विशिष्टाभाव इत्याचार्यमतेऽपि विशेष्यध्वंसस्य तत्प्रागभावस्य वा यद्विशेषणावच्छिन्नप्रतियोगिताकत्वमङ्गीक्रियते तत्किमर्थमिति न विद्मः । अन्यत्रेव विशेष्यतावच्छेदकस्यैव प्रतियोगितावच्छेदकत्वसम्भवात् । न च विशेष्यकालीनतद्ध्वंसप्रागभावयोस्तथात्वम्, तयोः प्रतियोगिसमानकालीनयोरनङ्गीकारात् । अत्यन्ताभावस्थलेऽपि यद्विशेषणस्य प्रतियोगितावच्छेदकत्वं तत्कुत्र ? यदि विशेष्याभावस्थले तदा विशेष्यतावच्छेदकस्यैव प्रतियोगितावच्छेदकत्वसम्भवेन किं विशेषणस्य तदवच्छेदकत्वस्वीकारेण । अथ विशेष्यसत्ताकालसाधारणविशिष्टाभावव्यवहारप्रापितविशिष्टाभावलाभाय विशेषणावच्छिन्नप्रतियोगिताको विशेष्याभावः स्वीक्रियते तस्यैव विशिष्टाभावसत्त्वाच्च प्रतियोग्यभावयोर्विरोधः प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यभावयोर्विरोधादिति । एवं हि प्रतियोगिकाले प्रतियोगिन्यविद्यमानस्य विशेषणस्य प्रतियोगितावच्छेदकत्वे व्यधिकरणधर्मावच्छिन्नप्रतियोगिकात्यन्ताभावस्वीकार एव पर्यवसानं स्यात् । तस्मात्प्राचामेव मतमास्तां तत् तर्कवारिधीनां न चेतश्चमत्काराय । न चाननुगमः, विशेषणविशेष्यसम्बन्धप्रतियोगिताकाभावत्वेनानुगमादिति ।

अत्रोच्यते—विशेषणावच्छिन्नप्रतियोगिताक एव विशेष्याभावो विशिष्टाभावः । दण्डी उत्पत्स्यते दण्डी नष्ट इत्यादिप्रतीतिबलात्प्रागभावादिस्थलेऽपि विशेषणस्यैव प्रतियोगितावच्छेदकत्वात् । प्रतीतिपर्याप्त्यैवात्यन्ताभावेऽपि तथात्वात् । न च व्यधिकरणधर्मावच्छिन्नाभावस्वीकारः प्रकृतविशेष्यस्य तवसतो विशेषणाभावास्वीकारात् । न चैवमुत्तेजकाभावाभावे मणिसत्त्वे दाहो न स्यात्प्रतिबन्धकस्य मणेर्विद्यमानत्वात् इति वाच्यम् उत्तेजकसमानकालीनस्य मणेः प्रतिबन्धकत्वाभावेनोत्तेजकाभावशालिनां मणितृणानाम्प्रतिबन्ध-

कानामभावसत्त्वेनानुपपत्तेरभावात् । एकस्य दण्डस्य दण्ड्यादण्ड्य-
दशायां जनकत्वाजनकत्ववदेकस्यैव मणेरुत्तेजकाभावतदभावदशा-
यां प्रतिबन्धकत्वाप्रतिबन्धकत्वसंभवात् । एवञ्च यथा दण्डसत्त्वेपि
दण्ड्यभावदशायां न कार्यं तथा मणिसत्त्वेऽप्युत्तेजकाभावाभावद-
शायां न प्रतिबन्धः । एवञ्च विशेष्यसत्तास्थले न विशेष्यतावच्छेद-
केन रूपेणाभावो वक्तुं शक्यत इति विशेषणावच्छिन्नप्रतियोगिताक
एव विशेष्याभावो विशिष्टाभाव इति सिद्धम् । ननूत्तेजकाभावदशायां
यो मणिः प्रतिबन्धक आसीदुत्तेजकदशायां तस्य को भाव इति चेत्
दण्डवद्दशायां यो दण्ड आसीददण्ड्यदशायां तस्य को भाव इत्यस्यैव
समानयोगक्षेमत्वात् । नन्वत्र दण्डसत्त्वेप्यदण्ड्येनायोग्यत्वमाधीयत
इति, प्रकृतेऽपि मणिसत्त्वेऽप्युत्तेजकाभावाभावेन प्रतिबन्धकायो-
ग्यत्वं निर्वाह्यत इति सामान्यात् । एवं चास्य सतोऽप्युत्तेजकाभा-
वाभावेनावच्छेदकाभावेनाप्रतिबन्धकत्वेन प्रतिबन्धकानां चान्यत्र
सतामभावेन युक्त एव दाहः । एवञ्च प्रकृतविशेष्यत्वेऽपि विशेषण-
वत्त्वेन तस्याप्यभावस्याचार्यपर्यवसाननिर्वचनभ्रान्ताः । अत एव कु-
सुमाञ्जलावाचार्यचरणाः—न हि दण्डिनि सत्यदण्डानामन्येषां नाभा-
वः किन्तु दण्डाभावस्यैव केवलस्येति युक्तमिति, अन्यथान्येषामिति
न स्यात् । अत एव न्यायेऽप्युक्तविशेषणे विधिनिषेधौ विशेषणमुपसं-
क्रामत इति पठन्ति प्रामाणिकाः । अन्यथा तत्र विशेष्यस्याप्यभावे
तदुपन्यासः स्यादिति । एवञ्च यत्र विशेषणवद्विशेष्यान्तरं प्रसिद्धं
तत्र विशेषणावच्छिन्नप्रतियोगिताको विशेष्याभावोऽपि, अन्यथा
तु विशेषणाभाव एव । यथैतद्दण्डनाशे एतद्दण्डो नास्तीत्यादाविति
तार्किकाणामर्वाचाम् । यस्तु प्राचां मतेऽनुगमः प्रोक्तः स प्रतिबन्ध-
काभाव इति प्रतिबन्धकेऽपि स्यात् । एवञ्च प्रतिबन्धकस्थले प्रकृत-
विशेषणविशेष्यसम्बन्धप्रतियोगित्वेनानुगम एकाभावेपि एकसत्त्वे
कार्यञ्च स्यादिति दिक् ॥

अत्र केचित् व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकमभावं म-
न्यन्ते । तेषामयमाशयः । अस्ति तावत्पटवति भूतले घटत्वेन पटो
नास्तीति—एवमाकारिका प्रतीतिः । तस्याः पटेन घटत्वाभावो विष-
यः पटस्य प्रतियोगितया प्रतीतेः अधिकरणत्वेनाप्रतीतेश्च । एवञ्च

पटप्रतियोगिकाधिकरणत्वाभावस्तत्र प्रतीयते तत्र च पटत्वञ्च प्रतियोगितावच्छेदकम्–अभाववति प्रतियोगितावच्छेदकावच्छिन्नत्वासंभवात्। एवञ्च घटत्वं प्रतियोगितावच्छेदकम्। तच्च प्रतियोगिताव्यधिकरणमेव प्रतियोगिताधिकरणे पटेऽसत्त्वात्। न चावच्छेद्यासमानाधिकरणस्य कथमवच्छेद्यान्यूनानतिरिक्तवृत्तित्वमवच्छेदकत्वमिति वाच्यम्। अवच्छेदकत्वस्य स्वरूपसम्बन्धविशेषरूपत्वात्। कथमन्यथा विपर्यवृत्तिकृतिसाध्यतादिज्ञानं प्रवृत्तिकारणतावच्छेदकं स्यात्। प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानमभावज्ञाननिदानम्, अन्यथा प्रतियोगिनिर्विकल्पकादपि घटाभावमत्यापत्तेः तथाच यदा पटं घटत्वेन प्रत्येति तदा प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानसत्त्वेऽपि नाभावज्ञानमनुपलब्धेरेवाभावात्। यदा च पटे घटत्वाभावमवैति तदा प्रतियोगितावच्छेदकप्रकारकं ज्ञानमेव नास्ति इति कथं तथा प्रथापथमपि प्रथयति। एवञ्च पटे घटत्वाप्रतीतिदशायां जायमानेयं मतीपा पटे घटत्वमविदयतीति निरुक्तेः पूर्वमनुपपत्तिं न स्पृशत्यपि घटत्वानुपलब्धिसत्त्वात्तत्त्वज्ञानसत्त्वाच्चेति। तादृशानाहार्यज्ञानत्वेन नाभावज्ञानकारणता गौरवात्। किन्तु तादृशज्ञानत्वेन। संभवति च पटे घटत्वाभावं जानतोऽपि तज्ज्ञानमाहार्यम्। एवञ्च प्रतियोगितावच्छेदकप्रकारकप्रतियोगित्वज्ञानेऽनाहार्यत्वाभाव एवानुपलम्भशब्दार्थः। स च प्रकृते सम्भवत्येव घटत्ववत्तया पटप्रतीतेः प्रतियोगितावच्छेदकतायामाहार्यत्वात्। न च प्रतियोग्यारोपोऽभावप्रमाकारणम्। न च प्रकृते प्रतियोगिनः पटस्यारोपः सम्भवतीति कथमभावप्रमेति वाच्यम् प्रतियोगितावच्छेदकांशे आरोपसंभवात्। यत्तु विशिष्टाभावेनैव प्रकृतप्रत्ययोपपत्तौ किमिति विजातीयाभावस्वीकार इति, तन्न, विशिष्टस्य प्रतियोगिनोऽप्रसिद्धा तदभावासंभवात्। तस्मादस्ति व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकोऽभाव इति॥

अत्रोच्यते। प्रतियोग्यभावयोर्विरोधात्कथं प्रतियोगिमति तदभावः। न च प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यभावयोर्विरोधः गौरवात्। अपि च ईदृश्यभावे प्रतियोगिनि प्रकृतावच्छेदकाभावस्यावश्यकत्वात् उपजीव्येन तेनैवोपपत्तौ किमित्यभावान्तरकल्पनम्।

किञ्च प्रतियोगितयाऽसंबद्धः कथं प्रतियोगितावच्छेदकः । ज्ञानन्तु कृतिसाध्यत्वादिविषयतया सम्बद्धमेव । तस्मान्नास्ति तादृशोऽभाव इति संक्षेपः ।

नन्वस्ति व्यासज्यवृत्तिप्रतियोगिताकोऽभावः, कथमन्यथा घटवति भूतले घटपटौ न स्त इति प्रथिता प्रतीतिरिति चेन्न, व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावेनैवोपपत्तौ प्रतियोगिताया व्यासज्यवृत्तित्वे मानाभावात् । प्रतियोगितात्वेनानुगतीकृतानाम्प्रतियोगितानां व्यासज्यवृत्तिना धर्मेणावच्छेदस्सम्भवात् इति पक्षधरमिश्राः। उपजीव्येन पटाभावेनैवोपपत्तौ सोऽपि नास्तीति वस्तुगतिः। लाघवेन प्रतियोग्यभावयोर्विरोधात् । एवञ्च घटवति भूतले घटपटौ न स्त इत्यस्य घटवति पटो नास्तीत्यर्थ इति संक्षेपः ।

सामान्याभावस्तु सामान्यावच्छिन्नप्रतियोगिताको विशेषावच्छिन्नप्रतियोगिताकाद्भिन्नः स्वीकर्तव्य एव । सम्बन्धितावच्छेदकभेदेन ससम्बन्धिकपदार्थभेदस्यौत्सर्गिकत्वात् । संयोगादौ तु द्वित्वानुरोधेन सम्बन्धिद्वयगतयोस्सम्बन्धितावच्छेदकयोर्भेदास्वीकार इति । अयं च सामान्याभाव एवेति संक्षेपः ।

प्रागभावोऽपि सादिर्ध्वंसोऽपि सान्त इति मतन्तु अनादेयमेव । प्रागभावात् पूर्वं ध्वंसादनन्तरं च प्रतियोग्यापत्तेरिति संक्षेपः ।

आरोप्यसम्बन्धभेदेनाप्यभावभेदः । कथमन्यथा संयोगेन घटवति भूतले समवायेन घटो नास्तीत्येवमाकारिका प्रतीतिः । घटसमवायस्यैव तत्राभावोऽनुभूयत इत्येके । एवञ्चैवंविधविचारसोपानपरम्परोहापोहचतुरोऽभावः किमिति न विभक्त इति चेन्न, अभावस्यैव तद्विभागस्याप्यभ्युपगमसिद्धान्तत्वात् ।

(१)नन्वस्ति भेदः पदार्थान्तरम् यत एकस्मादपरत्र भिन्नप्रतीतिः । न चास्याभावो भावेऽपि प्रत्ययात्, अत एव न भावोऽपि षड्भात्मकस्तेषामभावे तुल्यत्वङ्गीकारात् इति चेन्न कृतान्तर्गतस्य चतुर्विधस्य भेदस्याङ्गीकारात् । अन्योन्याभाववैधर्म्यपृथक्त्वस्वरूपात्मकानां चतुर्णां भेदानां क्लृप्त एवान्तर्भावात् । अन्योन्याभावस्याभावान्तर्गतत्वात् । वैधर्म्यस्य गुणादिरूपत्वात् । पृथक्त्वस्य गुणेऽन्तर्भावात् । स्वरूपभेदस्य च तद्धर्म्यात्मकत्वात् । तत्रान्योन्याभावो भावप्रतियोगिको

भावनिष्ठश्च। वैधर्म्यस्वरूपभेदौ भावाभावप्रतियोगिकौ तन्निष्ठौ च सामान्यादिष्वपि लक्षणवैधर्म्यस्वीकारात् । पृथक्त्वं द्रव्यप्रतियोगिकमेव द्रव्यनिष्ठमेव। एवं च न भेदः पदार्थान्तरमिति सिद्धम्॥

(२)नन्वस्ति शक्तिः पदार्थान्तरं, त्रिविधा च। तथाहि एकपदज्ञानं हि सम्बन्धिज्ञानतया पदार्थस्मारकम्। न च पदपदार्थयोस्संयोगसमवायौ पदस्याद्रव्यत्वात् घटादिपदार्थागुणत्वाच्च। नापि स्वरूपसम्बन्धः तेनैवान्यथासिद्धौ संयोगसमवाययोरपि विलयापत्तेः। तस्मादस्ति पदशक्तिः पदार्थान्तरमिति । द्वितीया च सहजशक्तिः—यदनुगृहीतं वह्न्यादि दाहादिशक्तमिति व्यवह्रियते, जनयति च दाहादि। मण्यादि च तद्विघटकतया प्रतिबन्धकमित्युच्यते—कार्यानुकूलकिञ्चिद्विघटकस्यैव प्रतिबन्धकत्वात् । उष्णस्पर्शादीनाञ्चाविघटनात् घटनीयत्वेनापि शक्तेरेव स्वीकारात्। तस्मादस्ति सहजशक्तिः। तृतीया त्वाधेयशक्तिः या—व्रीह्यादौ प्रोक्षणादिभिराधीयते, अन्यथा चिरविनष्टानां प्रोक्षणादीनां कालान्तरीयावघातादिकारणत्वञ्च स्यात्। चिरविनष्टस्य निर्व्यापारस्यापि कारणत्वे धर्माधर्मयोरपि कल्पनं न स्यात्। न च प्रोक्षणध्वंस एव व्यापारः, भावाभावयोरेकत्राजनकत्वात्। प्रत्युताभावजनकत्वे भावस्य प्रतिबन्धकत्वात् । कारणीभूताभावप्रतियोगिन एव प्रतिबन्धकत्वात् , अन्यथा यागादावपि तथात्वापत्तेः। तस्मादस्त्याधेयशक्तिः, यामाधाय प्रोक्षणादयोऽग्रिमकालान्तरभाविने फलाय कल्पन्ते इति। एवञ्च पदार्थान्तरभूतायाः शक्तेरविभजनान्न्यूनो विभाग इति।

अत्रोच्यते—अस्माच्छब्दादयमर्थो बोद्धव्य इत्येवमाकारकस्य भगवतो भुवनधुरन्धरस्य श्रीमतो जानकीजानेर्शनस्येच्छाया वा पदशक्तित्वात्। वस्तुतस्तु तथाज्ञानमेव पदशक्तिः—तथाज्ञानं विना तथेच्छाया अभावेनोपजीव्यत्वात् । तत्र भगवतस्तयोर्नित्यत्वे च कथमुपजीव्योपजीवकभावः विषयतायामिच्छाया ज्ञानसापेक्षत्वात्। तस्मात् क्लृप्तेनैवोपपत्तौ न पदार्थान्तरकल्पनमिति। सहजशक्तिरपि न शक्त इति व्यवहारानुरोधेन—सहकारिणः कारणताया वा शक्तिपदार्थत्वेन तत्सम्बन्धेनैव शक्तत्वव्यवहारात्। ता-

दृष्टस्यैव च कार्यकारणत्वात् । न च विजातीयत्वेन शक्तिसिद्धिः, दृष्ट-सत्त्वेऽदृष्टविलम्बेन फलविलम्बाभावात्, दृष्टस्य चोष्णस्पर्शादेः सत्त्वान्मण्यादिना शक्तिघटकेनैव तद्विलम्ब इति वाच्यम् मण्याद्यभावानामपि कारणत्वेन तद्विलम्बेनैव फलविलम्बात् । प्रतिबन्धकास्तु मण्यादिप्रयोक्तारः पुरुषा एव—तेषां कार्ये प्रतिकूलमण्यादिसमवधानरूपप्रतिबन्धकारित्वात् । न चाभावो न कारणम, अनन्यथासिद्धनियतपूर्वसत्त्वस्वरूपकारणत्वसत्त्वात् । न ह्यभावत्वमन्यथासिद्धिर्नियतपूर्वसत्त्वाभावो वा । तत्र च भावत्वे सति न तत्कारणत्वम् गौरवात्, अन्योन्याश्रयाच्च–सिद्धे ह्यभावस्याकारणत्वे कारणतालक्षणे भावत्वं विशेषणम ततश्च तदकारणत्वसिद्धिरिति । न चाभावत्वं कारणतालक्षणविरोधि, अभावत्वेनावधारितेऽपि अनन्यथासिद्धत्वादीनां प्रमीयमाणत्वात । न च सत्ताजातिमत्त्वे सति तत्वं कारणत्वम्, गौरवात् सामान्यस्यानुगतबुद्ध्यकारणत्वापत्तेश्च । अपि च सत्ताजातिमतोऽपि पूर्वविद्यमानतया अवश्यापेक्षणीयत्वेन तदेव कारणत्वप्रयोजकमिति । आधेयशक्तिरपि नास्ति–प्रोक्षितसमस्तव्रीहिष्वेकशक्तिस्वीकारे एकव्रीहिनाशे शक्तिनाशः शक्तिनाशे शिष्टव्रीहिकृतयागस्यानङ्गत्वापत्तिः । न च यावत्समवायिकारणनाशत्वेन नाशकता, गौरवात् । प्रतिव्रीहिभिन्नभिन्नशक्तिस्वीकारे तु गौरवम । तस्मात्प्रोक्षणादिभिरदृष्टं जन्यते, अस्पृश्यस्पर्शनादिभिश्च तदेव नाश्यत, इति न शक्तिलक्षणं पदार्थान्तरमिति सिद्धम ।

(३)ननु कांस्यादावमेध्यादिसंयोगेनाशुद्धिः भस्मादिभिः संयोगेन तु शुद्धिरिति सकलजनसिद्धम् । न च तत्र तत्संयोगावेव शुद्ध्यशुद्धी भस्मादिसंयोगापगमेऽपि शुद्धादिव्यवहारात् । अत एव न संयोगोत्पत्तिः शुद्ध्यादिः, तदपगमेऽपि व्यवहारात । नापि संयोगादिध्वंसः, संयोगादिकाले व्यवहारापत्तेः ध्वंसस्यानन्ततया सर्वदा व्यवहारापत्तेश्च । तस्माच्छुद्धिरशुद्धिश्च पदार्थान्तरमिति चेन्न,

शुद्ध्यशुद्ध्यभिमानिदेवतासंनिधेरेव भस्मादिसंयोगेन जननात् । सन्निधानन्तु यद्यपि कायिकं न सम्भवति–कांस्यादीनामनन्तानां परस्परं व्यवहितदेशसत्त्वेनानन्तकायकल्पनापत्तेः, तावद्दूरवर्तिमहापरिमाणैककायकल्पनेपि गौरवापत्तेः, किन्तु बौद्धम् ।

यद्वा शुद्धिसाधकस्य भस्मसंयोगादेः श्रुतिसिद्धतया तज्जन्यो धर्मविशेष एव शुद्धिः। चाण्डालादिसंयोगजन्यस्तन्नाशश्चाशुद्धिरिति। अत एवाधेयशक्तिविशेषः शुद्धिस्तदभावश्चाशुद्धिरिति भट्टभाषितम्, संस्कारतदभावावेव शुद्ध्यशुद्धी इति प्राभाकरभाषितञ्च निरस्तम्। क्लृप्तेनादृष्टविशेषेणैवोपपत्तौ अर्थान्तरप्रार्थनावैयर्थ्यात्।

शुद्ध्यभिमानिदेवतासन्निधिः शुद्धिस्तदभावश्चाशुद्धिरिति वा। पुत्रजन्मादावशौचशौचयोरदृष्ट एवान्तर्भावः—कर्मानधिकारप्रयोजकस्यादृष्टस्याशौचत्वात्। तदधिकारप्रयोजकस्य शौचत्वात्। तत्र प्रथमं पुत्रजन्मादिजन्यम्। द्वितीयमशौचाद्यपगमकालजन्यम्। तथा चैतद्द्वितयमपि भावरूपमेव। न त्वेकस्य भावत्वमन्यस्याभावत्वमिति विनिगमनाविरहादित्येके। तत्र जन्मादिना कर्मप्रतिबन्धकस्य कस्यचिदावश्यकत्वे तदभावस्यैव शौचशब्दार्थत्वात्। कांस्यादिस्थले त्वदृष्टं संस्कर्तृनिष्ठं तदुपभोक्तृनिष्ठं वा भस्मादिसंयोगेन जायते उच्छिष्टादिसम्बन्धेन तु तदेवापनीयते। व्यधिकरणस्याप्यदृष्टजनकत्वं तन्नाशकत्वं च। कर्मनाशापारगमनस्य शरीरगतस्यात्मनिष्ठधर्मनाशकत्ववत्।

केचित्तु संस्कारत्वाभिमतं यद्द्रव्यं भस्मादि तस्य यः सम्बन्धः तत्समानकालीनो य उपहर्तृचाण्डालादिसम्बन्धप्रतियोगिको यावाननादिः संसर्गाभावः प्रागभावादिस्तत्सहितः संस्कारकसंस्करणीयसम्बन्धोत्पत्तिध्वंसः शुद्धिः तदभाव एवाशुद्धिः। एतस्य विशिष्टस्याभावस्तु न विशेष्याभावात्-उत्पत्तिध्वंसस्य विशेष्यस्यानन्ततया ध्वंसासम्भवात्, किन्तु विशेषणादिसंसर्गाभावात् प्रतियोगिन उत्पत्त्या प्रागभावनाशसम्भवादित्याहुः।

तन्न, भस्मादिसंयोगेन संस्कारानङ्गीकारेण भस्मादीनां संस्कारजनकत्वाभावेन तद्धर्मलक्षणस्य दुष्टत्वात्। संस्काराङ्गीकारे तु तस्यैव शुद्धित्वोपपत्तावेतल्लक्षणालम्बनवैफल्यात्। अनादिपदवैयर्थ्यं च—यावत्संसर्गाभावसाहित्यविवक्षायामपि दोषाभावात्। तथाहि ध्वंससाधारणसंसर्गाभावाविवक्षायामपि प्रागभावनाशे विशिष्टाभावोपपत्तेः,

ध्वंसस्य ध्वंसासम्भवेन प्रागभावसत्तायां ध्वंसध्वंसमादायातिप्रसंगासम्भवात्।

वस्तुतस्तु संसर्गपदमपि व्यर्थम् अन्योन्याभावसाधारण्येऽप्यदुष्टत्वात्–अत्रापि ध्वंसन्यायेनातिप्रसङ्गाभावात्। वस्तुतस्तु सहजशुद्धिसाधारणमिदं लक्षणं न स्यात्। तत्र संस्कारकसंस्करणीयसम्बन्धोत्पत्तिध्वंसाभावात्। एवञ्च वनादानीतेन कुशादिना क्रियमाणं कर्माशुद्धिमत्कुशादिकृतमेव स्यात्। अत एव पदार्थान्तरापनिपाताभिया संस्कारगर्भं माऽस्तु लक्षणं भस्मादिगर्भमेवास्तु इत्यपास्तम्। भस्मादीत्यत्र भस्मादेरेकस्याभावेनाननुगमाच्च। तस्मादशुद्धिप्रयोजकचाण्डालादिसम्बन्धपुत्रजन्मादिज्ञानानिवर्त्याऽशुद्ध्यधिष्ठातृदेवतासन्निधिरूपवाशुद्धिस्तदभावश्च शुद्धिः। स च वनादानीते कुशादौ प्रागभावात्यन्ताभावान्यतररूपः उपहतुभस्मादिसंयोगजन्यो नाशरूपः। एवं पुत्रजन्मादावपि पूर्वम्प्रागभाग एव अग्रे दशाहादिग्निकालजन्यो ध्वंस एव। न चाशुद्धेर्नञा सम्बन्धेनाभावत्वम् शुद्धेरेव शुद्ध्यधिष्ठातृदेवतासम्बन्धरूपतया भावत्वमस्त्विति वाच्यम् सहजशुद्धिस्थले शुद्धेः कारणान्तरसुसाध्यतयोपघातस्थले भस्मादिसम्बन्धसाध्यतयाऽननुगमापत्तेः। न च तत्रासम्बद्धस्य कथं भावत्वमिति वाच्यम् प्रलयविनाशावसानान्धकारवदुपपत्तेः। तस्माददृष्टविशेषो वा देवतासन्निधानं वाऽशुद्धिः यावत्तत्संसर्गाभावः शुद्धिः। एवञ्चैकाशुद्धौ नष्टायामप्यपराशुद्ध्युत्पादे न शुद्धिः यावदशुद्ध्यभावाभावात्। न वा शुद्ध्यधिष्ठातृदेवतायां प्रमाणाभावः––अधर्माधिष्ठातृदेवतावदुपपत्तेः तस्याश्चिरन्तनैरप्युररीकारात्। तस्माच्च शुद्ध्यशुद्ध्योः पदार्थान्तरत्वमित्यलमतिप्रसङ्गेन॥

(४)नन्वस्ति भावना पदार्थान्तरमेव–लिङादयः, अर्थात्मभावनात्वन्या सर्वाख्यातस्य गोचरः। लिङभिधा सैव च शब्दभावनाभाव्या। तस्याः पुरुषस्य प्रवृत्तिः सम्बन्धबोधः करणं, तदीयप्ररोचना चाङ्गतयोपयुज्यते। लिङोभिधा लिङ्विशिष्टा लिङ्जन्यलिङ्वाच्या च। लिङ्पदेन चात्र विधिग्रहणम्। लिङ्लोट्तव्याविषयः। कृत्याः पञ्च समाख्याताः—भावे कर्मणि तव्यानीयौ यत्प्रत्ययाः। एतावद्भिरेवाधाराधेयभावजन्यजनकभाववाच्यवाचक-

भावात्मकसम्बन्धत्रयेण याभिधा शब्दः सैव च भावना शाब्दी-भावना शब्दनिष्ठत्वात्। सा च त्र्यंशा—किं केन कथमित्यंशाः। के-नांशः कारणांशः। तत्र शब्दभावनाभाव्या प्रवृत्तिः। विध्यभिधयो-र्वाच्यवाचकरूपसम्बन्धज्ञानं कारणम्। वायुर्वै क्षेपिष्ठा देवतेत्यादि स्तावकं वाक्यं प्ररोचना सैवाङ्गमिति शाब्दीभावनैका सर्वाख्या-तवाच्या। अर्थात्मभावना द्वितीया सा शब्दातिरिक्तात्मरूपार्थनि-ष्ठत्वादार्थी। अस्या भाव्यांशे स्वर्गादि फलम्। कारणांशो दर्शादि प्रधानम्। अङ्गांशः प्रयाजाद्यङ्गम्। एवञ्च द्विविधभावनास्वरूपं पदा-र्थान्तरं किमिति नेति चेन्न।

शाब्दभावनायां मानाभावात्। अर्थभावनायाः प्रवृत्त्या-त्मकत्वात्। नास्ति शाब्दभावनायां मानम्। तथाहि व्या-पारातिरिक्तस्य परनिष्ठव्यापारजनकत्वं स्वनिष्ठव्यापारद्वारा। यथा व्यापारातिरिक्तस्य दण्डस्य चक्रनिष्ठभ्रमिलक्षणव्यापारजन-कत्वं स्वनिष्ठसंयोगलक्षणव्यापारद्वारा तथा व्यापारातिरिक्तश-ब्दस्य परात्मनिष्ठप्रवृत्तिलक्षणव्यापारजनकत्वं स्वनिष्ठाभिधाव्यापा-रापेक्षया। स्वनिष्ठव्यापारे च व्यापारान्तरापेक्षायामनवस्थापत्तेरिति व्याप्तौ स्वनिष्ठातिविशेषणव्यर्थत्वम्। तथा चेष्टसाधनतादिज्ञाना-दिनैव प्रवृत्तिजनकत्वमिति काऽनुपपत्तिः। न चेष्टसाधनताज्ञा-नेपि व्यापारापेक्षा यावत्परनिष्ठव्यापारे व्यापारापेक्षायाम्प्रमाणा-भावात्। तस्मान्न भावनाख्यं पदार्थान्तरं भावनीयमिति।

(५)नन्वस्तु स्वत्वं वस्त्वन्तरम्। तथाहि न तावद्विनियोगविष-यत्वं तत्। विनियोगविरहदशायां ब्राह्मणस्वत्वापत्तेः। विनियो-गविषयात्यन्ताभावानधिकरणत्वरूपायास्तद्योग्यतायाः सत्त्वात् योग्यतावच्छेदकस्यैव पदार्थान्तरत्वापत्तेश्च। ततस्तस्करस्यापि स्वत्वापत्तेश्च। तस्यापि चौर्यादिहृते विनियोगदर्शनात्। तथेष्ट-द्विनियोगस्यापि तस्कराणां दर्शनात् न यथेष्टविनियोगगर्भमपि लक्ष-णम्। नापि वेदानिषिद्धयथेष्टविनियोगविषयत्वम्, विनियोगविषये विनियोगाभावदशायां स्वत्वानापत्तेः। कदाचिद्विनियोगविषयत्व-विक्रीतेपि सत्त्वादिति चेत्।

अत्राहुः—वेदासिद्धविनियोगप्रयोगप्रयोजकक्रियाविषयतामा-

(से०)रभ्य यावन्न वेदसिद्धविनियोगप्रतिबन्धाक्रियाविषयतापन्नं ताव-त्स्वत्वम् । एवञ्च क्रयादिविषयतामारभ्य यावन्न विक्रयादिविषयता तावत् स्वत्वम्, चौर्यविषयतायान्तु स्वत्वं तिष्ठत्येव तस्य स्वामिवि-नियोगप्रतिबन्धकत्वेन बोधाबोधितत्वात् । पितृद्रव्येषु तत्स-त्वेऽव्याप्तिस्तत्र पुत्रस्य विनियोगप्रयोजकप्रतिग्रहादिक्रियाविरहा-दिति । तत्र पितृक्रियाविषयताया एवैतत्स्वप्रयोजकत्वात् । एवञ्च वेदसिद्धयद्विनियोगप्रयोजकाक्रियाविषयतामारभ्य वेदसिद्धयद्विनि-योगप्रतिबन्धकक्रियाविषयत्वाभावो यावद्यत्र तावत् तस्य स्वत्व-मिति लक्षणं पर्यवस्यति न तु यत्क्रियादिविषयत्वगर्भमिति येन पुत्रक्रियाविरहेणाव्याप्तिः स्यादिति दिक् ।

(६) नन्वस्ति क्षणिकं पदार्थान्तरम् । तथाहि तत्र विप्रतिपत्तिः— अयं घटः स्वोत्पत्त्यव्यवहितक्षणवर्त्तिध्वंसप्रतियोगी न वा । विधिको-टिरत्र नास्तिकानाम् तत्प्रसिद्धिस्त्वेतद्घटोत्पत्त्यव्यवहितक्षणध्वस्ते पदार्थान्तरे । निषेधकोटिरास्तिकानाम् तत्प्रसिद्धिरेतद्घटोत्पत्त्यन-न्तरक्षणान्तरोत्पन्ने तस्यैतद्द्वितीयक्षणे ध्वंसाभावात् । अनु-मानञ्चेत्थम्—अयं घट एतदुत्पत्त्यव्यवहिताग्रिमक्षणवर्तिध्वंसप्र-तियोगी एतदुत्पत्त्यव्यवहितोत्तरक्षणपूर्वक्षणोत्पन्नत्वात् उभय-सिद्धतत्पूर्वोत्पन्नतत्क्षणध्वस्तपदार्थवत् । न चैवं घटादीनामेव क्षणिकत्वसिद्धौ न पदार्थान्तरसिद्धिरिति वाच्यम् । अस्य क्षणि-कतावागवतारस्य प्रसङ्गतः कृतत्वात् । पदार्थान्तरसिद्धिप्रकारस्तु क्षणः स्वमात्रवृत्तिपदार्थवान् कालोपाधित्वाद्दण्डवत्, द्रव्यादि च ततो भिद्यते द्रव्यत्वादिमत्त्वादिति पदार्थान्तरसिद्धिरिति चेन्न,

अप्रयोजकत्वात् । न च तेन विना क्षणलक्षणानुपपत्तिः तस्मिन् सति तु तल्लक्षणम् इति वाच्यम् उत्पन्ने कर्मणि यावन्न विभाग-स्तावत्कालः क्षण इत्यादि–क्षणलक्षणस्य कालनिरूपणे वाच्यत्वात् । अवतारितक्षणिकतावादनिराकरणन्त्वात्मग्रन्थे कर्तव्यमिति संक्षेपः ।

(७) ननु वैशिष्ट्यं पदार्थान्तरम् कथमन्यथा घटाभाववद्भूतल-मित्यादिप्रत्यय इति चेत्, वैशिष्ट्यस्वीकारेऽप्यनवस्थाभयेन स्वरूपस-म्बन्धे पर्यवसाने तेनैवोपपत्तौ तस्य वैयर्थ्यात् । समवाये च वि-निगमकस्य निरुक्तत्वात् । ननु मास्तु वैशिष्ट्यस्य पदार्थान्तरत्वं तथापि विशिष्टमस्तु पुरुषो दण्डी पुरुष इति प्रतीत्योर्विशेषात्—

(क्षे०)"अर्थेनैव विशेषो हि निराकारतया धियाम्" इत्यभ्युपगमादिति चेत्, न, एकत्र पुरुषस्यापरत्र दण्डावच्छिन्नपुरुषस्य दण्डपुरुषसम्बन्धानां वा विषयत्वात् पदार्थान्तरस्वीकारे गौरवात्।

(८) ननु तथापि समूहलक्षणं पदार्थान्तरमक्षतम् यदवलम्बनज्ञानं समूहालम्बनमित्युच्यते, न ह्यनेकविषयत्वं तत्–दण्डी पुरुष इत्यस्यापि दण्डपुरुषाविवितिवत् समूहालम्बनत्वापत्तेः। न च दण्डी पुरुष इत्यस्य सम्बन्धविषयकत्वात्ततो भेदः, दण्डपुरुषसम्बन्धा इत्यतो भेदानापत्तेः। न च सम्बन्धप्रतियोगित्वानुयोगित्वे विशिष्टबोधविषयीभूते इति भेदः, दण्डपुरुषसम्बन्धा इत्यतो भेदानापत्तेः। न च सम्बन्धा इति समूहालम्बनस्य विशिष्टबोधत्वापत्तिरिति समूहलक्षणपदार्थान्तरविषयकं समूहालम्बनं तदविषयकं विशिष्टज्ञानमिति चेन्न संसर्गमर्यादया प्रतियोगित्वादिविषयकस्य विशिष्टबोधत्वात्। तादृशस्य च समूहालम्बनत्वात्।

(९) नन्वस्तु प्रकारित्वं पदार्थान्तरम्। तथाहि—न तावज्जातिरूपमिदं सामान्यादावपि सत्त्वात्। न द्रव्यकर्मगुणात्मकं गुणकर्मवृत्तित्वात्। न समवायविशेषाभावात्मकं अभाववृत्तित्वात्। नापि भासमानवैशिष्ट्यप्रतियोगित्वं प्रकारत्वं तदनुयोगित्वञ्च प्रकारित्वमिति वाच्यम्। घटोयमित्यत्र घटत्वस्य प्रकारमात्रत्वं घटत्वमित्यत्र घटस्येति वस्तुगतिः तत्र व्यत्ययः स्यात्–भासमानं हि वैशिष्ट्यमिह समवायलक्षणं तत्प्रतियोगित्वानुयोगित्वे उभयत्र सर्वदा वर्तते स्वरूपसम्बन्धरूपं हि तदुभयम्। न च घटोयमिति बोधदशायां घटत्वे प्रतियोगित्वं घटत्वमिति बोधदशायां त्वनुयोगित्वमिति वाच्यम्। एकदा व्यधिकरणबोधद्वयसम्भवात, उभयाकारस्यैकबोधस्य सम्भवाच्च, सामयिकप्रतियोगित्वादिकल्पने मानाभावाच्च। नापि भासमानं यद्वैशिष्ट्यप्रतियोगित्वं तत्तत्प्रकारकत्वमनुयोगित्वञ्च तादृशप्रकारित्वमिति वाच्यम्। जायते हीदं रजतमिति भ्रमः। स च द्विविधः–एकस्तादात्म्यारोपोऽपरस्तु संसर्गारोपः। तत्र तादात्म्यारोपे रजततादात्म्यं शुक्तौ भासते। एवञ्च तत्तादात्म्यप्रतियोगित्वं रजते भासते तथाच रजतं प्रकारः स्यात्, तथासतीष्टतावच्छेदकप्रकारकज्ञानस्य प्रवर्तकतयेदं रजतमिति तादात्म्यारोपाद्रजतवदर्थिनः प्रवृत्तिः स्यादिति चेन्न तादात्म्यातिरिक्तभासमानवैशि-

(से०)ष्ट्यप्रतियोगित्वस्य प्रकारत्वात् । न चैवं रजतत्वमपि न प्रकारः स्यादिति वाच्यम् । तत्र रजतत्वाश्रयतादात्म्यस्य वैशिष्ट्यत्वात् रजतत्वतादात्म्यस्यावैशिष्ट्यत्वात् । एवञ्च स्वतादात्म्यातिरिक्त वैशिष्ट्यप्रतियोगित्वं यत्र संसर्गमर्यादया भासते स प्रकारः । अनुयोगित्वगर्भं चेदृशं प्रकारित्वम् ।

इदं चावधेयम् । तादात्म्यारोपे रजतं विशेषणं भवत्येव तत्र तादात्म्यभिन्नत्वस्य विशेषणस्यादानात् प्रकारस्तु न भवति तद्धर्मलक्षणाभावात् । एवञ्च विशेषणत्वव्यापकं प्रकारत्वं वाच्यम् एवं विशेष्यत्वव्यापकं प्रकारित्वमपीत्यस्मात्पितृनिर्मितिपरिशीलनसुखं लभेथाः। ननु ज्ञाने घटाविशिष्टत्वञ्च ज्ञानत्वमेव—सर्वज्ञानानां घटाविषयकतापत्तेः किन्तु घटाकारत्वम् तथाच घटाहितं किञ्चिज्ज्ञाननिष्ठं सकलपदार्थेषु प्रकारान्तरमिति चेन्न विषयविषयिभावस्य स्वरूपसम्बन्धविशेषरूपत्वेन प्रकारवादापवादात् । अत एव घटविषयकत्वं ज्ञाने न घटजन्यत्वं विषयाजन्यस्यानुमित्यादेर्निर्विषयकतापत्तेः, जन्यजनकभावेन विषयविषयिभावे चक्षुरादेरपि विषयत्वापत्तेः, तस्माज्ज्ञानाहितज्ञातताधारत्वमेव विषयत्वं तस्मादस्ति ज्ञाततालक्षणं पदार्थान्तरमिति निरस्तम् । स्वरूपसम्बन्धविशेषेणैवान्यथासिद्धेः । अपि च केनचित् विज्ञानेन काचिदेव ज्ञातताऽऽधीयत इत्यत्र तयोः कश्चिद्विषयो वाच्य इति स एव स्वरूपसम्बन्धात्मको विषयविषयिभावोऽस्तु किं ज्ञाततया, किञ्च ज्ञाततायाः स्वरूपसम्बन्धस्यावश्यकत्वे ज्ञानेनैव सोऽस्तु । ननु ज्ञाततायां चाक्षुषप्रत्यक्षमेव साक्षि तच्च ज्ञानविषयत्वमेव तद्विषये ज्ञानस्याचाक्षुषत्वात्, न च ज्ञातोयं घट इति मानस एव बोधो, मनसो बहिरस्वातंत्र्यादिति चेन्न अनुव्यवसायोपनीतस्य ज्ञानस्य चाक्षुषज्ञानविषयत्वात् व्यवसायोपनीतस्य घटादेर्वा मानसज्ञानविषयत्वात् । न चोपनीतस्य विशेष्यतया भानाभावेन कथं ज्ञातोऽयं घट इति मानसो बोध इति वाच्यम् बहिरिन्द्रिय एवं तथा नियमात् । ननु घटादीनां कर्मत्वं ज्ञाततां विना नोपपद्यते परसमवेतक्रियाफलशालित्वं हि तत् ज्ञातातिरिक्तं च ज्ञानजननक्रियाफलमिति चेन्न व्यवहारादीनामेव फलत्वात् ।

(९)सङ्ख्या तु गुण एव न पदार्थान्तरमिति । तथाहि—अस्ति तावद्द्व्यणुकपरिमाणं भावकार्यत्वात् सासमवायिकारणकम् न चात्र प्र-

(से०)चयात्ययः संयोगोऽसमवायिकारणम्, तस्यावयवपरम्परा-पर्य्यैव भावात् परमाणोश्च निरवयवत्वात्। नापि परमाणुपरिमाणं, द्व्यणुकपरिमाणस्य परमाणुपरिमाणापेक्षयोत्कृष्टत्वापत्तेः। कारणप-रिमाणापेक्षया कार्यपरिमाणे कारणपरिमाणगतपरिमाणत्वव्या-प्यजातिपुरस्कारेणाणुतर इति प्रयोगः स्यात्, तस्मात्परमाणुद्वित्व-मेव द्व्यणुकपरिमाणासमवायिकारणमिति संख्याया गुणत्वसिद्धिः।

(१०)सादृश्यन्तु तद्भिन्नत्वे सति तद्गतभूयोऽसाधारणधर्मवत्त्वमेव। तस्मिन्नेव तत्सादृश्यवारणाय तद्भिन्नत्वे सतीति। विसदृशयोस्त-द्वारणाय न तावन्मात्रम्। साधारणधर्मेण तद्वारणायासाधारणेति। एकद्विधर्मेण तद्वारणाय भूय इति। ननु गवादिधर्माणां गवयादिग-तानां जात्यादिरूपाणां ज्ञाने न गवादिज्ञानसापेक्षत्वं जात्यादिज्ञानेऽन्य-ज्ञानापेक्षाया अदर्शनादिति चेन्न गोभिन्नत्वादिज्ञाने गवादिज्ञानापेक्षा-या उचितत्वात्। एवं तद्गतधर्मवत्त्वज्ञाने तज्ज्ञानापेक्षोचितैवेति प्राञ्चः। भाव इवाभावः प्रमेय इति साधारणधर्मेणापि सादृश्यव्य-वहारो चन्द्रमण्डलमिव तव मुखमाल्हादकमित्येकेनापि असाधा-रणधर्मेण सादृश्यव्यवहाराच्च भूयःपदमसाधारणपदं च न देयमि-त्यर्वाचीनाः। न च तद्भिन्नत्वे सतीत्यपि विशेषणमनादेयमेव क-थमन्यथा—

गगनं गगनाकारं सागरः सागरोपमः।
रामरावणयोर्युद्धं रामरावणयोरिव॥

इत्यादाविवादिशब्दैः सादृश्यप्रतीतिर्भवतीति वाच्यम् अत्र सादृश्याप्रतीतेः। तथाहि—गगनं गगनाकारमित्यस्य हि भवन्मते गगनसदृशमित्यर्थः। स च गगनं गगनगतधर्म-वदिति पर्यवसन्नः। न चैतावता गगनस्य कोपि प्रकर्षः पदार्थ-मात्रस्यैवंविषयत्वात्। न हि घटो न स्ववृत्तिधर्मवान्। एवञ्च ग-गनं गगनाकारमित्यस्य गगनं स्ववृत्तिधर्मवत्पदार्थान्तररहितमित्य-र्थः। स च यत्सादृश्यं गगने स नास्ति इति पर्यवसन्नः। एतावता गगनस्य प्रकर्षः प्रतीयते तथा चात्र सादृश्याप्रतीतेर्न तत्सङ्ग्रहाय त-था लक्षणमुक्तमिति। एवञ्च नोपमाऽलङ्कारे सादृश्यप्रतीतिरिति वदन्त आलङ्कारिका निरलङ्कारा एव। एवञ्च वैसादृश्यमपि न पदार्थान्तरं सादृश्याभावस्य वैधर्म्यस्यैव वैसादृश्यपदार्थत्वा-

(से०)दिति दिक् ।

(११)नन्वस्माद्गकारादसौ तारोऽसौ मन्द इति प्रतीतिबलादस्ति गकारादौ तारत्वं मन्दत्वञ्च, न चैतज्जातिरूपम् गत्वादिना सङ्करप्रसङ्गात् । न च गत्वादिव्याप्यनानातारकारा उपात्तव्याहानापत्तेः जातिरूपत्वे मन्दज्ञानसापेक्षज्ञानत्वापत्तेश्चेति पदार्थान्तरमेव तदिति चेत् तारत्वमन्दत्वयोरुत्कर्षापकर्षरूपत्वेन जातिरूपत्वात् सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकशब्दवृत्तिजातित्वेन सजातीयप्रतिबध्यसाक्षात्कारविषयतावच्छेदकशब्दवृत्तिजातित्वेन च तारत्वमन्दत्वयोरनुगमात् एतावता ज्ञानस्य च घटसजातीयज्ञानसापेक्षतया मन्दादिज्ञानापेक्षणात् । तस्मान्न तारत्वमन्दत्वयोः पदार्थान्तरत्वमिति ।

(१२)नन्वाधाराधेयभावः पदार्थान्तरम् । तथाहि-न तावद्धर्मित्वमाधारत्वमाधेयत्वञ्च धर्मत्वम् , तयोरेवानिर्वचनात् धर्मवत्त्वस्य धर्मित्वे घटस्य धर्मत्वं स्यात् । यत्र तिष्ठति स आधारो यस्तिष्ठति स आधेय इति चेन्न गोषु दुह्यमानासु देवदत्तो गतो-दण्डे सति घट इत्यादौ सतिसप्तमीप्रयोगेऽतिव्याप्तेः । एवं निमित्तसप्तम्यामपि । यतोऽधिकरणसप्तमीत्यादिकरण आत्माश्रयापत्तेः भूतले घटं पश्येत्यत्र प्रथमाविरहाच्च, अज्ञातविभक्तिविभागानामाधाराधेयभावानुपपत्तेश्च । अधोदिगवस्थितत्वमाधारत्वमूर्ध्वदिगवस्थितत्वमाधेयत्वमिति चेन्न भूतलस्य गगनावस्थितपक्ष्याद्याधारतापत्तेः । गुरुत्वप्रतिबन्धकत्वमाधारत्वं प्रतिबध्यगुरुत्वाश्रयत्वमाधेयत्वमिति चेन्न गुणादावाधाराधेयभावानुपपत्तेः । संबद्धयोरधः स्थितस्याधारत्वमूर्ध्वस्थितस्याधेयत्वमिति चेन्न चरणदललग्नरजःकणादेश्चरणाधारतापत्तेः । पुरुषादीनां गोत्वं व्यञ्जकम् एवमन्यदपि क्वचित्किञ्चिद्वाच्यमिति चेन्न अननुगमापत्तेः । गवि गोत्वमित्यादेर्व्यञ्जकत्वाद्यप्रतीतेश्चेति चेत्,

अत्रोच्यते—यथा भावाभावयोः प्रतियोग्यनुयोगिभावस्वरूपसम्बन्धविशेषस्तथाऽऽधाराधेययोस्तद्भावोऽपि स एव । स्वरूपसम्बन्धानां च वैलक्षण्यं सर्ववादिसंमतमेव कथमन्यथा घटतदभावयोर्घटाभावभूतलयोश्च स्वरूपैः सम्बन्धभेदः । न चैवं घटघटत्वादीनां स्वरूपसम्बन्धस्यावश्यकत्वे किं समवायेनेति वाच्यम् समवायावसायसाधकानां साधितत्वादिति संक्षेपः ।

(से०)(१३)न चास्त्वभावत्वं पृथक्त्वम्। न च जातावस्यान्तर्भावः समवाय रहितेऽभावे तदसम्भवात्। न चाभावेपि समवायध्वंसस्य समवेतत्वे समवायिकारणनाशान्नाशे प्रतियोग्युन्मज्जनानवस्थयोरेकतरप्रसङ्गात्। सुखादिप्रागभावस्य समवेतत्वे एकवृत्तिजातेर्विशेषतापत्तेः। न च भावस्यैव समवायिकारणनाशान्नाशो विशेषलक्षणेपि भावत्वं विशेषणमिति वाच्यम लाघवेन कार्ये प्रत्येव समवायिकारणनाशस्य नाशकत्वात् भावकार्ये प्रतीति गौरवात् अभावस्य समवेतत्वसिद्धौ भावकार्ये प्रतीत्यत्र विशेषणं भावविशेषणे सिद्धे चाभावस्य समवेतत्वसिद्धिरित्यन्योन्याश्रयाच्च। एवं विशेषलक्षणे भावत्वविशेषणेप्यन्योन्याश्रय एव अभावस्य समवेतत्वसिद्धौ भावत्वविशेषणं भावत्वविशेषणे चाभावस्य समवेतत्वसिद्धिरिति। ननु गुणकर्मणोर्नाश एव समवायिकारणनाशस्य जनकता द्रव्यनाशस्त्वसमवायिकारणनाशादेव द्व्यणुकस्थले तथा दर्शनात्। न च कपालनाशानन्तरं घटनाशार्थं कपालद्वयसंयोगनाशप्रतीक्षायां समवायिकारणं विना घटस्य क्षणद्वयमवस्थानं स्यादिति वाच्यम् एकक्षण इव क्षणद्वयेप्यवस्थाने क्षत्यभावात्। एवं च न कार्यमात्रनाशं प्रति समवायिकारणनाशस्य जनकतेति चेत् कपालनाशत्वेन जनकतायां कपालसमवेतकार्यनाशत्वेन जन्यत्वे लाघवात् द्रव्येतरेति विशेषणप्रक्षेपे गौरवात्। न चकत्रासमवायिकारणनाशाद्द्रव्यनाशे सर्वत्र तथा, प्रमाणाभावात्। न च क्वचित् समवायिकारणनाशस्य क्वचिदसमवायिकारणनाशस्य द्रव्यनाशकत्वेऽननुगमापत्तिरिति वाच्यम् निमित्तकारणेतरकारणनाशत्वेनानुगमात्। एवञ्च यथा गुणनाशः क्वचित्समवायिकारणनाशात् यथा घटनाशाद्घटरूपादिनाशः, क्वचिदसमवायिकारणनाशात् यथोपान्त्यशब्दनाशादन्त्यशब्दनाशः,क्वचिद्विरोधिगुणात् यथा द्वितीयशब्दादेः प्रथमशब्दादिनाशः, क्वचिन्निमित्तकारणनाशात् यथापेक्षाबुद्धिनाशः, क्वचिन्निमित्तात्यन्ताभावात् यथाऽदृष्टविशेषविशिष्टेश्वरापेक्षाबुद्धेरदृष्टविशेषणध्वंसेनात्यन्ताभावे तज्जन्यपरमाणुद्वित्वादिनाशः। अदृष्टविशेषध्वंसादेव तन्नाश इत्येके। यथा वा कर्मनाशः क्वचित्समवायिकारणनाशात् यथा घटनाशे घटकर्मनाशः,क्वचिदुत्तरदेशसंयोगात् उत्तरदेशसंयोगनाश्यौ कर्मविभागाविति स्मरणात्, तथा द्रव्येनापि

(से०)कश्चित्समवायिकारणनाशात् । एवञ्च कार्यमात्रनाशंप्रति सम· वायिकारणनाशस्य जनकतायां ध्वंसस्य समवेतत्वे समवायिकार· णनाशान्नाशः स्यादेवेति । अत्यन्ताभावान्योन्याभावयोश्च समवेत· त्वं नित्यानेकसमवेतत्वाज्जातित्वं जायेत, तस्मान्न जातिरभा· वत्वम् । नन्वभावो मास्तु समवेतोऽभावे तु जातिसमवायः स्या- द्गगनादाविवेति चेन्न जातेस्सत्ताव्याप्यत्वानियमेन जातिमत्त्वे स· त्तावत्त्वप्रसङ्गात् । न चेष्टापत्तिः, अभाव इति व्यवहारानुपपत्तेः त· स्य सत्तानिषेधप्रकाशप्रकाशकत्वात् तत्र नञा सम्बन्धे तन्निषेध· प्रतीतेः । नन्वस्त्वभावत्वमुपाधिरिति चेन्न तथा हि-न तावद्भावभि· न्नत्वं तत् । भिन्नत्वं चान्योन्याभावत्वम् तच्च त्रैकालिकसंसर्गाभाव· त्वम् संसर्गाभावत्वं च प्रतियोग्यारोपकहेतुकधीविषयाभावत्वम्— इत्यात्माश्रयात् । प्रतियोगिताविषयत्वे च स्वरूपसम्बन्धविशेषौ । स्वरूपसम्बन्धश्च सम्बन्धान्तरमन्तरेण विशिष्टप्रतीतिजननयोग्य· त्वम् जननयोग्यत्वञ्च जनकतावच्छेदकधर्मवत्त्वमिति पुनरपि हे· तुत्वप्रवेशेनात्माश्रयात् । सम्बन्धान्तरमन्तरेणेत्यत्र सम्बन्धान्तरा· त्यन्ताभाव इत्यर्थेत्यन्ताभावप्रवेशेन पुनरप्यात्माश्रयात् । सम्बन्ध· त्वस्याविशिष्टधीव्यावृत्तविशिष्टधीनियामकत्वरूपतयाऽविशिष्टधी· व्यावृत्तत्वस्याविशिष्टबुद्ध्यनियामकत्वरूपतयाऽनियामकत्वस्याभा· वगर्भतया चात्माश्रयात्, अविशिष्टधीत्यत्राप्यभावप्रवेशाच्च । स· म्बन्धान्तरेत्यत्र प्रकृतसम्बन्धातिरिक्तेत्यर्थकरणे रूपतया प्रागभा· वत्वस्यानादिसान्तत्वाभावप्रवेशाच्च । हेतुत्वशरीरे पूर्ववर्तित्वप्र· वेशेन पूर्ववर्तित्वस्य प्रागभावावच्छिन्नसमयवर्तित्वरूपतया प्राग· भावत्वस्यानादिसान्तत्वरूपतयाऽनादित्वसान्तत्वयोरभावगर्भतया- ऽऽत्माश्रयाच्च । नन्वभावाकारप्रतीतिविषयत्वमिति चेन्न अभावा· कारत्वस्याभावविषयकत्वरूपतयात्माश्रयात् । अभावपदशक्तिविशे· ष्यत्वमभावत्वमिति चेत् न विशेष्यत्वस्य स्वरूपसम्बन्धविशेषरू· पतयात्माश्रयात् । सत्ताराहित्यत्वमभावत्वमिति चेत् न सा· मान्यादावतिव्याप्तेः अत्यन्ताभावस्याभावेऽभावाच्च अत्यन्ता· भावस्य त्रैकालिकसम्बन्धसंसर्गाभावरूपतया संसर्गाभावे· ऽभावप्रवेशेनात्माश्रयाच्च । अभावइति—प्रयोगजनकधीवि· षय त्वमिति चेन्न इष्टसाधनताज्ञानविषय इष्टसाधनत्वेऽतिव्याप्तेः ।

(खे०)व्यवहर्तव्यज्ञानत्वेन जनकत्वं विवक्षितमिति चेन्न जनकत्वजठर-जिज्ञासायां निजाश्रयापत्तेः। विधिमुखप्रत्ययाविषयत्वमिति चेन्न अविषयत्वेऽभावप्रवेशात् अस्तीति प्रत्ययस्याभावेपि सत्त्वेन विधिमुखप्रत्ययत्वसत्त्वाच्च। भावत्वप्रकारकप्रमित्यविषयत्वमिति चेन्न भावत्वस्याभावाविशेष्यकप्रतीतिविशेष्यतयाऽऽत्माश्रयात्। एवं संसर्गाभावत्वमपि न प्रतियोग्यारोपहेतुकधीविषयाभावत्वम् आरोपस्य भ्रमरूपतया भ्रमत्वस्य यत्र यन्नास्ति तत्र तत्प्रकारकज्ञानत्वरूपतया सादित्वस्य प्रागभावप्रतियोगित्वरूपतयात्माश्रयात्। एवं ध्वंसत्वमपि न साद्यभावत्वम् ध्वंसगर्भप्रागभावगर्भत्वात्। अत्यन्ताभावत्वमपि न त्रैकालिकसंसर्गाभावत्वम संसर्गाभावेत्यन्ताभावप्रवेशात्। नाप्यन्योन्याभावत्वम्प्रतियोगितावच्छेदकारोपहेतुकधीविषयाभावत्वम् अवच्छेदकत्वस्यावच्छेद्यान्यूनानतिरिक्तवृत्तित्वरूपतया नियमस्य व्याप्तिरूपतया तत्रान्योन्याभावप्रवेशनात्माश्रयात्। एवं चाभावत्वादयो भिन्ना एव पदार्था इति चेन्न,

एतेषामखण्डोपाधिरूपत्वात्। नच तस्यैव पदार्थान्तरत्वम् सामान्यान्तर्भावात्। न चापसिद्धान्तः सामान्यं द्विविधमुपाधिरूपं जातिरूपञ्च उपाधिर्द्विविधः—सखण्डोऽखण्डश्चेति वर्द्धमानोपाध्यायलिखितत्वेनास्मत्पितृचरणगुरुभिः शीघ्र [श्रीमत्?] प्रगल्भभट्टाचार्यैर्लिखनात्। उदयनाचार्यैस्तु प्रकृतभाष्यव्याख्यावसरे जातिरूपस्यैव सामान्यस्य प्रदर्शनं कृतं स्वतन्त्ररीत्या उपाधिरूपस्य सामान्यस्य बहुषु स्थलेषु तैरपि स्वीकारात्। स्वरूपसम्बन्धविशेष एवाभावत्वादिरित्यपि केचित्। प्राभाकरास्त्वभाव एव नास्ति कुत्राभावत्वम् सति धर्मिणि धर्मचिन्तेति न्यायात्। न चैवं भूतले घटो नास्तीतिप्रतीत्यनुपपत्तिः केवलाधिकरणेनैवाभावप्रत्ययोपपत्तेरिति चेत् कैवल्यस्य घटशून्यत्वरूपतयाऽभावस्वीकारात् भूतलस्य भूतलावृत्तितयाऽऽधाराधेयभावानुपपत्तेः। घटवद्भूतलभिन्नं भूतलमभाव इति चेन्न पूर्वं घटवति पश्चात् घटशून्ये घटवद्भिन्नत्वाभावात् स्वरूपभेदस्यापि व्याप्यवृत्तित्वात् अवृत्त्यत्यन्ताभावे तद्वतोऽप्रसिद्धेश्च। उत्पत्स्यते घटो घटात्यन्ताभावो घटभेद इति विलक्षणप्रतीतीनामेकेनाधिकरणेनानुपपत्तेश्च। कालविशेषसम्बन्ध एवाधिकरणेऽभाव इत्येके प्राभाकराः। तदपि न,

(से०)यस्मिन्काले तत्र घटो नास्ति तस्य कालविशेषतया भावपुरस्कारात्। अधिकरणज्ञानमेवाभाव इतीतरे। तदप्ययम्, घटवद्भूतलमिति ज्ञानस्याप्यभावत्वापत्तेः। घटाविषयकं भूतलज्ञानमभाव इति चेन्न घटवति घटास्फुरणदशायां भूतलज्ञानस्याप्यभावत्वापत्तेः। घटवद्भूतलं इतिज्ञानभिन्नं भूतलज्ञानमभाव इति चेन्न एवं हि ज्ञानेऽ्वययोराधाराधेयभावोपपत्तावपि ज्ञानाभावदशायामभावप्रत्ययभावाभावे भावसद्भावापत्तेः। न च तत्र कस्यचिदावश्यकं ज्ञानं, भगवतो भवतानङ्गीकारात् सर्वमुक्तिदशायां केषामपि ज्ञानाभावेन सर्ववस्तुसद्भावापत्तेः। तस्मादस्त्यभावस्तत्त्वान्तरमिति।

(१४) नन्वस्ति व्यञ्जना प्रवृत्त्यन्तरं पदार्थान्तरम्। तथाहि शक्तिरीश्वरेच्छा तज्ज्ञानं वा। लक्षणा तु शक्यलक्ष्यसम्बन्धो यथा गङ्गायां घोष इत्यादौ प्रवाहादितीरादयोः सम्बन्धः संयोगादिलक्षणः। तात्पर्यं तत्प्रतीतीच्छयोच्चरितत्वम्। आकांक्षा पदानां परस्परसहकारिता। सा चैकस्य पदस्यापरपदं विनाऽन्वयबोधाजनकत्वं यथा घटमानयेत्यादौ न ह्यानयेति विना घटमित्यस्यान्वयबोधजनकत्वम्। आकांक्षा च पदयोर्वाक्ययोश्च। पदयोर्यथा घटमित्यत्र नामविभक्त्योः। वाक्ययोस्तु प्रदर्शितैव क्रियाकारकयोः पदसमुदायत्वेन वाक्यत्वात्। घटः कर्मत्वमित्यादौ तु नाकांक्षा स्वरूपायोग्यत्वेनैव फलाजनकत्वेऽपरपदविलम्बेन तदभावात्। अर्थाबाधो योग्यता। अग्निना सिञ्चेदित्यादौ त्वर्थबाध एव। अन्वयप्रतियोग्युपस्थितीनामव्यवधानमासत्तिः। गिरिर्भुक्तमग्निमानदेवेत्यादौ तु व्यवधानमेव। न च शक्त्यादिषु व्यञ्जनान्तर्भावः सम्भवति। तथाहि—

गच्छ गच्छसि चेत्कान्त पन्थानस्सन्तु ते शिवाः।
ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान्॥

इत्यत्र गमनाभावः प्रतीयते। न च तत्र शक्तिः—एतत्पद्यवर्तिनां पदानां गमनादावेव शक्तेः अभावशक्तस्य नञादेरप्रयोगात्। नापि लक्षणा-गङ्गायां घोषस्येव कान्ते गमनस्य बाधाभावात्। तात्पर्यं तु पदार्थविशेषान्वयं बोधयति आकांक्षादयोऽपि तथा। न च गमनाभावः प्रकृतपदार्थान्वितः। तस्माद्गमनाभावप्रत्यायकं व्यञ्जनाख्यं वृत्त्यन्तरं स्वीकार्यम्। तच्च पदार्थान्तरमेव द्रव्यादिषु सप्तस्वनन्तर्भावात्। न तद्द्रव्यगुणकर्मात्मकं—गुणात्मके शब्दे वृत्तेः। नापि सामान्याद्यात्मकम्—

(से०)अर्थस्यापि व्यञ्जकत्वे तस्य च क्वचिदभावात्मकतया तत्र सामान्याद्यसम्भवात्। अथाभावात्मकोऽर्थः कुत्र व्यञ्जक इति चेत्।

उअ णिच्चलणिप्फन्दा विसिनीपत्तम्मि रेहइ बलाआ।

णिम्मलमरगअभाअणपरिट्ठिआ सङ्खसुत्ति व्व॥

अत्र निष्पन्दत्वेन निर्भयत्वं व्यज्यते तेन जनरहितत्वं तेन संकेतस्थानत्वमिति। तथा च निष्पन्दत्वस्याभावरूपस्यैव व्यञ्जकत्वात् तत्र सामान्यादेरसम्भवात् इति चेन्न।

अनुमानेनैव गमनाभावप्रतीतेः। तथाहि गमनं मया न कर्तव्यं मदनिष्टहेतुत्वाद्विषभक्षणादिवत्। मरणरूपानिष्टहेतुत्वप्रतीतिरप्यनुमानादेव इयं-त्वद्गमनं मन्मरणहेतुरिति-ज्ञानवती मदुन्तव्यदेशे जन्मप्रार्थनावत्त्वाद्यन्नैवं तन्नैवम् यथा मयि प्रेमरहितं व्यक्त्यन्तरमिति ज्ञानावच्छेदकतया तद्धेतुत्वसिद्धिः। साध्यतावच्छेदकरूपेण साध्यसिद्धेरनुमानफलत्वात्। तस्मान्न व्यञ्जनाख्यं वृत्यन्तरमिति न तत् पदार्थान्तरमिति। व्यञ्जनायां साधनदूषणप्रकाराविस्तारश्च मत्कृतालङ्कारभास्करकाव्यप्रकाशप्रकाशतत्खण्डनैकावलीविवरणशारदागममनोरमादौ स चमत्कारं द्रष्टव्य इति॥

(१५) ननु स्फोटलक्षणे स्फुटे तत्त्वान्तरे कथं तावन्त्येव तत्त्वानि। न च तत्र मानाभावः—एकं पदमित्यादिप्रतीतेरेव तत्र मानत्वात्। न हि पदादिषु स्वाभाविकमेकत्वं सम्भवति नानावर्णात्मकत्वात्। तस्मात्पदस्फोटैक्यात्पदैक्यम् वाक्यस्फोटैक्याद्वाक्यैक्यम्। एवञ्च स्फोटो द्विविधः—पदस्फोटो वाक्यस्फोटश्च। पदाभिव्यंग्यः पदस्फोटो वाक्याभिव्यंग्यो वाक्यस्फोटः। तत्र पूर्वपूर्ववर्णैरीषद्व्यंग्यश्चरमवर्णेन तु स्फुटतया एवं वाक्येपि पूर्वपदैश्चरमपदेन च ईषत्स्फुटतया व्यज्यते तथा चास्ति स्फोट इति चेत्।

एकशक्तिमत्त्वेनैकानुपूर्वीकत्वेन वा पद एकत्वप्रत्ययोपपत्तेः वाक्येऽप्येकत्वप्रत्यय एकार्थत्वमेवोपाधिः। तदुक्तम्—'अर्थैकत्वादेकं वाक्यं साकांक्षञ्चेद्विभागे स्यात्'—इति। अत्र घटमानय कलशमानयेत्यनयोरेकवाक्यतावारणाय साकांक्षमित्यादि। न च तत्रैकव्यतिरेकेणापरस्यान्वयबोधाजनकत्वमिति नाकांक्षा। ननु पदार्थवाक्यार्थप्रत्यायकत्वेन स्फोटद्वयस्वीकारः पदवाक्याभ्यां स्फोटद्वयप्रतीत्युत्तरमर्थद्वयप्रतीतेरिति चेन्न अन्यथैव तयोः प्रती-

(से०)त्युपपत्तेः—पदं हि सम्बन्धितया पदार्थं स्मारयति हस्तीव हास्तिपकम् तत्र यथा न हस्तिनः स्फोटापेक्षा तथा पदस्यापि। स-म्बन्धश्चात्र शक्त्यादिकमेव वाक्यमपि योग्यतादिसनाथं निजार्थं प्र-थयिष्यतीति किं स्फोटेन। ननु डित्थादिशब्दोपाधित्वेन स्फोट-स्वीकारो डित्थत्वादेर्जातेरुपाधेर्वा वक्तुमशक्यत्वादिति चेन्न यत्र डित्थादिसंज्ञाप्रणयनं तद्गतासाधारणधर्मस्यैव कस्यचित्तदुपाधि-त्वात् न ह्यसाधारणधर्मशून्यो धर्मो जगत्यस्ति अन्याभेदप्रसङ्गात्। न-हि डित्थादिपदात्कल्पितोऽसाधारणो धर्मो न भासतेऽकल्पितः स्फोटस्तु परिस्फुरतीत्यत्र प्रमाणमस्ति। तस्मात्स्फोटोऽपि न शक्त्यादिवत्पदा-र्थान्तरम्।

(१६)ननु विशिष्टबोधे समूहालम्बनाविशेषभङ्गाय किञ्चिद्वैलक्षण्यं वाच्यम्। न च विशिष्टबोधस्य संसर्गविषयत्वं, तद्दण्डी पुरु-ष इत्यत्रेव दण्डपुरुषसंयोगा इत्यत्रापि संसर्गस्य भानात् तथाच संसर्गमर्यादया तथात्वं तथा। सा च न क्लृप्तपदार्थसार्थान्तर्गतेति पदार्थान्तरतया स्वीकार्या। तथाहि न तावद्विशेषणविशेष्यांशातिरि-क्तज्ञानांशाभानमेव, संसर्गमर्यादाभानस्यैव ज्ञाननियामकत्व आत्मा-श्रयापत्तेः संसर्गमर्यादयेति तृतीयया स्फुटं नियामकत्वलाभात्। ननु मास्तु विषयतत्समूहालम्बनाद्विशिष्टधियो विशेषः कार्यकृतो कारणकृतो वा भविष्यति, दण्डी पुरुष इत्यतो दण्ड्यर्थिप्रवृत्तेः समूहालम्बने चातथात्वादिति चेन्न। विशेषणविशेष्यांशातिरिक्त-विषयकत्वस्यैव विशिष्टज्ञाने समूहालम्बनाद्वैशिष्ट्यरूपत्वात्। सं-सर्गमर्यादया भासत इत्यस्य नायमर्थो—यत् संसर्गमर्यादाकरणकबोधे भासत इति। येन करणीभूतायास्तस्याः स्वरूपं मृग्येत किन्तु विशेष-णविशेष्यांशातिरिक्तांशविषयत्वम्। एवञ्च वाक्यार्थमहिम्ना भानम-पि विशेषणविशेष्यांशातिरिक्तशाब्दबोधांशविषयत्वम् तेन वाक्या-र्थमहिमापि न पदार्थान्तरत्वशङ्कादोलामधिरोहति। ननु भवतु भ-वदुक्तं संसर्गमर्यादया वाक्यार्थमहिम्ना च स तन्त्रबीजचिन्ता तु न मदुक्तिमन्तरापैतीति चेत्, सत्यम्, विशेषणज्ञानाच्छब्दात्मि-काया विशिष्टबोधसामग्र्या आकांक्षादिरूपायाः शाब्दबोधसाम-ग्र्याश्च तथात्वात्। न हि समूहालम्बने विशेषणज्ञानविशेष्यभान-सामग्री तद्रूपतया संसर्गग्रहात्मिका विशिष्टबोधसामग्री सम्भव-

(से०)तीति न संसर्गमर्यादावाक्यार्थमहिमा महामहिम्नां मनसि पदार्थान्तरत्वेनैवातरतीति संक्षेपः ।

(१७)ननु पटः पटी वास इत्यादयः पुलिङ्गादयः शब्दाः पुंस्त्वादि प्रतिपादयन्ति । तच्च पुंस्त्वादि न प्रसिद्धमेव पुंस्त्वादि पुरुषादिगतस्य पुंस्त्वादेः पटादावभावात् । पटः पटी वास इति लिङ्गतयाङ्कितपदत्रयेणाभिधीयमानायामेकस्यां व्यक्तौ विरुद्धानां पुरुषादिगतानां पुंस्त्वादीनामसम्भवाच्च । नन्वेतैः शब्दैः पुंस्त्वादयो न प्रतीयन्त एव किन्तु शब्दाकारप्रकारभेदमात्रं लिङ्गभेदेन भवति यथेदमियमयामिति चेन्न लिङ्गं पुंस्त्रीनपुंसकवाच्य उपचयादिरूपो वस्तुधर्म इति प्रसादार्थविरोधात् । तथा च पुंस्त्वादयोपि पदार्थान्तरमेव । ननु महाभाष्यसम्मतिं पुरस्कृत्य प्रसादकृतैव लिखितमुपचयः पुंस्त्वमपचयः स्त्रीत्वमनयोर्विवक्षायां पुंलिङ्गस्त्रिङ्गे उभयविवक्षायां तु नपुंसकमिति, तथाचोपचयादिरेव पुंस्त्वं न तत्त्वान्तरमिति चेन्न पुंलिङ्गादिभिः शब्दैर्य उपचयादिः प्रतीयते तत्स्वरूपानिरूपणात् । न हि वृक्षो गङ्गेत्यादावुपचयापचयौ उत्कर्षापकर्षौ कौचिद् वृक्षगङ्गागतौ प्रतीयेते तथात्वेऽवधिज्ञानापेक्षा स्यात् । ननु भर्तृहरिणा लिङ्गस्य सप्त प्रकारा उक्तास्ते यथा—

स्तनकेशादिसम्बन्धो विशिष्टा वा स्तनादयः ।
तदुपव्यञ्जना जातिर्गुणावस्था गुणास्तथा ॥
शब्दोपजनितार्थात्मा शब्दसंस्कार इत्यपि ।
लिङ्गानां लिङ्गतत्त्वज्ञैर्विकल्पाः सम्प्रदर्शिताः ॥

तथा चैतेष्वन्यतमो लिङ्गार्थ इति चेन्न । तटीत्यादौ स्तनकेशादिसम्बन्धविशिष्टस्तनादितद्व्यङ्ग्यस्त्र्यादिगतजातिविशेषगुणावस्थागुणविशेषाणामप्रतीतेः, न हि तटीतिप्रयोगे तटादौ स्तनादिसम्बन्धो विशिष्टस्तनादिर्वा तद्व्यङ्ग्या स्त्रीगता जातिर्वा स्त्रीगता गुणावस्था गुणा वा कुतोप्यायान्ति प्रतीयन्ते वा—तटस्तटी तटमिति प्रयोगेषु तटस्यैकरीत्यैव प्रतीतेः । नापि शब्देन कश्चिदर्थविशेषो जन्यते स एव लिङ्गभेदेन प्रतीयत इति वाच्यम् शब्दजनितेऽर्थभेदे प्रमाणाभावात् । न हि लिङ्गभेदावच्छिन्नशब्दप्रयोगदशायां तटादिषु जातमर्थविशेषं कश्चिदनुभवति । तस्मात्प्रमणीतटीसाधारणं पुरुषवृक्षसा-

(से०)धारणं षण्ढज्ञानसाधारणं तत्त्वान्तरमेव स्त्रीत्वादि स्त्रीलिङ्गादिभिः शब्दैः प्रतिपाद्यत इति कथं कणादकथिता एव पदार्था इति चेन्न

पुंल्लिङ्गादिषु शब्दाकारभेदप्रकारस्यैव प्रामाणिकत्वेनार्थभेदे माना-भावात् । अत एव भर्तृहरिणापि नरहरिणेव योगजधर्मसाचिव्यादिस्व-विषयज्ञानवताऽत एव तदन्तर्गतास्मदाद्युकपरिशीलनशालिना षट्सु पक्षेषु चास्वरसेन शब्दसंस्कार इत्यपीति लिखितम् । शब्दसंस्कार-श्चेदप्रियमयमिति तेनैव विवृतम् । स चाकारप्रकारभेदान्नातिरि-च्यते । एवञ्च पुंस्त्वादि न तत्त्वान्तरमिति तत्त्वविन्मनोरमं पर्यवसान-म् । ननु स्त्रीलिङ्गादिभिः शब्दैः स्तनकेशादिसम्बन्धादिष्वेकोर्थः कश्चित्प्रकाश्यते, न च तटीघटीप्रभृतिषु तदसम्भवस्तत्र लक्षणया प्रवृत्तेरिति चेन्न । लक्षणा हि न तावत्स्तनादिसम्बन्धवत्त्वेनैव स्वा-र्थादन्येन रूपेण ज्ञाता भवति लक्षणेत्यभिधानात् स्तनादिसम्बन्ध-स्य तत्र बाधात्, अबाधे शक्तिपरित्यागानौचित्यात् । न च तट-त्वादिनैव लक्षणा तेन रूपेण शक्तेरेव स्वीकारात् । अपि च यः श-ब्दः क्वचिच्छक्तो भवति स एवापरत्र लाक्षणिको यथा गङ्गाशब्दः स्रोतसि शक्तस्तीरे । न च तटीघटीपटीधाटीशाटीवाटीकटीप्रभृ-तयः स्तनसम्बन्धादिपुरस्कारेण क्वचन शक्ता येनात्र लाक्षणिका भ-वेयुः । ननु यथाऽऽलङ्कारिकाणां गङ्गादिशब्दे प्रयोजनलक्षणायां गङ्गा-दित्वेनैव तीरादिप्रतिपत्तिस्तथैव पावनत्वादिप्रयोजनप्रतीतिनिर्वाहाद् गङ्गासम्बन्धत्वमात्रप्रतीतौ तु गंगातटे घोष इत्यत्र पावनत्वप्रत्ययो न स्यात्तथा स्त्र्यादिलिङ्गादयोपि शब्दा लक्ष्यावृत्तिनापि स्तनसम्बन्धा-दिना रूपेण लक्ष्यं लक्षयन्ति इति चेन्न । क्वचिच्छक्त्याभावेन लक्षणाया वक्तुमशक्यत्वात् शक्यलक्ष्यसम्बन्धस्यैव लक्षणात्वात् । ननु यथा गौरनित्य इत्यत्र गोत्वविशिष्टोपस्थितावपि योग्यतावशाद्गोत्वमप-हाय व्यक्तावानित्यत्वान्वयः तथा स्तनसम्बन्धादिविशिष्टोपस्थितावपि स्तनसम्बन्धादि विहाय तट्यादिपदैरन्वयो बोध्यत इति चेन्न । वैष-म्यात् । दृष्टान्ते हि पदार्थस्यापरिपन्थितया भवतु तथान्वयबोधः प्रकृते तु स्त्र्यादिविशिष्टतटादिपदार्थस्याभावान्मूल एव निहितः कुठार इति क्व शाखासु पल्लवादिप्रत्याशा । अपि च भर्तृहरिपरिगणि-तेषु तदुपव्यञ्जना जातिरित्यत्र न तस्य स्वरसः । तदुपव्यंजनेत्यत्र हि

(से०)स्तनादिर्व्यंग्या स्त्रीलिङ्गादिशब्दप्रतिपाद्या चेत्यर्थः। सा च स्त्रीत्वादिरेव विवक्षिता। न च स्त्रीत्वादिर्जातिः सम्भवति जाति साङ्कर्यात्। स्त्रीत्वस्य पृथिवीत्वपरिहारेण वरुणालोकादिस्त्रीषु सत्त्वात् पृथिवीत्वस्य स्त्रीत्वपरिहारेण घटादौ सत्त्वात् भूतलवर्तिनीषु नितम्बिनीषु द्वितयसमावेशात् शरीरत्वसाम्यात्। ननु भवतु शब्दोपजनितार्थात्मेत्यत्र तस्य स्वरसः। शब्दोपजनितः शब्दोपजनितज्ञातविषयो योऽर्थस्तदात्मेति हि तस्यार्थः, एवञ्च शब्दव्यङ्ग्यः स्फोटविशेष एव स्त्रीलिङ्गादिभिरुच्यत इति चेन्न। स्फोटस्य शतशः पाटितत्वात्। ननु शब्दजन्यज्ञानजातज्ञाततविशेष एव स्त्रीलिङ्गादेरर्थ इति चेन्न। तस्याः शब्दप्रवृत्त्युत्तरकालीनत्वात् अप्रामाणिकत्वाच्च। ननु उपचयापचयावेव पुल्लिङ्गस्त्रीलिङ्गार्थौ, प्रतीयते हि तटस्तटीत्याभ्यां शब्दार्थाभ्यां महांस्तटः स्वल्पश्च तट इति चेन्न। नपुंसके कोऽर्थ इति वक्तव्यत्वात्। न तावदुपचयाभावे सत्यपचयाभावः, तयोः परस्परविरुद्धतया एकत्रासम्भवात्। एवञ्चोभयाविवक्षया नपुंसकशब्दप्रयोगो निरर्थक एवेति मन्तव्यम्। तथाच लिङ्गभेदेन तत्राकारभेदमात्रम् तथाच स्त्रीपुंलिङ्गयोरपि निरर्थकत्वमेव आकारसमर्पकत्वेनानुगमात्। अपि च बहुवृक्षा भूर्बहुधनः प्रदेशो भूरिसंग्रामं कुलमित्यादिबहुव्रीहिषु विशेष्यलिङ्गग्राहितया स्त्रीलिङ्गाद्यैः शब्दैरपचयाद्याः प्रतीयन्त इति न सचेतसश्चेतसि सञ्चरति। किञ्च यः पुंलिङ्गः शब्दः स एव चेत् स्त्रीलिङ्गो भवति तदा भवतु कदाचिदुपचयापचयादिप्रतीतिर्भुजगराजवचसामनुरोधात् यथा तटस्तटीत्यादौ न तु ये भिन्ना भिन्नलिङ्गा पृथ्वी सुमेरुः कुलमित्याद्याः ते कदाचिदपि प्रत्याय्यविशेषं प्रत्याययन्तीति केऽपि प्रतियन्ति, न हि सुमेरुः पृथिवीति प्रयोगे परस्परापेक्षं महत्त्वमल्पत्वं च प्रतीयत इति कश्चित्प्रत्येति। ननु ब्राह्मणमानयेति नियुक्ता नियोज्याः पुमांसमुपहरन्ति ब्राह्मणीमित्यतस्तु स्त्रियम न चार्थविशेषाप्रत्यये व्यवहारभेदः प्रवर्तितुमर्हति तथाच पुंलिङ्गादिभिः शब्दैः पुंस्त्वादयः प्रतीयन्त इति निर्विवादमिति चेन्न। प्रत्याययन्तु तर्हि ब्राह्मणी देवदत्तो मित्रेत्याद्याः शब्दाः पुंस्त्वादिप्रत्ययस्य व्यवहारेण बलादानयनात् अर्थस्याप्यबाधाच्च, न तु घटः पटः कुटी पुटीतिप्रभृतयः। अत एव ब्राह्मणादित्यत्र नामार्थैकदेशगतं पुंस्त्वमनूद्यत इति चिन्तामणिविरोधोपि न-

(से०)तादृशि स्थले पुंस्त्वादिप्रतिपादनस्यास्माभिरप्यङ्गीकारात् । एवं च चारुतरो विचारसंचारः पितृचरणचिन्तनानुग्रहेण प्रवर्तितो न परैर भ्यसूयामात्रेणावगणनीयः प्रवर्तनीयस्तु समुत्सार्य मात्सर्यं दूषणभूषणादिभिरिति संक्षेपः ।

(१८)नन्वस्ति विशेषणोपलक्षणयोर्भेदः सदसद्व्यावर्तकताकृत-स्तस्या उभयासाधारणत्वात् सद् व्यावर्तकं विशेषण-मसदुपलक्षणमिति चेन्न । काकवन्तो देवदत्तगृहाः जटाभिस्तापस इत्यत्र सतोऽप्युपरिभ्रमत्काकस्य जटायाश्चोपलक्षणत्वात् । सर्वदा सत्त्वस्य सर्वत्र विशेषणेऽप्यभावात्, कादाचित्कसत्त्वस्योपलक्षणेपि सत्वात्, व्यावृत्तिबोधसमयेपि सत्त्वस्योपरिभ्रमत्काकादौ सत्त्वात् । ननु विशेष्यवृत्तित्वे सति व्यावर्तकत्वं विशेषणत्वं विशेष्यत्वं च न विशेषणवत्त्वं येनान्योन्याश्रयः किन्तु प्रत्यारयव्यावृत्त्यधिकरण-त्वम् न चोपरिभ्रमत्काकादेर्गृहादिविशेष्यवृत्तित्वमस्तीति चेन्न । जटाभिस्तापस इत्यत्रातिव्याप्तेः जटायास्तापसवृत्तित्वात् । अत एव विशेष्यतावच्छेदकसमानाधिकरणत्वेन प्रतीयमानत्वं विशेषणत्वमि-त्यपि निरस्तम् । जटाभिस्तापस इत्यत्र जटातापसत्वयोः सामाना-धिकरण्यप्रतीतेः । विशेष्यवाचकपदसमानविभक्तिपदप्रतिपाद्यत्वन्तु काकवद्देवदत्तगृहमित्यत्रोपलक्षणे सर्वत्र तृतीयेति नियमाभावा-त् । अप्रयोगदशायां शब्दघटितस्य विशेषणत्वमुपलक्षणस्य तु न विशिष्टधीविषयकत्वम् काकवन्तो देवदत्तगृहा इत्यत्र काकसत्त्व-दशायामपि काकविषयत्वप्रतीतेर्भ्रान्तत्वापत्तेः तथाच तत्र तृणत्वा-दिरेव धर्मोभासतेऽत एव गङ्गायां घोष इत्यत्राप्युपलक्षतीरवि-शेष्यस्यैव भानं न त्ववच्छेदकतयाप्युपलक्षणस्य प्रवाहस्य । नन्वे-वं विशेषणत्वस्य बुद्धिगर्भत्वे तद्विषयिणी घटोऽयमित्यादिश्चाक्षुषी विशिष्टधीर्न स्याद्बुद्धेरचाक्षुषत्वादिति चेन्न । विशिष्टधियो विशेषण-विषयत्वेपि विशेषणत्वाविषयकत्वादिति । ननु प्रतियोगिविशिष्ट-धीविषयत्वं विशेषणत्वमिति चेन्न । घटाभाव इत्यत्रोपलक्षणे प्रतियोगिविशिष्टधीविषयत्वादतिव्याप्तिः तत्र तृणत्वादेरिव भा-समानस्य कस्यचिद्धर्मस्य वक्तुमशक्यतया घटस्याप्यभान इतराभा-वविलक्षणघटाभावभानानुपपत्तेः । अपि च काकस्य शक्त्योपस्था-

(स्थ०)पितस्य शाब्दबोधाविषयत्वे प्रकारान्तरोपास्थितस्य तृणत्वादेस्त-
द्विषयत्वे काकपदं लाक्षणिकं स्यात्। न च काकपदान्न तदुपस्थितिः
प्रकारान्तरादिति न काकपदं लाक्षणिकमिति वाच्यम् प्रकारान्तर-
स्याभावात् भावे वा गङ्गादिपदेऽपि तत्संभवेन लक्षणोच्छेदापत्तेः। प्र-
कारान्तरोपस्थितस्य शाब्दबोधाविषयत्वाच्चार्थाध्याहारतयानयना-
पत्तेः। अपि च गंगायां घोष इत्यत्र गंगाया उपलक्षणत्वं न वा? आद्ये
उपलक्षणप्रतिपादकगङ्गापदस्येव काकादिपदस्यापि लाक्षणिकत्वमे-
वोचितम्। अन्त्ये गंगायामेवोपलक्षणलक्षणातिव्याप्तिः। व्यावर्तकत्वे
सति क्रियान्वयित्वं विशेषणत्वं तद्भिन्नत्वमुपलक्षणलक्षणत्वमिति चे-
न्न। घटवद्भूतलमित्यादौ क्रियाहीनेऽव्याप्तेः। न च क्रियाहीनस्य शा-
ब्दबोधाविषयत्वमेव, अस्य मतस्य वेदाक्षरमात्रन्यासव्यासक्तचेतसा-
मेवोचितत्वात् शाब्दबोध आवश्यकयोग्यतादेरेव प्रयोजकत्वात् श-
ब्दाप्रयोगदशायां विशेषणोपगतेश्च क्रियान्वयावगाहिशाब्दबोधावि-
षयत्वात्। ननु घटोयमित्यादिविशिष्टबोधस्याघटव्यावृत्तोयमित्यादि-
रर्थो न तु घटत्ववानित्यादिस्तत्कारणञ्च क्वचिद्विशेषणज्ञानं
क्वचिदुपलक्षणज्ञानं तथाच विशिष्टबोधकारणज्ञानविषयत्वे सति
प्रत्याय्यव्यावृत्तिसमानाधिकरणत्वं विशेषणत्वम् उपरिभ्रमत्काका-
दि तु न व्यावृत्त्यधिकरणे गृहे तिष्ठतीति चेन्न। विशिष्टबोधस्यानु-
व्यवसायानुरोधेनापोहवादपातभिया घटाद्युपस्थितिविलम्बेन च
घटत्वादिमत्त्वादिविषयत्वस्यैव स्वीकर्तुमुचितत्वात् तापसवृत्तौ
जटायामतिव्याप्तेश्च। साक्षात्सम्बन्धेन विशेष्यवृत्ति विशेषणम् पर-
म्परासम्बन्धेन तु तथोपलक्षणम् उपरिभ्रमत्काकादि तु साक्षात्सम्ब-
न्धेन गृहवृत्तीति चेन्न। गौरनित्य इत्यत्रोपलक्षणस्यापि गोत्वस्य
साक्षात्सम्बद्धत्वात् अन्यथा गोत्वेप्यनित्यत्वापत्तेः। लोहितः स्फटि-
क इत्यादौ परम्परासम्बद्धस्य लोहितत्यादेर्विशेषणत्वाच्च। यत्स्व-
यमन्वेति तद्विशेषणम् यदुपस्थापितमन्वेति तदुपलक्षणम्, दण्डी
पुरुष इत्यादौ दण्डादेरेवान्वयात् काकवन्त इत्यादौ तदुपस्थापित-
तृणत्वादेरन्वयादिति चेन्न। घटाभाव इत्यत्र प्रतियोगिन्युपलक्षणेऽ-
तिव्याप्तेः तत्रोपस्थाप्याभावेनाभाववैलक्षण्याय तस्यैवान्वयात्। ननु
व्यावृत्तिबोधसमये विशेष्यनिष्ठं व्यावर्तकं विशेष्येऽसच्चोपलक्षणं
तत्काले तत्र सती जटा विशेषणमेवेति चेन्न रूपवति प्रतीति काले

(सि.)घटे सत्त्वात् तस्माद्विशेषणत्वमुपलक्षणत्वञ्च पदार्थान्तरमेवेति चेत्

अत्राह प्रत्याय्यव्यावृत्त्यधिकरणतावच्छेदकं व्यावर्तकं विशेषणम् अतथाभूतं च व्यावर्तकमुपलक्षणम् । दण्डी पुरुष इत्यत्र व्यावृत्त्यधिकरणताऽनतिप्रसक्तेन दण्डेनावच्छिद्यते न तु पुरुषत्वेनातिप्रसक्तेः । उपलक्षणे तु न काकादिभिर्व्यावृत्त्यधिकरणतावच्छेदस्तदभावेऽपि व्यावृत्तिप्रतीतेः, किन्तु तृणत्वादिना । घटाभाव इत्यत्रापि नाभावस्य व्यावृत्त्यधिकरणता घटेनावच्छिद्यते तत्रावृत्तेः किन्तु घटप्रतियोगिकत्वादिनान्येनैव । ननु व्यावृत्त्यप्रतीतौ व्यावृत्तिघटितस्य विशेषणत्वस्य प्रतीतिर्न स्यादिति चेन्न व्यावृत्तिप्रतीतावेव प्रतीतेरङ्गीकारात् । विशेष्यस्येतरान्वयप्रतियोगितावच्छेदकं व्यावर्तकं विशेषणम् दण्डिनमानयेत्यत्र हि पुरुषस्यानयनान्वयिता दण्डेनावच्छिद्यते । काकेन देवदत्तस्य गृहा इत्यत्र तु गृहस्य देवदत्तान्वयिता न काकेनावच्छिद्यते तदभावदशायामप्यन्वयसत्त्वावगमात्, किन्तु तत्परिचितेनोत्तृणत्वादिना । अन्वयितावच्छेदकपरिचायकतयैवोपलक्षणस्य साफल्यमपि, घटाभावस्तिष्ठतीत्यादावपि प्रतियोगिनो नान्वयितावच्छेदकत्वमभावेऽवृत्तेः किन्तु तत्प्रतियोगिकत्वस्यैवेति वा । यदाधिकरणतया ज्ञात एव धर्मिणीतरान्वयधीस्तद्व्यावर्तकं विशेषणम्—दण्डिनमानयेत्यत्र दण्डस्तथैव दण्डाधिकरणत्वप्रतीत्यनन्तरमेवानयनान्वयात् । काकेन देवदत्तस्य गृहा इत्यत्र तु न तथा काकाभावदशायां काकाधिकरणतामप्रतीत्य तत्परिचितोत्तृणत्वाधिकरणतां प्रतीत्य देवदत्तान्वयप्रतीतेः। घटाभावस्तिष्ठतीत्यत्रापि तथाऽभावे घटावृत्तेरिति वा । विशेष्यान्वयिना यस्यान्वयस्तद्व्यावर्तकं विशेषणमतथाभूतं तूपलक्षणम्, रूपवति सत्तेत्यत्र रूपं विशेषणं घट इव रूपेऽपि सत्त्वात् रूपवति रस इत्यत्र तूपलक्षणं घटे सतो रसस्य रूपेऽसत्त्वात् इति वा। व्यावर्तकपदस्थाने पदं (स्यानेकार्थत्वं) ? चेति चिन्तामणिकृतः। इदमादितो विचार्यते प्रत्याय्यव्यावृत्त्यधिकरणतावच्छेदकत्वे सति व्यावर्तकत्वं विशेषणत्वमित्यत्र प्रत्याय्यत्वं स्वेन येन केनचिद्वा ? नाद्यः तावतैव व्यावर्तकत्वप्राप्तौ व्यावर्तकत्वविशेषणवैयर्थ्यात् । न द्वितीयः सत्त्या व्यावृत्तेः केनचिदवश्यम्प्रत्याय्यत्वे प्रत्याय्यत्वविशेषणवैयर्थ्यात् । व्यावर्तकत्वञ्च यदि व्यावृत्तिबुद्धिस्वरूपयोग्यत्वम्, तदा के·

(से०) वलान्वयिनो धर्मस्य तदावश्यकमिति व्यर्थं विशेषणम्। अथ व्यावृत्ति बुद्ध्युपहितत्वन्तदा व्यावृत्तिबुद्ध्यनुपधानदशायामव्याप्तिः। अथ जनितव्यावृत्तिबोधत्वम् अस्मदाद्यज्ञातविशेषणेऽव्याप्तेः। योगाभ्यासेनव्यावृत्तिधीरिति चेन्न तेषां हेतोरिव साध्यस्यापि ज्ञानेन सिद्धसाधनेन व्यावृत्तिबुद्ध्यनुत्पत्तेः। नहि तेषां तर्करसिकत्वे मानमस्ति येन सिषाधयिषा भाष्येत। न च वैधर्म्यज्ञानसहकृतप्रत्यक्षेण भेदग्रहात्प्रत्यक्षसहकारितया भेदज्ञाने योगिनो विशेषणज्ञानस्योपयोगः। न च तन्निरपेक्षा एव योगजधर्मास्तेनेदं गृणन्तीति वाच्यम् वैयर्थ्यात्। ननु विशेषणोपलक्षणव्यतिरिक्तोपरञ्जकप्रमेयत्वादिव्यावृत्तये व्यावर्तकत्वं विशेषणम् प्रतियोगिप्रसिद्ध्या केवलान्वयिनामव्यातकत्वात्प्रत्यायकं वा व्यावृत्तेर्विशेषणमिति चेन्न व्यावृत्त्यधिकरणतावच्छेदकत्वेनैव तद्व्यावृत्तिलाभात् प्रतियोग्यप्रसिद्ध्या सकलप्रमेयगतव्यावृत्त्यप्रसिद्ध्या तदधिकरणतावच्छेदकत्वस्य प्रमेयत्वादावभावात्, अतिरिक्ताप्रसिद्ध्याऽनतिरिक्तत्वगर्भावच्छेदकत्वाप्रतीतेश्च। प्रतियोग्यभावेन व्यावृत्त्यभावेन तदधिकरणत्वाप्रतीत्या तदवच्छिन्नप्रत्ययजनकत्वस्याप्यवच्छेदकत्वस्याभावात्। यदपि विशेष्यगतेनान्वयप्रतियोगितावच्छेदकत्वे सति व्यावर्तकत्वं विशेषणत्वमिति, तदपि व्यावर्तकत्वपदवैयर्थ्यादेवापार्थकम्। न च प्रमेयमभिधेयमित्यत्रास्ति प्रमेयस्याभिधेयस्य चाभेदलक्षणोऽन्वयस्तत्प्रतियोगिनि प्रमेये तदवच्छिन्नप्रत्ययजनकत्वलक्षणं प्रमेयत्वे तद्व्यावृत्तये व्यावर्तकं विशेषणमिति वाच्यम्। शाब्दबोधमादायान्वयप्रतियोगितायां वाच्यायां शब्दाप्रयोगदशायां विशेषणत्वानापत्तेः, शब्दप्रयोगदशायामपि दण्डीत्येतावन्मात्रप्रयोगे दण्डस्याविशेषणत्वापत्तेः इतराभावेनेतरान्वयाभावात्। घटाभाववतीत्यत्र घटस्य विशेषणत्वापत्तेश्च—अभावोपस्थित्यन्वयप्रतियोगिताया घटेनैवावच्छेदात्। घटेन नावच्छिद्यतेऽभावेऽवृत्तेः किन्तु घटप्रतियोगिकत्वेन तत्तु विशेषणमेवेति चेन्न शब्दाप्रयोगदशायां विशेषणत्वानापत्तेः। नन्वन्वयस्सन्नेव शब्देन बोध्यते न तु क्रियते तथाच शब्दाप्रयोगदशायामप्यन्वयस्तत्प्रतियोगितातदवच्छेदकानि न दुर्मिलानि दण्डीत्येतावन्मात्रप्रयोगेऽपि न दोषो वास्तवस्थित्याद्यन्वयस्य तत्र सत्त्वादिति चेन्न अवच्छिन्नप्रत्ययजनकत्वं यद्यवच्छेद्याधिकरणाव-

(से०) च्छित्तिप्रत्ययजनकत्वं तदा तत्र न यात्येव अवच्छेद्याया अन्वयप्रतियोगितायाः अधिकरणप्रमेये प्रतियोग्यप्रसिद्ध्यावच्छित्त्यप्रसिद्धेः। यद्यवच्छेद्यावच्छिन्ने प्रत्ययजनकत्वं तदापि नावच्छेदकस्यावच्छेद्येऽविद्यमानस्य तदवच्छित्तिप्रत्ययत्वानुपपत्तेः। तदवच्छिन्नत्वादेव तदवच्छेद्यमितरेभ्यो व्यावर्तत इति चेन्न तदवच्छिन्नत्वस्य तद्व्यावर्तितत्वरूपतया साध्याविशेषात् अवच्छेद्यान्यूनानतिरिक्तवृत्तेरेवावच्छित्तिप्रत्ययजनकत्वात् तस्य चातिरिक्ताप्रसिद्ध्या प्रमेयत्वेऽसम्भवात् अन्यथातिरिक्तन्यूनवृत्तेरप्यवच्छित्तिप्रत्ययजनकत्वापत्तेः। तस्मादिदमपि लक्षणं लक्षणालक्षणेन व्यर्थविशेषणत्वेन ग्रस्तमिति न प्रशस्तम्। यदपि यदधिकरणतया ज्ञात एव धर्मिणि इतरान्वयधीस्तद्व्यावर्तकं विशेषणमिति, तदपि न–यदधिकरणताज्ञानं विना धर्मिणि यस्यान्वयो न ज्ञायते तद्विशेषणमित्यभिप्राये दण्डिनमानयेत्यस्य शाब्दबोधस्य विषये दण्डेतिविशेषणेऽव्याप्तेः दण्डाधिकरणताज्ञानं विना दण्डान्वयस्यैव ज्ञानात्। यदधिकरणताज्ञानं विना स्वेतरस्य कस्याप्यन्वयो न ज्ञायते इत्यर्थेऽपि दण्डादौ न याति सामग्रीवशेन पुरुषादौ दण्डाद्यधिकरणत्वमज्ञात्वापि कदाचिदानयनाद्यन्वयप्रतीतेः, अन्यथा पुरुषमानयेत्याद्यन्वयबोधानामुच्छेदापत्तेः। यदधिकरणत्वं ज्ञात्वेतरान्वयो ज्ञायते तद्विशेषणं, गच्छति च दण्डादौ कदाचिद्दण्डाद्यधिकरणं ज्ञात्वानयनाद्यन्वयप्रतीतेरन्यथा दण्डिनमानयेत्यादिबोधानामुच्छेदापत्तेरिति चेन्न इतरतया ज्ञानदशायां विशेषणत्वापत्तेः। यदपि विशेष्यान्वयिना यस्यान्वयः स व्यावर्तको धर्मो भावविशेषणमिति। तदपि न द्योतते—रूपवान्रस इत्यत्र रूपस्य विशेषणतापत्तेः। विशेष्यान्वयिना प्रमेयत्वेनास्यान्वयात्। प्रमेयत्वे रूपं विशेषणमेव रसे तूपलक्षणमिति चेन्न एवं हि विशेष्यान्वयिना येन यदन्वीयते तस्य तद्विशेषणमित्यर्थे रूपवति सत्तेत्यत्र सत्ताया रूपं विशेषणं स्यादिति रूपस्य घटविशेषणत्वानापत्तेरिति॥

अत्रोच्यते–धर्मस्तावत्त्रिविधो–विशेषणमुपलक्षणमुपरञ्जकञ्चेति भेदात्। तत्रोपरञ्जकं स्वोपरक्तबुद्धिजनकं यथा प्रमेयत्वादि। विशेषणं तद्यत् स्वतो व्यावर्तकं यथा दण्डादि। यत्तु व्यावर्तकस्योष्णत्वादेः परिचायकं काकादि तदुपलक्षणम्। एवं च काकाद्यपि यदि

(से०)स्वतो व्यावर्तयति तदा विशेषणमेव। दण्डाद्यपि यदा व्यावर्तकं प्रत्याययति तदोपलक्षणमेव, प्रतियोग्यप्यभावस्य यदा स्वतो व्यावर्तकस्तदा विशेषणं यदा तु स्वप्रतियोगिकत्वादिव्यावर्तकमुपस्थापयति तदोपलक्षणमेव। न च यत्रोपलक्ष्यतावच्छेदकमस्ति तत्रोपलक्षणस्यैव व्यावर्तकतया विशेषणत्वापत्तिः, असाधारणधर्मशून्यस्य धर्म्मिणोऽभावेन कस्यचिदसाधारणधर्म्मस्यावश्यकतया तस्यैवोपलक्ष्यतावच्छेदकत्वात् 'न हि निर्विशेषं सामान्यमिति' न्यायात्। यदा तु स्वत एव व्यावर्तयति तदा तत्र विशेषणत्वमेव। व्यावर्तयतीत्युपलक्षणमिति शब्दार्थपर्यालोचनयापि तथार्थलाभात् रूपवान्स रूपवान् सरस—इत्यत्र रूपस्य विशेषणतोपलक्षणते तु यदन्वयिना यदन्वीयते तत्तस्य विशेषणमन्वयि तूपलक्षणमिति लक्षणे कृते, एवञ्च विशेषणोपलक्षणशब्दो नानार्थ एवेति न तद्व्यवहारोऽपार्थक इति निर्गततत्त्वसर्वस्वसङ्क्षेपः।

(१९)कारणत्वमपि न तत्त्वान्तरङ्कार्य्यकारणभावस्यैवाभावादित्येके। तथाहि—यैः कारणैर्य उत्पद्यते तेषां सर्वेषां सदातनत्वे विलम्बप्रयोजकविलम्बप्रतियोगिनोऽभावेनाद्यजातस्यासत्त्वकालेऽपि सत्ता स्यात्, कस्यचित् कारणस्य सत्त्वे तु कारणपरम्पराया अविश्रान्तावनवस्था विश्रान्तौ तु तदेव प्राक्तनत्वमद्योत्पन्नस्येति।

तन्न। कार्य्यकारणभावाभावे भावानाङ्कादाचित्कत्वव्याहतेः। अनवस्थायास्तु प्रमाणेन परिगृहीततयाऽदोषत्वात्। उपाधिरूपसामान्यान्तर्गततया पार्थक्यमिति तु सम्यक्।

ननु किमिदं कारणत्वं? न तावत् जातिमत्त्वं, सामान्यादावव्याप्तेः ससम्बन्धिकत्वाच्च। कस्येदङ्कारणमिति जिज्ञासायाः कारणमिति श्रवणोत्तरमावश्यकत्वात्सत्ताजातिमदित्याकर्णनादनु च तदभावात्। अत एव न स्वरूपत्वमपि तत्त्वम्। नापि पूर्ववर्त्तित्वं रासभादेर्घटकारणतापत्तेः। नापि नियतपूर्ववर्त्तित्वमन्यथासिद्धेऽवच्छेदकादौ गतम्। नाप्यनन्यथासिद्धत्वे सति नियतपूर्ववर्तिमनन्यथासिद्धत्वं ह्यन्यथासिद्धभिन्नत्वमित्यन्यथासिद्धत्वज्ञानसापेक्षत्वात्तस्य चानिर्वचनात्। करणत्वरहिततया प्रमितत्वमन्यथासिद्धत्वन्तद्भिन्नत्वमनन्यथासिद्धत्वमिति चेन्न आत्माश्रयात्। अपि च पूर्ववर्तित्वं प्रागभावावच्छिन्नसमयवर्त्तित्वम्। तत्र

(से०)प्रागभावस्य विशेषणत्वे प्रागभावे दण्डादौ चाव्याप्तिरात्माश्रयेण प्रमाणाभावेन च प्रागभावे तेषां प्रवृत्तेः । उपलक्षणत्वे प्रागभावे तस्मिन्नेव समयेऽव्याप्तिरात्माश्रयेण तत्र तस्यावृत्तेरिति चेन्न ।

अन्यथासिद्धिश्च—अन्यम्पुरस्कृत्य यस्य पूर्ववर्तिता गृह्यते तदन्यथासिद्धमित्येका, यथा तन्तुरूपस्य पटं प्रति तन्तुरूपत्वेन पूर्ववर्त्तिताग्रहे तत्र तन्तुम्पुरस्कृत्य तन्तुरूपस्य पूर्ववर्तिताग्रहात् । यमादायैवान्यस्य पूर्ववर्तिता गृह्यते तदन्यथासिद्धमित्यन्या, यथा दण्डत्वेन पूर्ववर्त्तिताग्रहे तत्र दण्डत्वमादायैव दण्डस्य पूर्ववर्त्तिताग्रहात् । अन्यत्र क्लृप्तनियतपूर्ववर्तिन एव कार्य्यसम्भवे तत्सहभूतत्वमित्यपरा, यथा घटविशेषत्वेन रासभत्वेन कार्य्यकारणभावे वाच्ये पूर्ववर्तिभिर्दण्डचक्रादिभीरासभानुत्तरो घटस्तैरस्यापि सम्भवात् । अवश्यक्लृप्तमानपूर्ववर्तिभिर्दण्डाभिरन्यथासिद्धत्वमितीतरा, यथा गन्धं प्रति गन्धप्रागभावस्य आवश्यकतया रूपादिप्रागभावानामन्यथासिद्धिः । अनयोरन्यथासिद्ध्योः क्लृप्तमानविषयपूर्ववर्तिन एव कार्य्यसम्भवे तत्सहभूतत्वमन्यथासिद्धत्वमित्यनेन रूपेणैकत्वमेव न तु द्वैतमिति केचित् । जन्यपूर्ववर्तित्वे गृहीते यस्य पूर्ववर्तिता गृह्यते तदन्यथासिद्धमिति परा, यथा कुलालपितृत्वेन जनकतायाकुलालपिता—जन्यकुलालस्य पूर्ववर्तित्वग्रहे जनकस्य तत्पितुष्प्रतीतेः । आकाशे त्वन्यम्प्रति पूर्ववर्तित्वे गृहीते यत्रान्यम्प्रति पूर्ववर्तिता गृह्यते तदन्यथासिद्धमित्यन्यथासिद्धिः । आकाशस्य ह्याकाशत्वेन कारणत्वं वाच्यम् तच्च शब्दसमवायिकारणत्वरूपतया शब्दपूर्ववर्तितागर्भमिति शब्दपूर्ववर्तित्वे गृहीते घटादिपूर्ववर्तिताग्रहादिति प्राञ्चः ।

अत्र पितृचरणाः—शब्दम्प्रति पूर्ववर्तित्वे गृहीते यत्रान्येति प्रोक्तेन रूपेणाकाशस्य कारणता न तावत्पूर्वोक्तेनाकाशत्वेनैव, आत्माश्रयात् । अष्टद्रव्यातिरिक्तद्रव्यत्वेन चेत्, तदा घटादावव्याप्तिस्तथासति पूर्वोक्तान्यथासिद्धेरभावात् । यदन्यथा कारणत्वेन सिद्ध्यति तदन्यत्रान्यथासिद्धं सिद्ध्यति च शब्दकारणत्वेनाकाश इति घटादावन्यथासिद्ध इति चेन्न यदन्यकारणत्वेनैव सिद्ध्यति इति विवक्षिते नाकाशस्य घटादावन्यथासिद्धत्वं स्यात् शब्दः क्वचिदाश्रितो गुणत्वादित्यादिना प्रकारान्तरेणापि सिद्धेः । नियमाविवक्षा-

(से०)यान्तु घटादेरपि कदाचित्स्वरूपकारणतया सिद्धौ स्वरसादा- वन्यथासिद्धिः स्यात् तस्मादवश्यकल्प्यमाननियतपूर्ववर्तिन एवेत्या- दिरेवान्यथासिद्धिस्तत्र तस्यापि प्रमाणसिद्धतयाऽवश्यकल्प्यमानै- रन्यैः कार्यासम्भवादिति परिशीलयन्ति । तस्मादन्यथासिद्धिराहित्ये सति नियतपूर्ववर्तित्वमेव कारणत्वमिति । न च समयेऽव्याप्तिः,प्रामा- णिकस्यात्माश्रयस्यादोषत्वेन तत्र तद्वृत्तौ बाधकाभावात् । न च प्रागभावस्य प्रतियोगिजनकाभावतयाऽऽत्माश्रयः, सत्ताभाव- स्वरूपत्वेऽपि सत्तात्वस्य ध्वंसप्रतियोगिरूपतया ध्वंसत्वस्य सकारणकाभावत्वरूपतया सः, जन्यानाधारसमयानाधारत्वरूपत्वे- ऽपि अनाधारत्वस्याधारान्योन्याभाववत्त्वरूपतया तस्य प्रतियो- गितावच्छेदकारोपहेतुत्वगर्भतया सः, महाप्रलयासद्भावत्वरूपत्व भावकार्यानाधारसमयस्य तु महाप्रलयत्वरूपतया सः, ध्वंसातिरिक्तगुणवृत्तिसर्गाभावविभाजकोपाधिशून्यसमयस्य महाप्रलयसं- सर्गाभावत्वरूपत्वे संसर्गाभावत्वस्य प्रतियोग्यारोपहेतुकत्वगर्भत- या सः, एवमन्यथासिद्धत्वनिर्वचनेऽन्योन्याभावात्यन्ताभावान्य- तरप्रवेशेन सः, एवन्नियतत्वस्य व्याप्तिगर्भतया व्याप्तेरत्यन्ताभा- वान्योन्याभावान्यतरगर्भतया सः, एवमन्यथासिद्धत्वेन च सतीत्यत्र समानाधिकरणप्राप्त्या तस्य सम्बन्धगर्भतया तत्र जनकत्वप्रवेशे- नापि स इति वाच्यम् । प्रागभावत्वादीनामखण्डानां स्वीकारात् । नियतपदोपादानन्तु घटमात्रे रासभकारणतावारणाय तत्रान्यत्र पटादौ क्लृप्तनियतपूर्ववर्तिनो वेमप्रभृतेरसम्भवासम्भवेनान्यथा- सिद्धेरसम्भवात् । नन्ववच्छेदकस्यान्यथासिद्धत्वे इन्द्रियसन्निकर्ष- त्वेन कारणतायामिन्द्रियमन्यथासिद्धं स्यादिति चेन्न । विनिग- मनाविरहातिरिक्तस्थलेऽवच्छेदकस्यान्यथासिद्धत्वात्, अत्रेन्द्रि- यसन्निकर्षत्वेन सन्निकर्षत्वेन सन्निकृष्टेन्द्रियत्वेन वा कारणतायां विनिगमकाभावात् ।

ननु यत्पुरस्कृत्येत्यस्य कोऽर्थो यस्य पूर्ववर्तित्वे गृहीते इति वा यस्मिन्गृहीत इति वा येन रूपेणेति वा ? नाद्यः—जन्य- पूर्ववर्तित्वे गृहीते यत्र जनकस्य पूर्ववर्तिता गृह्यते तत्रान्यथासि- द्धिरित्यत्र तथा सत्यन्यपूर्ववर्तित्वे गृहीते यत्रान्यस्य पूर्ववर्तिता गृह्यते तत्रान्यथासिद्धिरित्यर्थस्यौचित्ये अन्यथासिद्धिद्वयकल्पनानौ-

(से०)श्वित्वात् । नापरौ–तथासत्यवच्छेदकत्वलक्षणायामन्यथासिद्धौ पर्यवसानाद्यमाद्यौवेत्यत्राप्येतदन्यतरस्यार्थस्य वाच्यत्वात्तथाप-सिद्ध तयोरेवान्यथासिद्ध्यापत्तेः । किञ्चान्यत्र क्लृप्तनियतपूर्ववर्तिन एव कार्यसंभवे तत्सहभूतत्वमन्यथासिद्धत्वमित्यस्य कोऽर्थः ? ...स्यैवोत्पादकत्वेऽस्य किमित्युत्पादकत्वमिति यदि, तदा प्र-...तकार्यानुत्पादकत्वमन्यथासिद्धत्वं पर्यवस्यति, अनुत्पादकत्वञ्चो-...पादकत्वाभावः तच्चोत्पत्तिकारणत्वमित्यात्माश्रयः । यतोऽन्यत एव ...कार्यसंभावनाऽतः प्रकृतमन्यथासिद्धमिति चेदेवं हि सहृदयविचारे-...ा प्रकृतकार्यव्यतिरेकप्रयोजकव्यतिरेकाप्रतियोगित्वमन्यथासिद्ध-...त्वं पर्यवस्यति, तथासति नित्यविभूनां तदापत्तिः।अन्यत्र क्लृप्तं सक-...ं यत्र कार्ये तत्रान्यदन्यथासिद्धम्, भवति हि रासभस्तथाऽन्यत्र घटे क्लृप्तस्य दंडचक्रादेः प्रकृतघटेऽपि सत्त्वात्, न च विजातीयका-र्ययोर्विशेषकारणयोस्तथात्वमेकत्र कार्ये क्लृप्तस्य विशेषकारण-स्यापरत्राभावात् तथाच कार्यान्तरक्लृप्तसकलनियतपूर्ववर्तित्वमव्य-वहितत्वमेवान्यथासिद्धत्वमिति पर्यवस्यतीति चेत् । अवश्यकल्प्यमा-ननियतपूर्ववर्तिन एव कार्यसंभवे इत्यादेरर्थनिर्वचनात् । यत्सत्त्वेऽप्य-न्यदावश्यकन्तदन्यथासिद्धं यथा रूपप्रागभावसत्त्वेऽपि ध्वंसप्रागभा-...स्यावश्यकतया गन्धं प्रति रूपप्रागभाव इत्यर्थ इति चेन्न दण्डसत्त्वे चक्रस्यावश्यकतया दण्डस्यान्यथासिद्धत्वापत्तेः । तादृशमनावश्य-कमन्यथासिद्धमिति चेन्न एवं ह्यनावश्यकत्वमात्रस्यैव तादृशत्वे शेषवै-फल्यात् । किञ्च प्रकृतकार्यानावश्यकमन्यथासिद्धमित्येतावतैव सर्वा-न्यथासिद्धानामुपसङ्ग्रहे किमिति पञ्चधा त्रेधा वाऽन्यथासिद्धिः। एव-...व कल्पमानविषयनियतपूर्ववर्तिन एव कार्यसंभवे तत्सहभूतत्वम-...थासिद्धमित्यस्याप्यर्थः प्रष्टव्य इति दूषणञ्च । यदि पूर्वोक्तश्चार्थस्तदा पूर्वोक्तमेव । अपि च जन्यपूर्ववर्तित्वे गृहीते यत्र जनकस्य पूर्ववर्ति-ता गृह्यते तत्र जनकमन्यथासिद्धमित्यन्यथासिद्धौ जनकत्वस्य प्र-वेशात्तद्विरहगर्भजनकत्वलक्षणजन्यपूर्ववर्तित्वे गृहीते यस्य पूर्वव-र्तिता गृह्यते तदन्यथासिद्धमित्येतावन्मात्रकरणे जन्यत्वस्य प्रकृत-जन्यत्वरूपतया तस्य च प्रकृतकारणकत्वरूपतयाऽऽत्माश्रयः । स्व-...रणकपूर्ववर्तित्वे गृहीते यस्य पूर्ववर्तिता गृहीते इत्यर्थपर्यवसा-नात् प्रकृतजन्यत्वे कथं प्रकृतकारणकत्वमिति चेत्, विवक्षिताविवेके-

(सि०) न तथैव पर्यवसानात् । तथाहि—न तावदुत्तरक्षणे नियमतो विद्यमानत्वं तज्जन्यत्वं घटे दण्डाजन्यत्वापत्तेः सर्वत्र दण्डोत्तरक्षणे घटासत्त्वात् चक्रादिसमवधानकालीनदण्डोत्तरक्षण एव घटसत्त्वा-त्तदसमवधानकालीनदण्डोत्तरक्षणे घटासत्त्वात् । तदुत्तरसमयासत्त्वं तत्साध्यत्वमिति चेन्न अनुत्तरसमयाप्रसिद्ध्या शब्द आकाशसाध्य-त्वानापत्तेः । तदभावव्यापकाभावप्रतियोगित्वं तत्साध्यत्वमिति चेन्न आकाशाभावाप्रसिद्धेः पूर्वोक्तदोषात् रूपाभावव्यापकाभावप्र-तियोगिनि रसे रूपसाध्यत्वापत्तेश्च । नापि यस्य समयसम्बन्धो यद्वाधिकोत्तरत्वव्याप्यः स तज्जन्य इति वाच्यम् उत्तरत्वव्याप्यता ह्युत्तरत्वाऽनधिकरणकालावृत्तित्वं तस्य चाका-शेऽप्रसिद्धेः तस्मात्तत्कारणकत्वमेव तज्जन्यत्वमित्यात्माश्रयात् । ननु स्वकालत्वसमानाधिकरणात्यन्ताभावाप्रतियोगितदुत्तरत्वं तत्साध्यत्वं गच्छति वै तच्छब्देप्याकाशाधिकरणक्षणोत्तरत्वस्य श-ब्दकालत्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वादिति चेन्न अन्यथा सिद्धनियतपूर्ववर्तिजन्यतापत्तेः । अन्यथासिद्धाद्यस्माद्यन्नियतोत्तर-भावि तत्तज्जन्यमिति चेदेवं ह्यन्यथासिद्धिलक्षणेऽन्यथासिद्धिप्रवे-शेनात्माश्रयात् तस्मादन्यथासिद्धेर्दुरूहतया तद्व्यतिरेकगर्भकारणत्व-मशक्यज्ञानमिति चेन्न कार्यकारणभावस्य स्वरूपसम्बन्धविशेषरू-पत्वात् । यथा स्वरूपसम्बन्धः प्रतियोग्यनुयोगिभावः क्वचिद्विषय-विषयिभावः क्वचिदन्यस्तथा कार्यकारणभावात्मापि सः । न च व्यञ्जकत्वेन कस्यचिदावश्यकतया स एव कार्यकारणभावोऽ-स्त्विति वाच्यम् व्यञ्जकं विनापि प्रतियोग्यनुयोगिभावादिस्वीका-रात् । नन्वस्तु स्वरूपसम्बन्ध एव तर्हि पृथक् पदार्थः, स्वरूपस-म्बन्धस्य धर्मिद्वयात्मत्वे स्वरूपसम्बन्धित्वं तथास्तु । तथाहि–नैत-ज्जातिः निर्जातौ सामान्यादावभावपर्यन्ते सत्त्वात् । तर्हि सामा-न्याद्यभावादिना तस्यान्यः सम्बन्धो, न च संयोगसमवायौ विना विशिष्टप्रतीतिजननयोग्यत्वं तत्त्वमिति वाच्यम् वाच्यवाचक-भावेऽतिव्याप्तेः तस्येश्वरेच्छानुरूपतया स्वरूपसम्बन्धत्वाभावात् । धर्म्यतिरिक्तसम्बन्धं विना विशिष्टप्रतीतिजननयोग्यत्वं स्वरूपसम्ब-न्धत्वमिति चेन्न । विशिष्टप्रतीतिजननयोग्यत्वं हि तज्जनकतावच्छे-दकधर्मवत्त्वम् । स च धर्मः क्वचिदनुगतः सकलपदार्थसाधारणभूतो